मधुरवाणी

— बुर्ली श्रीनिवासाचार्याणां लेखनसंग्रहः —

प्रबन्धारः

'अभिनवबाणभट्टः' इत्याद्युपाधिविभूषिताः

पं० बुर्ली श्रीनिवासाचार्याः

सम्पादकः

श्री ए. वि. नागसम्पिगे, एम्.ए.

न्याय-वेदान्तविद्वान्

संशोधकः, प्राच्यविद्यासंशोधनालयः

मैसूरुविश्वविद्यालयः, मैसूर

प्रकाशकाः

श्री आर्. एस्. बुर्ली

सहायककुलसचिवः [निवृत्तः] कर्णाटकोच्चन्यायालयः

बेंगलूरु

१९९५

ಮಧುರವಾಣಿ

(ವಿ|| ಪಂ. ಬುರ್ಲಿ ಶ್ರೀನಿವಾಸಾಚಾರ್ಯರ ಕೆಲವು ಲೇಖನಗಳ ಸಂಗ್ರಹ)

ಲೇಖಕರು :

'ಅಭಿನವ ಬಾಣಭಟ್ಟ' ಇತ್ಯಾದಿ ಬಿರುದಾಂಕಿತರಾದ

ಪಂ. ಶ್ರೀನಿವಾಸಾಚಾರ್ಯ ಬುರ್ಲಿ

ಸಂಪಾದಕರು :

ಶ್ರೀ ಎ. ವಿ. ನಾಗಸಂಪಿಗೆ, ಎಂ. ಎ.

ನ್ಯಾಯ-ವೇದಾಂತ ವಿದ್ವಾನ್

ಸಂಶೋಧಕರು, ಪ್ರಾಚ್ಯವಿದ್ಯಾ ಸಂಶೋಧನಾಲಯ

ಮೈಸೂರು ವಿ.ವಿ., ಮೈಸೂರು-5

ಪ್ರಕಾಶಕರು :

ಶ್ರೀ ಆರ್. ಎಸ್. ಬುರ್ಲಿ

ನಿವೃತ್ತ, ಸಹಾಯಕ ಕುಲಸಚಿವರು

ಕರ್ನಾಟಕ ಉಚ್ಚನ್ಯಾಯಾಲಯ, ಬೆಂಗಳೂರು

1995

ಮಧುರವಾಣಿ —ಪಂ॥ ಶ್ರೀನಿವಾಸಾಚಾರ್ಯರ ಕೆಲವು ಲೇಖನಗಳ ಸಂಗ್ರಹ
ಸಂಪಾದಕರು : ಎ. ವಿ. ನಾಗಸಂಪಿಗೆ, ಎಂ.ಎ. ಸಂಶೋಧಕರು, ಪ್ರಾಚ್ಯವಿದ್ಯಾ
ಸಂಶೋಧನಾಲಯ, ಮೈಸೂರು ವಿ.ವಿ. ಮೈಸೂರು-570 005

ಪ್ರಥಮ ಮುದ್ರಣ - 1995

ಪ್ರಕಾಶಕರು ಮತ್ತು ಪ್ರತಿ ದೊರಕುವ ಸ್ಥಳ :


ಆರ್. ಎಸ್. ಬುರ್ಲಿ
'ಭಾಗ್ಯಶ್ರೀ ನಿಲಯ', 48, ಪುಟ್ಟಣ್ಣ ರೋಡ್
ಬಸವನಗುಡಿ, ಬೆಂಗಳೂರು-560 004

ದೂರವಾಣಿ : 603205

ಬೆಲೆ: **16-00**

ಮುದ್ರಕರು :

ಚಾರಿತ್ರ ಪ್ರಿಂಟರ್ಸ್, ರಾಮಾನುಜ ರೋಡ್
2ನೇ ಅಡ್ಡರಸ್ತೆ, ಮೈಸೂರು-4



ज्ञान-वैराग्य-भक्त्यादिगुणसागराः श्रीमदुत्तरादिमठाधीशाः
श्रीमत्सत्यध्यानतीर्थस्वामिपादाः



श्रीमन्न्यायसुधाप्रवचनविचक्षणाः मेधाविमूर्धन्याः नैकप्रबन्धनिर्मातारः
श्रीमत्सत्यप्रमोदतीर्थश्रीमच्चरणाः



मधुरवाणीसंस्थापकाः 'संस्कृतसाहित्यभूषणम्'
'अभिनवबाणभट्टः' इत्याद्युपाधिभूषिताः
बुर्ली श्रीनिवासाचार्याः



श्रीमती शान्ताबाइ श्री रामाचार्य बुर्ली महोदयाः

श्रीमन्मूलराम – दिग्विजयराम – प्रसन्नविट्ठला विजयन्तेतराम्
श्रीमदानन्दतीर्थभगवत्पादाचार्या विजयन्तेतराम्
श्रीपद्मनाभादिः अस्मद्गुरुपर्यन्ता समस्तगुरुपरम्परा
विजयतेतराम्

अनुग्रहाशंसनम्

यत्पदं वेदसंवेद्यं कटाक्षेणाऽपि वीक्षितुम् ।
न क्षमन्ते विमतयः तमुपासे श्रियःपतिम् ॥

दर्भङ्गाविश्वविद्यालयप्रदत्त 'अभिनव बाणभट्ट' इत्याद्युपाधिविभूषितानां, विद्याविनयौदार्यादिसद्गुणसम्पन्नानां 'मधुरवाणी' पत्रिकाद्वारा संस्कृतसंस्कृतिप्रसारदक्षाणां, श्रीमत्सत्यध्यानतीर्थेत्यन्वर्थाभिधायुतानामस्मद्गुरुवराणां चरणारविन्दसंसेवनसमासादितामुष्मिकैश्वर्यसम्पन्नानां श्रीमतां दिवंगतानां बुर्ली श्रीनिवासाचार्याणां वैदुष्यसत्वादिगुणबृंहितलेखनप्रकाशनमवलोक्यानन्दतुन्दिला वयम् ।

एतद्ग्रन्थप्रकाशकानाम् अस्मत्प्रियशिष्याणां आर्. एस्. बुर्ली इत्येतेषां, संस्कृतसंस्कृतिसमुज्जीवनकाङ्क्षिणां सहृदयपाठकानां च इयं 'मधुरवाणी' अमृतस्राविणी भूयात् इत्यस्मदुपास्यं श्रीमध्वहृत्कमलवासिनं जानकीजानिमभ्यर्थयामहे ।

इति नारायणस्मृतयः
श्रीमदुत्तरादिमठाधीश्वराः
१००८ श्रीमत्सत्यप्रमोदतीर्थश्रीमच्चरणाः

श्रीः

‘अभिनवबाणभट्टः’ श्रीनिवासाचार्यः

श्रीमतां सदाचार-वैदुष्यसमन्वितानां बुर्ली वासुदेवाचार्याणां पुत्रवराः श्री बुर्ली श्रीनिवासाचार्याः। नास्मिन् कुले कश्चन कृपणः कापथोऽविद्वान् सञ्जातः। प्रायः सर्वेऽप्यत्र सन्तो महान्तो विद्या-विनयादिसम्पन्नाः सत्कर्मानुष्ठाननिरता विरेजुः।

विद्याभ्यासः

कलभाषण एवायं सूरिपोतः अनवद्यपद्यगद्यरचनापटुरासीदित्यतिरोहितं समकालिकविदुषाम्। न्यायवेदान्तशास्त्रविचक्षणाः गजेन्द्रगडबाळाचार्याः सतारग्रामीयास्तेजस्विनममुं वामनं समत्रलोक्य स्वीयकलासमर्पणाय पात्रभूतोऽयमित्यवधार्य सर्वविद्या उपदिदिशुः। ततोऽचिराद्, श्रीमदुत्तरादिमठाधीशानां पीठाधिपतीनामपि षट्शास्त्रपाठकानां वैराग्यौदार्यादिगुणगणमण्डितानां श्रीमत्सत्यध्यानतीर्थस्वामिपादानां सविधेऽधिगतवेदान्ता गार्हस्थ्यधर्ममन्वतिष्ठन् श्रीनिवासाचार्याः।

विद्वद्गोष्ठीसमायोजनम्

विनयादिसद्गुणसमलङ्कृतानाममीषां समीपे विनेया अपि बहवः समागत्य काव्य-व्याकरण-शास्त्राध्ययनमकार्षुः। पण्डितप्रकाण्डानां जन्मभूमौ ‘बागलकोट’ इत्यभिधग्रामे प्रतिवत्सरमाश्विनमासे ज्ञानसंस्कृतिप्रसाराय विद्वद्गोष्ठीमायोजितवन्तः। तत्र किल दिगन्तविश्रान्तकीर्तयः पं० मळगि वेदव्यासाचार्याः गलगलि कूर्माचार्याः गलगलि रामाचार्याः नागसम्पगि कृष्णाचार्यप्रभृतयोऽनेके विद्वांसश्च समुपस्थिताः स्वीयपाण्डित्य-प्रतिभापूर्णप्रवचनादिभिः पण्डितपामरानारञ्जितवन्तः।

मधुरवाणीजन्म

१९३२ तमे क्रैस्तवर्षेऽमी महान्तः बागलकोटग्रामं परित्यज्य बेळगावीग्रामे उषित्वा पं० गलगलि रामाचार्याणामविस्मरणीयसहकारेण ‘मधुरवाणी’ नाम्नीं संस्कृतपत्रिकां संस्कृतसंस्कृतिप्रचाराय आरब्धवन्तः। पत्रिकेयं पण्डितवरेण्यानां प्रौढविद्यार्थिनां च लेखनैः, प्रतिभास्फोरक-

समस्यापूर्तिश्लोकैः अप्रकटितापूर्वग्रन्थगतप्रमेयप्रकाशनैः, शुशुभे। अपि च समाजगतविविधविकृतिसंज्ञापनमुखेन जीवनादर्शं विज्ञापयन्ती सरलसुन्दर-शैल्या मन्दनन्दिनी प्राज्ञजनमनोरञ्जनो च भूत्वा आसेतोः आ च तुषाराद्रेः रेजे।

एवमेव संस्कृतभाषया व्यवहर्तुकामानां आबालवृद्धानामुपकृतये 'गीर्वाणवाग्वर्धिनीं सभां' निर्माय बेळगाम्, पुणे-गदग-इत्योदिनगरेषु बुभुत्सूनां समेषां संस्कृतभाषाप्रेम्णैव केवलं भाषां बोधितवन्तः श्रीनिवासाचार्याः।

महतामेतेषामौदार्य-संस्कृतसंस्कृतिसमुज्जीवनदीक्षां विद्वज्जनदुर्लभ-गुणग्रहणदक्षतां तन्त्रान्तरप्रवर्तकाचार्यपरम्परादिषु विद्यमानपूज्यताप्रकर्षादिकं चानुभूय, तेषु सौहार्दातिशयेन स्वात्मनमेव समर्प्य धन्यंम्मन्या बहवोऽभूवन् विद्वन्मान्याः।

तेषु च प्रथिताः— श्रीमती क्षमादेवी, एन्. सि. केलकर, प्रो० के. एन्. वाटवे, पुरुषोत्तमशास्त्रि रानडे, गणेशशास्त्रि सिन्धे, पि. वि. काणे प्रभृतयः। सुप्रसिद्धा न्यायाधीशा एन्. एस्. लोकूरु बावडेकर प्रभृतय श्रीनिवासाचार्याणां सर्वदाऽपि प्रोत्साहकाः मार्गदर्शकाः पोषकाश्चासन्। श्रीनिवासाचार्याणामपूर्वगुणाकर्षिताः मेधाविमूर्धन्याः बि. एन्. दातार्, के. एम्. मुन्शि, पि. एम्. लोड्, सि. डि. देशमुख प्रभृतयः तदीय संस्कृत-प्रसारकार्यं समुचितसत्कारादिना समभ्यनन्दन्त। बेळगां नगरेप्यभूतपूर्वः सम्मानकार्यक्रमः श्रीनिवासाचार्याणामभिनन्दनार्थमायोजितः विद्वद्भिः।

'अभिनवबाणभट्टः' इत्युपाधिदानम्

श्रीनिवासाचार्याणा कर्तृत्वशक्ति सरल-सुन्दरगद्यपद्यनिर्माणचातुरीं च समवलोक्यानन्दतुन्दिला दर्भङ्गाविश्वविद्यालयविद्वत्परिषत्, एतेषाम् 'अभिनवबाणभट्ट' इत्यन्वर्थोपाधिप्रदानेन स्वस्य महत्तां विद्वत्प्रियतां च दिगन्तविश्रान्तामकरोत्। १९४७ तमे क्रैस्तवर्षे मेलुकोटेग्रामे प्रवर्तिताखिलभारतसंस्कृतसाहित्यविद्वत्सदसि सर्वादिवादमध्यक्षपदवीप्रदानेन सर्वे विद्वांसः बुर्ली श्रीनिवासाचार्येषु आदरातिशयं प्रकटितवन्त इति वार्ताश्रवणमप्यानन्दोद्रेकं जनयति संस्कृतप्रेमिणाम्।

बुर्ली श्रीनिवासाचार्याणामसाधारणव्यक्तित्वम्

द्वादशवत्सरपर्यन्तं मधुरवाण्यास्सम्पादनकर्मणि व्यापृताः हृद्यगद्य-पद्यनिर्माणचतुराः मेधाविमूर्धन्याः श्री गलगलि रामाचार्याः बुर्ली श्रीनिवा-साचार्याणां गुणगणाकर्षिता तदीयां कीर्तिं शासनबद्धामकुर्वन् —

'विरलाः किल तादृशो महात्मानः .... परिणतप्रणयेन।

(पश्यत रामाचार्याणां 'दारुणो वज्राघातः' इति लेखनम् । प. ७८-८१)

प्रकृतप्रकाशनमधिकृत्य

इदानीं, 'मधुरवाणी' श्रीनिवासाचार्याणां कतिपय लेखप्रबन्ध-समलङ्कृता तदीयपुत्रवराणां श्री रामाचार्य बुर्ली (आर्. एस्. बुर्ली) इत्येतेषां तथा तदीय सहोदराणां सहोदरीणां च पितृभक्त्या संमुद्राप्य सहृ-दयकरकमलेषु समर्पिता। शुद्धा अनुकरणीया चेयं पितृभक्तिः सर्वादर्श-भूतेत्यतिरोहितं विदुषाम् ।

स्वीयानुग्रहसन्देशप्रदानेन अस्मासु वात्सल्यातिशयं प्रकटितवतां-परमहंसपरिव्राजकाचार्यवर्याणां श्रीमदुत्तरादिमठाधीशानां विद्वद्वरानुग्राह-काणां श्रीमत्सत्यप्रमोदतीर्थानां पादसन्निधौ प्रणतिततिसमर्पणपुरस्सरं कार्तज्ञ्यं व्याहरामः ।

तथैव प्रयत्नमिमं, प्रोत्साहितवतां बेंगळूरुविश्वविद्यानिलयसंस्कृत-विभागीयनिवृत्तप्राध्यापकानां पाठ-प्रवचन-संशोधन-अप्रकटितग्रन्थप्रकट-नादिना च विदेशेष्वपि विख्यातानां पण्डितप्रवराणां श्रीमतां के. टि. पाण्डु-रङ्गिमहाभागानामपि प्रणतिपुरस्सरं कार्तज्ञ्यमर्पयामः ।

सहृदयाः संस्कृतसंस्कृतिप्रेमिणो भवन्तः, मधुरवाणीमिमां मनसि वदनारविन्दे च संस्थाप्यास्माननुगृह्णन्तु इति सादरं सम्प्रार्थयाम ।

भवदीयः

आ. वि. नागसम्पिगे

न्याय-वेदान्तविद्वान्

संशोधकः, प्राच्यविद्यासंशोधनालयः मैसूरु वि.वि. मैसूरु

FOREWORD

I very much liked to write this foreword in Sanskrit. However, with a view to make the services of Sri Burli Srinivasa-charya to the cause of Sanskrit known to a wider circle, I am writing this foreword in English. Those who can read and write Sanskrit fluently can asses the services of Sri Srinivasacharya from the very essays included in this volume.

I have been associated with the Sanskrit Journal Madhura vani since the very first year i.e., 1935 when it was started by Sri Galagali Ramacharya and Sri Burli Srinivasacharya jointly at Belgaum, an educational and cultural centre in Karnataka. At that time, I was a student at the Veda Sāstrottejaka Mahāpātha-sālā, Sangli. In this journal Samasya purti was an important item. I used to contribute to this section regularly from Sangli and even after I moved to Mysore and Chidambaram later. Sri Galagali Ramacharya and Burli Srinivasacharya used to encourage young students to write in Madhuravani and I was one such student who was receiving encouragement from them. In 1968 I organised a Sanskrit Poets' Conference at Bangalore in honour of Sri Ramacharya. On that occasion, I edited a few poems of Sri Ramacharya and published them under the title 'Madhuralapa' that gave me an apportunity to pay my homage to Ramacharya. Now; this volume has given me an opportunity to pay my homage to Srinivasacharya.

Sri Burli Srinivasacharya was born in 1892 at Bagalkot. He studied Kāvya, Vyākaraṇa and Vedānta under the great scholar Sri Balacharya Gajendragad, the father of Justice P. B. Gajendragadkar at Satara in Maharastra. He settled down in Bagalkot until 1934 and then moved to Belgaum. He managed to get Sri Galagali Ramacharya also from Galgali to Belgaum and both of them started the Sanskrit monthly journal Madhura vāṇi from Belgaum.

Before these two lovers of Sanskrit started Madhuravani they were contributing Poems and articles to three other Sanskrit journals publishhed at that time viz., 'Sahridaya', 'Udyānapatrikā and Sanskrit Chandrikā. They were Particularly impressed, by the Style and texture of Sanskrit Language of Sanskrit a chandrikā published from Kolhapur. The Editor of that journal Sri Appaśāstry Rasvadekar had evolved a charming and majestic Sanskrit style. Many young Sanskrit scholars of those days were fascinated by this style. Sri Rama. charya and Srinivasacharya were two such scholars. When that Journal was discontinued, these two scholars founded Madhura-vani to fill the gap. Sri Ramacharya was primarily a poet and a writer while Srinivasacharya was a good organiser. The combina-tion of these not only made Madhuravani a good and popular journal but also gave a fillip to the organisation of Sanskrit literary conferences and starting Sanskrit Forums. Girvāṇa Vagvardhini Sabhās were set up at Belgaum, Pune, Gadag and many other places. Three Sanskrit Sahitya Sammelanas were organised at Belgaum, Bijapur and Melkote. I named the Poets' Conference organised to honour Sri Ramacharya at Bangalore in 1968 as Fourth Conference and the next conference organised by me at Bangalore in 1974 as Fifth Conference. This chain of conferences is now continuing under the auspices of Karnataka Sanskrit Sahitya Parishat headed by by Sri Veerendra Heggade of Dharmasthala.

The first three conferences were the results of Sri Burli Srinivasacharya's efforts. For these conferences and for Madhuravani he used to elicit the co-operation of many distinguished persons. Prominent among these were Smt. Kshama Rao, Sri N. C, Kelkar, Prof K. N. Watave, Purushottama Shastry Ranade, Ganesha Shastry Shinde and many other Scho-lars of Poona and Bombay. These Scholars wholeheartedly supported Madhuravāni and personally participated in the Conferences. The local distinguished persons like B. N. Datar, M. P. Wali stood behind the efforts of Sri Burli Srinivasacharya. Top personalities like K. M. Munshi, Justice

N. S. Lokur, Justice P. M. Lod also supported these Sanskrit activities.

More than the support of the high personalities, the field work done by Sri Burli Srinivasacharya laid a good foundation for Madhuravāṇi and the other Sanskrit activities. He toured all over Karnataka and Maharastra, and enrolled hundreds of subscribers. He corresponded from Kashmir to Kerala and enlisted the support of all Sanskrit lovers. If one opens an issue of Madhuravāṇi, one will find that poems and articles of the poets and the Scholars of all parts of India are found in it.

Sri Burli Srinivasacharya himself was a fine prose writer. He was honoured with the title 'Abhinava Banabhatta'. The fine Sanskrit essays composed by Srinivasacharya were published in Madhuravani from time to time and are scattered over many issues of the journal. It was necessary to put them together in a bookform. The present volume is an attempt in this regard. This volume contains sixteen essays.Among these essay on Subhaschandra Bose is the longest. Burli Srinivasacharya was not only a poet but also a patriot, a social thinker, and a philosophor. He was sensitive to current social and political problems. He did not disapprove the social change or social reform but wanted the over zealous social reformists to be cautious, These sixteen essays reveal his socio-political thought. These are written in excellent Sanskrit prose style. From these essays two points become very clear. 1) Modern thought can be lucidly expressed in the Sanskrit language. 2) Sanskrit prose can be written in a charming and simple style. From these essays one can derive the joy of poetry and wisdom of socio-political thought. The essay on Subhasha Chandra Bose gives a detailed account of his political career and political struggle to win the freedom for India. His patriotism, his free spirit and his ability of political and military organisation are graphically brought out in this essay. It is a good and reliable historical document. The years of various stages of his political struggle are authentically mentioned. It is interesting to note that

Subhash Chandra Bose had declared 26th January as the day of Independence in 1941 itself. The information for this article has been gathered by the author of this essay from an article that ap peared in Kesari of 22nd October, 1946.

In another essay the personality and the work of Karapatra Maharaja is depicted. His struggle to preserve the Sanatana Dharma is brought out. Two essays are on the poetic compositions of two Sanskrit Poetesses viz., Tirumalāmbā and Gangādevi The poetic charm and the historical importance of the two literary works viz., Varadāmbika Parinaya and Madhurā Vijaya are highlighted in these two essays. Two essays, one on Akhyāti and the other on 'Hareh Anucharāh' are philosophical essays. The essays 'Hemalatā' and 'Padma Mohana Praṇayaḥ' deal with the social problems of poverty and the sufferings on account of political upheaval. In both the instances the help rendered by the large-hearted persons is well brought out. This is the Indian way of handling social problems. Social problems are not solved by the confrontation but solved by co-operation. This is well depicted in these two essays.

There is an interesting article on the Mogal Emperor Aurangajeb. The prio.ity given by him to duty over love is depicted It is interesting that a Sanskrit writer writes on Aurangajeb and brings out a noble aspect of his nature.

Lastly, the last letter written by Burli Srinivasacharya from his death bed to the sub-editor Sri Pandharinathacharya Galagali, graphically brings out his sincerity, devotion, hard work and the deep love he had for Madhuravāṇi. He has a sense of fulfilment and is prepared to die happily. At the same time, he has an anxiety for the future of Madhuravani and appeals to the sub-editor to look after Madhuravani with the same devotion. His declaration that he would like to serve Madhuravāṇi even in the next birth even by carrying the journal as a Postman and holding it as a Post box moves the heart of everyone.

The writings of such a devoted scholar are a part of thei national heritage. These must be preserved for the posterity. Therefore, I congratulate the young scholar Sri Anandatirtha charya Naga Sampige for editing and Sri R. S. Burli the eldes son of Srinivasacharya for publishing the essays of Sri Burlt Srinivasacharya and giving me this opportunity of paying my homage to a great Scholar who encouraged me to write in Sanskrit, when I was a student.

Prof. K. T. PANDURANGI
Upakulapathi, Poornaprajna Vidyapeetha
Formerly Professor of Sanskrit, Bangalore University

ಶ್ರೀ:

'ಅಭಿನವ ಬಾಣಭಟ್ಟ'

ದಿ|| ಪಂ. ಶ್ರೀ ಬುರ್ಲಿ ಶ್ರೀನಿವಾಸಾಚಾರ್ಯರು

ಬಾಲ್ಯ ವಿದ್ಯಾಭ್ಯಾಸ

ಪಂ. ವಾಸುದೇವಾಚಾರ್ಯ ಬುರ್ಲಿಯವರ ಮಕ್ಕಳು ಶ್ರೀ ಶ್ರೀನಿವಾಸಾಚಾರ್ಯರು. ಈ ಮನೆತನ, ವೇದ-ವೇದಾಂತಾಭ್ಯಾಸ-ಪಾಠಪ್ರವಚನ, ಕರ್ಮಠ ಜೀವನಕ್ಕೆ ಹೆಸರಾಂತವಾಗಿದ್ದಿತು. ಕೇವಲ ಪರಮಾತ್ಮನ ಕೃಪೆಗಾಗಿ ಈ ಮನೆತನದವರು ಮಾಡಿದ ವಿದ್ಯಾದಾನ ಮತ್ತು ಅನ್ನದಾನಗಳು ಆದರ್ಶವಾದವುಗಳು ಹಾಗೂ ಅನುಕರಣೀಯವಾದವು.

ಇವರು ಪಂಡಿತವರೇಣ್ಯರೆಂದು ಮತತ್ರಯ ವಿದ್ವಾಂಸರಿಂದ ಮಾನ್ಯತೆ ಪಡೆದ, ಮಹಾಧೀಮಂತರು, ಪ್ರತಿಭಾಶಾಲಿಗಳು, ನಿರಂತರ ಪ್ರಯತ್ನಶೀಲರು. ಸಜ್ಜನವರ್ಗಕ್ಕೆ ಉಪಯುಕ್ತವಾದ ಸತ್ಕರ್ಮಗಳಲ್ಲಿ ತಮ್ಮನ್ನು ಸಮರ್ಪಿಸಿಕೊಂಡ ತ್ಯಾಗಮಯ ಜೀವನ ನಡೆಸಿದವರು.

ಇವರು ತಮ್ಮ ಸಂಸ್ಕೃತ-ಸಾಹಿತ್ಯಶಾಸ್ತ್ರದ ಅಧ್ಯಯನವನ್ನು ಸತಾರಾದಲ್ಲಿ ಮಹಾವಿದ್ವಾಂಸರೆಂದು ವಿಖ್ಯಾತರಾದ ಬಾಳಾಚಾರ್ಯ ಗಜೇಂದ್ರಗಡಕರ ಅವರಲ್ಲಿ ನಡೆಸಿದರು. ಇವರ ಪ್ರಯತ್ನಶೀಲತೆ, ಸಂತತಾಧ್ಯಯನ, ಪ್ರತಿಭೆ, ಹರಿಗುರುನಿಷ್ಠೆಗಳಿಂದ ಸಂತಸಗೊಂಡ ಬಾಳಾಚಾರ್ಯರು ಸಕಲಶಾಸ್ತ್ರಗಳನ್ನೂ ಉಪದೇಶಿಸಿ ತುಂಬುಹೃದಯದಿಂದ ಆಶೀರ್ವದಿಸಿದರು.

ಮಹಾಮಹಿಮರೂ, ಅನೇಕ ಮಠಾಧಿಪತಿಗಳನ್ನು ಶ್ರೇಷ್ಠ ದಿಗ್ದಂತಿ ಪಂಡಿತರನ್ನಾಗಿಸಿದ ಷಡ್‌ದರ್ಶನಾಚಾರ್ಯರೂ, ಪಂಡಿತಪಡೆಯ ನಿರ್ಮಾತೃಗಳೂ ಉದಾರದಾನಿಗಳೂ ಆದ ಶ್ರೀಮದುತ್ತರಾದಿಮಠದ ಶಕಪುರುಷರೆನಿಸಿದ್ದ ಶ್ರೀ ಶ್ರೀ ಸತ್ಯಧ್ಯಾನತೀರ್ಥರಲ್ಲೂ ಸ್ವಲ್ಪಕಾಲ ವೇದಾಂತಶಾಸ್ತ್ರವನ್ನು ಆಳವಾಗಿ ಅಭ್ಯಸಿಸಿ ಅವರ ಅನುಗ್ರಹವನ್ನು ಸಂಪಾದಿಸಿದರು.

ಶ್ರೀನಿವಾಸಾಚಾರ್ಯರ ವ್ಯಕ್ತಿತ್ವ

ಕಿರಿಯ ವಯಸ್ಸಿನಲ್ಲೇ ಹಿರಿಯ ಪಾಂಡಿತ್ಯ ಸಂಪಾದಿಸಿದ ಈ ಮಹಾನುಭಾವರು, ವಿನಯಾದಿ ಸದ್ಗುಣ ಮತ್ತು ಚಾರಿತ್ರ್ಯ ಸಂಪನ್ನರಾಗಿ ಬಾಗಲಕೋಟೆಯಲ್ಲಿ ಶಾಸ್ತ್ರಪಾಠ, ಪುರಾಣ ಪ್ರವಚನ ಅನ್ನದಾನ ಮುಂತಾದ ಮಹೋನ್ನತಕಾರ್ಯ

ಗಳಲ್ಲಿ ತಮ್ಮನ್ನು ತೊಡಗಿಸಿಕೊಂಡರು. ಇವರ ಸರಳತೆ-ವತ್ಸಲತೆ ಸಹನಶೀಲತೆ, ಔದಾರ್ಯಗಳು ವರ್ಣನಾತೀತ. ಬಾಗಲಕೋಟೆಯಲ್ಲಿ ಪ್ರತಿವರ್ಷ ನವರಾತ್ರಿ ಪ್ರತಿ-ಪತ್ ದಿನದಿಂದ ವಿಜಯದಶಮಿಯವರೆಗೆ ಕೊತ್ತಲೇಶನಗುಡಿಯಲ್ಲಿ (ಆಂಜನೇಯ-ಸ್ವಾಮಿ ದೇವಸ್ಥಾನದಲ್ಲಿ) ಜ್ಞಾನಸತ್ರನನ್ನು ನಡೆಸುತ್ತಿದ್ದರು. ಪಂ॥ ಮಳಗೀ ವೇದ ವ್ಯಾಸಾಚಾರ್ಯರು, ಪಂ॥ ಗಲಗಲಿ ಕೂರ್ಮಾಚಾರ್ಯರು, ಪಂ॥ ಗಲಗಲಿ ರಾಮಾ ಚಾರ್ಯರು, ಪಂ॥ ನಾಗಸಂಪಗಿ ಕೃಷ್ಣಾಚಾರ್ಯರು, ಪಂ॥ ಮನಗೂಳಿ ರಾಮಾ ಚಾರ್ಯರೇ ಮೊದಲಾದ ಹಿರಿಯ ವಿದ್ವಾಂಸರು ಈ ಜ್ಞಾನಸತ್ರದಲ್ಲಿ ಭಾಗವಹಿಸಿ ತಮ್ಮ ಶಾಸ್ತ್ರೀಯ ಪ್ರವಚನಗಳಿಂದ ಜನಸಮುದಾಯವನ್ನು ತಣಿಸುತ್ತಿದ್ದರು.

ಮಧುರವಾಣಿ ಸಂಸ್ಕೃತ ಪತ್ರಿಕೆಯ ಸಂಸ್ಥಾಪನೆ

1932ರಲ್ಲಿ ಪಂ॥ಶ್ರೀನಿವಾಸಾಚಾರ್ಯರು ಬಾಗಲಕೋಟೆಯನ್ನು ಬಿಟ್ಟು ಬೆಳ-ಗಾವಿಗೆ ತೆರಳಿ ಅಲ್ಲಿ ಪಂಡಿತವರ್ಯರಾದ ಗಲಗಲಿ ರಾಮಾಚಾರ್ಯರ ಸಹಕಾರದೊಂ-ದಿಗೆ 'ಮಧುರವಾಣಿ' ಸಂಸ್ಕೃತ ಪತ್ರಿಕೆಯನ್ನು ಪ್ರಾರಂಭಿಸಿದರು. ಸಂಸ್ಕೃತದ ವಿವಿಧ ಗ್ರಂಥಗಳ ಪರಿಚಯ, ಪ್ರಸಕ್ತ ಸಮಾಜದ ಓರೆ-ಕೋರೆಗಳನ್ನು ತಿದ್ದುವುದು, ಅಪ್ರಕ-ಟಿತ ಗ್ರಂಥಗಳ ಪರಿಚಯ, ಸರಳ ಸುಂದರಭಾಷೆಯಲ್ಲಿ ಸಾಮಾಜಿಕ ಕಥೆಗಳು, ಆದರ್ಶ ರಾಜಕೀಯ ವ್ಯಕ್ತಿಗಳ ಪರಿಚಯ ಮೊದಲಾದ ಅನೇಕ ವಿಷಯಗಳಿಂದ ಕೂಡಿದ ಈ ಸಂಸ್ಕೃತ ಮಾಸಪತ್ರಿಕೆಯು ಕೆಲವೇ ತಿಂಗಳಲ್ಲಿ ಅಪಾರ ಜನಪ್ರಿಯತೆ ಯನ್ನು ಪಡೆಯಿತು.

ಇದಲ್ಲದೇ ಪುಟ್ಟಮಕ್ಕಳಿಗೆ ಉಚಿತವಾಗಿ ಸಂಸ್ಕೃತವನ್ನು ಕಲಿಸಲು 'ಕಿಶೋರ-ವಾಟಿಕಾ'ಗಳನ್ನು ಸ್ಥಾಪಿಸಿದರು. ಸರಳವಾಗಿ ಶುದ್ಧ ಸಂಸ್ಕೃತದ ನಿರೂಪಣೆಯನ್ನು ಕಲಿಸಿಕೊಟ್ಟರು. ಇವರ ಸಾಮಾಜಿಕ ಸೇವೆಗಳಲ್ಲಿ ಶ್ರೀಮತಿ ಕ್ಷಮಾದೇವಿ ರಾವ್ ಎನ್ನುವವರು ಮುಂಬೈ ನಗರದಿಂದ ತಮ್ಮಿಂದ ಸಾಧ್ಯವಿದ್ದ ಧನ ಸಹಾಯ ಮಾಡು-ತ್ತಿದ್ದರು.

ಅಭಿನವ ಬಾಣಭಟ್ಟ

ಇವರ ಸಂಸ್ಕೃತ ಸೇವೆ - ಶಾಸ್ತ್ರಪಾಂಡಿತ್ಯ – ಸದಾಚಾರಗಳನ್ನು ಗಮನಿಸಿದ ದರ್ಭಂಗಾ ವಿಶ್ವವಿದ್ಯಾನಿಲಯವು ಇವರಿಗೆ 'ಅಭಿನವಬಾಣಭಟ್ಟ' ಎಂಬ ಬಿರುದು ನೀಡಿ ಗೌರವಿಸಿತು. 1947ರಲ್ಲಿ ಮೋಲುಕೋಟೆಯಲ್ಲಿ ನಡೆದ ಸಂಸ್ಕೃತಸಾಹಿತ್ಯ ಸಮ್ಮೇಲದ ಅಧ್ಯಕ್ಷತೆಯನ್ನು ವಿದ್ವತ್‌ಸಮುದಾಯ ಪಂ॥ ಬುರ್ಲಿ ಶ್ರೀನಿವಾಸಚಾರ್ಯ-ರಿಗೆ ನೀಡಿ ಇವರ ವ್ಯಕ್ತಿತ್ವ-ಸೇವೆಗಳನ್ನು ಕೃತಜ್ಞತೆಯಿಂದ ಸ್ಮರಿಸಿತು.

ಬೆಳಗಾವಿ ಗ್ರಾಮದೇವತಗಲ್ಲಿಯ ರಾಮದೇವರ ಗುಡಿಯ ಪಕ್ಕದ ಕಟ್ಟಡದಲ್ಲಿದ್ದ

ಇವರ ಮಧುರವಾಣಿ ಕಾರ್ಯಾಲಯ. ಪಂಡಿತರ, ಸಂಸ್ಕೃತ ಪ್ರೇಮಿಗಳ ಕ್ರೀಡಾ ಕೇಂದ್ರವಾಗಿದ್ದಿತು. ದೇವಸ್ಥಾನಗಳಿಗೆ ಭೇಟಿ ನೀಡಿದಂತೆ, ಇಲ್ಲಿ ವಿವಿಧ ಪಟ್ಟಣಗಳ ಅಧಿಕಾರಿಗಳು ಹಾಗೂ ಬುದ್ಧಿಜೀವಿಗಳು ಆಗಮಿಸುತ್ತಿದ್ದರು. ಶ್ರೀನಿವಾಸಾಚಾರ್ಯರ ಕಾರ್ಯನೈಪುಣ್ಯವನ್ನು ಕಂಡು ತುಂಬುಹೃದಯದಿಂದ ಅಭಿನಂದಿಸುತ್ತಿದ್ದರು.

ಅಂದಿನ ವಿತ್ತಸಚಿವರಾಗಿದ್ದ ಶ್ರೀ ಸಿ. ಡಿ. ದೇಶಮುಖ್ ಹಾಗೂ ಶ್ರೀ ನರಸಿಂಹ ರಾವ್ ಚಿಂತಾಮಣಿ ಕೇಳಕರ್, ಶ್ರೀಮತಿ ಕ್ಷಮಾದೇವಿ ಮುಂಬೈ, ಮಹಾಮಹೋಪಾಧ್ಯಾಯ ಪಂಡಿತವರೇಣ್ಯ ಶ್ರೀ ಪಿ. ವಿ. ಕಾಣೆ, ನ್ಯಾಯಮೂರ್ತಿ ಎನ್. ಎಸ್. ಲೋಕೂರ್, ನ್ಯಾಯಮೂರ್ತಿ ಶ್ರೀ ಬಾವಡೇಕರ್ ಮುಂತಾದ ಸಂಸ್ಕೃತ ಪ್ರೇಮಿಗಳು ಇವರನ್ನು ಭೇಟಿ ಮಾಡಿ ಇವರ ಸೇವೆ, ತ್ಯಾಗ, ಕಾರ್ಯನೈಪುಣ್ಯಗಳನ್ನು ತುಂಬು ಹೃದಯದಿಂದ ಕೊಂಡಾಡಿ ಅಭಿನಂದಿಸಿದ್ದರು. ಹೈಕೋರ್ಟ್ ನ್ಯಾಯಾಧೀಶರಾದ ಆರ್. ಎಸ್. ಬಾವಡೇಕರ್ ಅವರ ಅಧ್ಯಕ್ಷತೆಯಲ್ಲಿ ಬೆಳಗಾವಿಯ ಮಹಾಜನತೆ ಪಂ|| ಶ್ರೀನಿವಾಸಾಚಾರ್ಯರನ್ನು ಪರಮಾದರದಿಂದ ಸನ್ಮಾನಿಸಿತು.

ಶಾಸ್ತ್ರಪಾಂಡಿತ್ಯ – ಲೇಖನಗಳ ಶೈಲಿ

ಇವರ ಲೇಖನಗಳ ಶೈಲಿ ತುಂಬ ಸರಳ–ಸುಂದರ. ಕೆಲವೆಡೆ ಪ್ರಸಂಗಕ್ಕೆ ತಕ್ಕಂತೆ ದೀರ್ಘವಾದ ವಾಕ್ಯರಚನೆಗಳಿದ್ದರೂ ಪದಬಂಧಗಳ ಮಾಧುರ್ಯ ವರ್ಣನಾತೀತ. ಇವರ ಕರ್ತೃತ್ವಶಕ್ತಿ – ಮಹಾಪ್ರಯತ್ನಗಳಿಂದ ಆಕರ್ಷಕ ವಿಷಯಗಳನ್ನೊಳಗೊಂಡ ಈ ಪತ್ರಿಕೆ ಎಲ್ಲ ವರ್ಗದ ಜನತೆಯನ್ನು ತಣಿಸುತ್ತಿದ್ದಿತು. ಇವರಿಗೆ ಪಂಡಿತವರ್ಯರೂ, ದರ್ಭಂಗಾ ವಿಶ್ವವಿದ್ಯಾಲಯದಿಂದ 'ಅಭಿನವ ಕಾಲಿದಾಸ'ನೆಂದು ಸನ್ಮಾನಿತರೂ ಆದ ಪಂ|| ರಾಮಾಚಾರ್ಯ ಗಲಗಲಿಯವರು ನೀಡುತ್ತಿದ್ದ ಸಹಕಾರ ಅವಿಸ್ಮರಣೀಯ. 12 ವರ್ಷಗಳ ಕಾಲ ಪಂ|| ಶ್ರೀನಿವಾಸಾಚಾರ್ಯರು ಅತ್ಯುತ್ತಮ ರೀತಿಯಿಂದ ಪತ್ರಿಕೆಯನ್ನು ನಡೆಸಿದರು. ಪಂ|| ಗಲಗಲಿ ರಾಮಾಚಾರ್ಯರು, ಪಂ|| ಬುರ್ಲಿ ಶ್ರೀನಿವಾಸಾಚಾರ್ಯರ ಬಗ್ಗೆ ಬರೆದ ಸಾಲುಗಳು ಮನನೀಯವಾಗಿವೆ —

"ಸ್ವಾರ್ಥ-ಮಾನ-ಅವಮಾನಗಳನ್ನು ಲೆಕ್ಕಿಸದೇ ದೇವವಾಣಿಯಾದ ಸಂಸ್ಕೃತದ ಮೇಲಿನ ಪ್ರೀತಿಯಿಂದ ಅದರ ಪ್ರಚಾರ ಕಾರ್ಯಕ್ಕೇ ತಮ್ಮನ್ನು ಸಮರ್ಪಿಸಿಕೊಂಡಂತಹ ದಿ|| ಶ್ರೀನಿವಾಸಾಚಾರ್ಯರಂತಹ ಮಹನೀಯರು ಅತಿ ವಿರಳ. ಅವರು ವಿದ್ಯಾಧನ ಸಂಪನ್ನರಾಗಿದ್ದರೇ ಹೊರತು, ಲೌಕಿಕದ್ರವ್ಯಸಂಪನ್ನರಾಗಿರಲಿಲ್ಲ. ಧನಾನುಕೂಲ್ಯ-ಜನ ಸಹಾಯ – ಕುಟುಂಬಪೋಷಣೋಪಯೋಗಿಯಾದ ದ್ರವ್ಯಸಂಪತ್ತಿ ಇಲ್ಲದಿದ್ದರೂ ದಾರಿದ್ರ್ಯ ಮತ್ತು ನಿರುತ್ಸಾಹಜನಕ ಪರಿಸ್ಥಿತಿಯಲ್ಲೂ ಕೇವಲ ಸಂಸ್ಕೃತಪ್ರೇಮದಿಂದ, ಸಂಸ್ಕೃತದ ಅಭಿವೃದ್ಧಿ,ಭಾಷಾಪ್ರಚಾರ ಮಾಧ್ಯಮವಾದ ಪತ್ರಿಕೆಯಿಂದಲೇ ಸಾಧ್ಯವೆಂಬ ನಂಬಿಕೆಯೊಂದಿಗೆ, ಈ ಪತ್ರಿಕೆಯನ್ನು ಹುಟ್ಟು ಹಾಕಿದರು. ಇದರ ಸಮುನ್ನತಿಗಾಗಿ

ಅವರು ಅಲೆಯದ ಸ್ಥಳವಿಲ್ಲ, ಪಡದ ಪಾಡಿಲ್ಲ, ಅನುಭವಿಸದ ಅವಮಾನವಿಲ್ಲ. ಹಸಿವು-ನೀರಡಿಕೆ-ನಿದ್ರೆಗಳನ್ನು ತೊರೆದು ತ್ಯಾಗಮಯವಾದ ಆರ್ಷ ಬದುಕಿನಿಂದ, ಇದೆಲ್ಲ ಸಂಕಟಸಮುದಾಯವನ್ನು ಕೇವಲ ಸಂಸ್ಕೃತ-ಸಂಸ್ಕೃತಿಯ ಅಭ್ಯುದಯಕ್ಕಾಗಿ ಸಹಿಸಿದರು. ಇಂದು ಕಾಣಬರುವ ದೇಶ-ವಿದೇಶಗಳಲ್ಲಿನ ಮಧುರವಾಣಿಯ ವಿಖ್ಯಾತಿ, ಅವರ ಭಗೀರಥ ಪ್ರಯತ್ನದಿಂದ ಸಂಪಾದಿತವಾದುದು. ಪಾಂಡಿತ್ಯ ಪ್ರತಿಭಾಪೂರ್ಣ-ವಾದ ತಮ್ಮ ಲೇಖನಗಳಿಂದ, ಇತರ ವಿದ್ವಾಂಸರ ಸಹಕಾರದಿಂದ ಸಂಸ್ಕೃತ ಪತ್ರಿಕಾ-ಪ್ರಪಂಚದಲ್ಲಿ ಇಂದು 'ಮಧುರವಾಣಿ'ಗೆ ದೊರಕಿದ ಅಗ್ರಪೂಜೆಯಲ್ಲಿ ಶ್ರೀನಿವಾಸಾ-ಚಾರ್ಯರ ಕೊಡುಗೆ ಅಪಾರ ಮತ್ತು ಅವರ್ಣನೀಯ. (ಪಂ|| ಗಲಗಲಿ ರಾಮಾ-ಚಾರ್ಯರ 'ದಾರುಣೋ ವಜ್ರಾಘಾತಃ' ಎಂಬ ಸಂಸ್ಕೃತ ಲೇಖನದಿಂದ ಉದ್ಧೃತ. ಇದೇ ಹೊತ್ತಿಗೆಯ 78-81 ರ ವರೆಗಿನ ಪುಟಗಳನ್ನು ನೋಡಿ:)

ಈ ಹೊತ್ತಿಗೆಯ ಬಗ್ಗೆ

ಗಲಗಲಿ ರಾಮಾಚಾರ್ಯರಂತಹ ಅನೇಕ ಪಂಡಿತವರೇಣ್ಯರು ಶ್ರೀ ಶ್ರೀನಿವಾಸಾಚಾರ್ಯರನ್ನು ಕೊಂಡಾಡಿದ ಕೀರ್ತಿಗಾಥೆಯನ್ನೂ ಸಂಪೂರ್ಣ ದಾಖಲಿಸಲು ಸಾಧ್ಯವಿಲ್ಲದಷ್ಟು ಅದು ಅಪಾರವಾಗಿದೆ. ಅವರ ಬಗೆಗಿನ ಕೆಲವು ಸಂಸ್ಕೃತಾಭಿಜ್ಞರ ಅಭಿಪ್ರಾಯಗಳನ್ನು ಮಾತ್ರ ಈ ಹೊತ್ತಿಗೆಯಲ್ಲಿ ನಮೂದಿಸಲಾಗಿದೆ. ಪಂ|| ಶ್ರೀ ಶ್ರೀನಿ-ವಾಸಾಚಾರ್ಯರ ಕೆಲವು ಶಾಸ್ತ್ರೀಯ ಮತ್ತು ಸಾಹಿತ್ಯಕ್ಕೆ ಸಂಬಂಧಿಸಿದ ಲೇಖನಗಳನ್ನು ಆಯ್ಕೆ ಮಾಡಿ ಇಲ್ಲಿ ನೀಡಲಾಗಿದೆ.

ಈ ಹೊತ್ತಿಗೆ ಅವರ ಚಿ||ಗಳಾದ ಕರ್ನಾಟಕದ ಮುಖ್ಯ ನ್ಯಾಯಾಲಯದ ಸಹಾಯಕ ಕುಲಸಚಿವರಾಗಿದ್ದ ಶ್ರೀ ರಾಮಾಚಾರ್ಯ ಬಾರ್ಲಿಯವರ ಒತ್ತಾಸೆಯಿಂದ ಪಂಡಿತ ಸಮುದಾಯಕ್ಕೆ ದೊರಕಿದೆ. ಇವರು ಅವರ ತಂದೆಯವರಂತೆಯೇ ಸದಾಚಾರಿಗಳು, ಪ್ರಾಮಾಣಿಕರು ಹರಿಗುರುಭಕ್ತರೂ ಪರಮಪೂಜ್ಯ ಶ್ರೀ ಶ್ರೀಮದು-ತ್ತರಾದಿಮಠಾಧೀಶರಾದ ಶ್ರೀ ಶ್ರೀ ಸತ್ಯಪ್ರಮೋದತೀರ್ಥರ ಅನುಗ್ರಹಪಾತ್ರರೂ ಆಗಿದ್ದಾರೆ. ಅನೇಕ ಗಣ್ಯಸಂಸ್ಥೆಗಳಲ್ಲಿ ಇವರು ಮಾರ್ಗದರ್ಶಕರು ಧರ್ಮದರ್ಶಿಗಳೂ ಆಗಿದ್ದಾರೆ. ನ್ಯಾಯಾಲಯದಲ್ಲಿ, ಸಮಸ್ಯೆ ಹೊತ್ತುಬಂದ ಎಲ್ಲ ವರ್ಗದ ಜನತೆಗೂ ತಮ್ಮ ಪ್ರಾಮಾಣಿಕ ಸಲಹೆ ನೆರವು ನೀಡಿಕೆಗಳಿಂದ ಎಲ್ಲರ ಗೌರವಾದರಗಳಿಗೆ ಪಾತ್ರರಾಗಿದ್ದಾರೆ. ಅವರ ಪೂ|| ತಂದೆಯವರ ಪರಿಶ್ರಮ-ಜ್ಞಾನಾಮೃತವನ್ನೊಳಗೊಂಡ ಲೇಖನಗಳು, ಇಂದಿನ ಸಂಸ್ಕೃತ ಪ್ರೇಮಿಗಳಿಗೆ ದೊರಕಲಿ ಮತ್ತು ಶುದ್ಧವಾದ ಪ್ರಾಚೀನ ಸಂಸ್ಕೃತಲೇಖನದ ಮಾದರಿಯು ಪರಿಕಲ್ಪನೆಯೂ ಇಂದಿನ ಸಂಶೋಧಕರಿಗೆ ಇರಲಿ ಎಂಬ ಹಿನ್ನೆಲೆಯಲ್ಲಿ ಬಹಳ ಶ್ರಮದಿಂದ ಅವರು ಲೇಖನಗಳನ್ನು ಮುದ್ರಿಸಿದ್ದಾರೆ. ಅವರಿಗೆ ಈ ಸತ್ಕಾರ್ಯದಲ್ಲಿ, ಅವರ ಸಹೋದರ-ಸಹೋದರಿಯರು, ಅಳಿಯಂದಿರು

ಅನುಬಂಧಿಗಳು, ಆತ್ಮೀಯರು ಆರ್ಥಿಕ ನೆರವು ನೀಡಿ ಈ ಹೊತ್ತಿಗೆಯನ್ನು ಹೊರತರು-ವಲ್ಲಿ ತುಂಬ ಸಹಕಾರ ನೀಡಿದ್ದಾರೆ. ಈ ಎಲ್ಲ ಮಹನೀಯರ ಸಹಾಯ-ಸಹಕಾರಗಳು ಅತ್ಯಂತ ಸ್ತುತ್ಯ ಮತ್ತು ಅನುಕರಣೀಯವಾಗಿವೆ. ಮಹಾಜನತೆ ಈ ಲೇಖನಸಂಕಲನದ ಸದುಪಯೋಗವನ್ನು ಪಡೆಯಲೆಂದು ವಿನಮ್ರವಾಗಿ ವಿನಂತಿಸುತ್ತೇವೆ. ಇಂತಹ ಸತ್ಕಾರ್ಯದಲ್ಲಿ ನನಗೂ ಅಳಿಲುಸೇವೆ ಸಲ್ಲಿಸಲು ಅವಕಾಶಕಲ್ಪಿಸಿದ ಪೂಜ್ಯ, ರಾಮಾಚಾರ್ಯ ಬುರ್ಲಿಯವರಿಗೆ ನನ್ನ ಆದರಪೂರ್ವಕ ವಂದನೆಗಳು.

ಈ ಹೊತ್ತಿಗೆಗೆ ತಮ್ಮ ಅನುಗ್ರಹ ಸಂದೇಶ ನೀಡಿ ಹರಿಸಿದ ಪರಮಪೂಜ್ಯ, 1008 ಶ್ರೀ ಶ್ರೀ ಸತ್ಯಪ್ರಮೋದತೀರ್ಥ ಶ್ರೀಪಾದಂಗಳವರಿಗೆ ನಮ್ಮ ಅನಂತ ಭಕ್ತಿಪೂರ್ವಕ ನಮನಗಳು.

ಬೆಂಗಳೂರು ವಿ.ವಿ.ಯ ಸಂಸ್ಕೃತ ವಿಭಾಗದ ನಿವೃತ್ತಪ್ರಾಧ್ಯಾಪಕರೂ ಹಿರಿಯ ವಿದ್ವಾಂಸರೂ ಸಂಶೋಧಕರೂ ಅನೇಕ ವಿಧಾಯಕ ಕಾರ್ಯನಿರತರೂ ಆದ ಪ್ರೊ|| ಕೆ. ಟಿ. ಪಾಂಡುರಂಗಿಯವರೂ ಈ ಕಾರ್ಯವನ್ನು ಪ್ರಶಂಸಿಸಿ ನಮ್ಮನ್ನು ಆಶೀರ್ವದಿ-ಸಿದ್ದಾರೆ. ಈ ಮಹನೀಯರಿಗೂ ನಮ್ಮ ಸಾದರ ಪ್ರಣಾಮಗಳು.

ಪಂ|| ಬುರ್ಲಿ ಶ್ರೀನಿವಾಸಾಚಾರ್ಯರ ವಂಶ ಪರಿಚಯ ವಿದ್ಯಾಭ್ಯಾಸ-ವ್ಯಕ್ತಿತ್ವಕ್ಕೆ ಸಂಬಂಧಿಸಿದಂತೆ ಕೇವಲ ಸಂಸ್ಕೃತಜ್ಞರಿಗೂ ಮಾಹಿತಿ ನೀಡಲು ಸಂಸ್ಕೃತದಲ್ಲೂ ಲೇಖನವನ್ನು ಬರೆದು ನೀಡಿದ್ದೇನೆ. ಸಜ್ಜನವರ್ಗ ಇದರ ಸಂಪೂರ್ಣ ಲಾಭ ಪಡೆಯಲೆಂದು ವಿನಮ್ರವಾಗಿ ಪ್ರಾರ್ಥಿಸುತ್ತೇನೆ.

ಶ್ರೀ ಎ. ವಿ. ನಾಗಸಂಪಿಗೆ, ಎಂ.ಎ.
ನ್ಯಾಯ-ವೇದಾಂತ ವಿದ್ವಾನ್
ಸಂಶೋಧಕರು
ಪ್ರಾಚ್ಯವಿದ್ಯಾಸಂಶೋಧನಾಲಯ
ಮೈಸೂರು ವಿಶ್ವವಿದ್ಯಾನಿಲಯ, ಮೈಸೂರು-5

ವಂಶಾವಳಿ

ಶ್ರೀ ವಾಸುದೇವಾಚಾರ್ಯ ಬುರ್ಲಿ

- ಶ್ರೀ ವೆಂಕಣ್ಣಾಚಾರ್ಯ
  - ಬಿಂದಾಚಾರ್ಯ
  - ಶೇಷಾಚಾರ್ಯ
- ಶ್ರೀ ಗೋಪಾಲಾಚಾರ್ಯ
  - ವಾಸುದೇವಾಚಾರ್ಯ
  - ತಮಣಾಚಾರ್ಯ
- ಶ್ರೀನಿವಾಸಾಚಾರ್ಯ (ಮಧುರವಾಣಿ ಸಂಸ್ಥಾಪಕರು)
  1) ರಾಮಾಚಾರ್ಯ (ಆರ್. ಎಸ್. ಬುರ್ಲಿ)
  2) ಶಾಮಾಚಾರ್ಯ
  3) ದಿ. ಭೀಮಾಬಾಯಿ
  4) ದಿ. ತುಂಗಾಬಾಯಿ
  5) ಪದ್ಮಾವತಿ ಬುರ್ಲಿ (ಬಾಗಲ)
  6) ಸೌ|| ಕೃಷ್ಣಾಬಾಯಿ ಅವಧಾನಿ (ಬುರ್ಲಿ)
- ಶ್ರೀ ಮಧ್ವಾಚಾರ್ಯ
  - ಸೀತಾಬಾಯಿ
- ಶ್ರೀ ರಾಘವೇಂದ್ರಾಚಾರ್ಯ
  - ಅನಂತಾಚಾರ್ಯ

ಸಮಾಜ ಸೇವೆ – ಸದಾಚಾರಗಳಿಂದ ಈ ಮನೆತನದ ಎಲ್ಲ ವ್ಯಕ್ತಿಗಳು ಮತ್ತು ಅವರ ಪರಂಪರೆ, ಸಮಾಜಕ್ಕೆ ಆದರ್ಶವನ್ನು ನೀಡುತ್ತ ಬಾಳಿ ಬೆಳಗುತ್ತಿದೆ.

मधुरवाणी वर्णनम्

[कविः—चन्द्रशेखरशिवाचार्यः, कुन्दरगीमठः, गदग]

— ० —

परभृतकलवाणी पाक्षिकी पत्रिकेषा
स्रवति ललितवाणीयं सुधां सर्वदिक्षु ।
उपदिशति च तत्वं शास्त्रतो वीरवाणी
जयती मधुरवाणी भारते भूरिशोभा ॥ १ ॥

प्रतिजनकमनीया मंजुलं गुञ्जमाना
लसयति च बुधानां हृत्सरोजं महोजः ।
सरलसुरगिरैषा सर्वतः सुप्रसिद्धा
जयति मधुरवाणी भारते भूरिशोभा ॥ २ ॥

बहुविधबुधलेखैरन्विता सुप्रसन्ना
कविवरकृतपद्यैः पूरिता श्लाघ्यरूपा ।
विविधविषयपूर्णा केन मान्येत लोके
जयति मधुरवाणी भारते भूरिशोभा ॥ ३ ॥

मधुरगुणगणानां संपदालंकृतेयम्
भजति सुरगिरं या श्लाघ्यते सर्वलोकैः ।
उदयति विलसत्कर्णाटके भूरिकीर्तिः
जयति मधुरवाणी भारते भूरिशोभा ॥ ४ ॥

रजतगिरिसकाशं ते यशः पूर्वकाले
सुकविकुलललामैः कालिदासादि मुख्यैः ।
सकलभुवि वितेने श्लाघ्यसे देववाणि
जयति मधुरवाणी भारते भूरिशोभा ॥ ५ ॥

Review published in The Hindu Paper
(10-11-1944)

'**MADHURAVANI**'— A Sanskrit Fortnightly Edited by G. Ramacharya (Published by Pandit Srinivasacharya Burali, Madhuravani Office, No. 1698, Belgaum).

This excellent fortnightly, which has been in existence since November of last year, aims, as was explained editorially in the first issue, at restoring Sanskrit to the proud position it enjoyed in the palmy days of Indian Civilisation. as the Lingua-franka' of the literati and the intelligentzia, so that the rich treasures of wisdom its great literature contains may be open to all again. The brief, informative articles written in easy and flowing Sanskrit on current topics, the well-selected budget of news and the poems, essays and stories it publishes conform to a high standard. This daring venture in journalism deserves encouragement at the hands of Sanskrit lovers.

ಈ ಗ್ರಂಥಮುದ್ರಣಕ್ಕೆ ಧನಸಹಾಯ ನೀಡಿದ ಮಹನೀಯರು

1)	ಆರ್. ಎಸ್. ಬುರ್ಲಿ	2000 – 00
2)	ಎಸ್. ಎಸ್. ಬುರ್ಲಿ	1001 – 00
3)	ಜಿ. ಎಮ್. ಗುಡಿ	1001 – 00
4)	ಎನ್. ವಿ. ಮುಸಲೇಕರ್	1001 – 00
5)	ಗೀತಾ ಬಾಗಲ . ಮುಂಬೈ	1001 – 00
6)	ಜಿ. ಜಿ. ಅವಧಾನಿ	1001 – 00
7)	ವೆಂಕಣ್ಣ ಹುಲ್ಯಾಳ್‌ಕರ್	1001 – 00
8)	ಪಿ. ಪಿ. ಡಂಬಳ (ಹುಬ್ಬಳ್ಳಿ)	1001 – 00
9)	ಆನಂದ ಬಾಗಲ (ಪುಣೆ)	500 – 00
10)	ಹೆಚ್. ಬಿ. ನಾಗಸಂಪಿಗೆ	1001 – 00
11)	ಕೆ. ವಿ. ಬಿದರಹಳ್ಳಿ	1000 – 00

अनुक्रमणिका

— — —

सत्यनारायणव्रतम्

अस्ति किल कर्णाटके मलापहाया नद्यास्तीरे विलासपुरं नाम नगरम् । तत्र कृष्णशर्मा नाम ब्राह्मणो वनरक्षणविभागे लेखनकर्मणि नियुक्तः कुटुम्ब-पोषणरतः प्रतिवसति स्म । स च भार्यया सहितः सुखमधिवसन् कालमति वाहयति स्म । प्रतिमासं चत्वारिंशद्रूप्याणि वेतनरूपेण लभते स्म । द्वे कन्ये द्वौ कुमारौ च तस्यासन् । उदारहृदयतया स प्रतिमासमपि किमपि निमित्तं कृत्वा अनेक सुहृदो बान्धवांश्चाहूय भोजनोपहारादिभिः तांबूलादिभिश्च संतर्पयति स्म । ते च महानुभावाः समागत्य यथेच्छं संतर्पिताः तं प्रशसंतश्च स्वगृहं गच्छन्ति स्म । अपत्यचतुष्टयेन पत्न्या च समं केवलं लोकेभ्यः प्रशंसामपेक्षमाणो वेतनतया लब्धेषु रूप्यकेषु आपद्धनमिति न किंचिदपि अवशेषयति स्म । एवं गच्छति काले एकस्मिन्नहनि एकादशघंटावादनसमये जवेन भुक्त्वा गृहीततांबूलः स्वकार्यालयमगच्छत् । तदधिकारी सहसैव कृष्णशर्माणमाहूय प्रोवाच वरिष्ठाधिकारिणो लेखनकर्मणि नियुक्तानां न्यूनी-करणमपेक्षमाणाः त्वां निष्कासयितुं अर्थात् गृहं गमयितुं मह्यमादिशन् अतो गच्छ गृहमिति । वज्रपातसदृशं अतिकठोरमिदं वचनमाकर्ण्य संभ्रान्तचेताः स्तम्भितशरीरः तमोव्याप्तदृष्टिरिव बभूव । तथापि पुनर्धैर्यमवलम्ब्य भो महा-भागाः कुत एवं कथमहं कुटुम्बं रक्षेयं दयां कुरुत दयालव इति साश्रुपातं साञ्जलिबन्धमभ्यर्थयाञ्चक्रे । अथ कृष्णशर्मणो वचनमाकर्ण्य पुनरधिकारी- 'किमहं करवाणि वरिष्ठाधिकारिणां सकाशादेव इयमाज्ञा प्राप्ता अत्र न मे हस्ते किंचिदपि तथापि प्रयत्नमाचरामि परमद्य त्वया गन्तव्यमिति ब्राह्मण-मब्रवीत् । तदानीं निरुपायतया चिन्ताक्रान्तहृदयः कृष्णशर्मा म्लानवदनो दीर्घमुच्छ्वसन् गृहमागत्य शयनागारमविशत् । अज्ञातचिंतालेशाः पुत्राः तात तात इति ब्रुवाणाःशयानं परिवृत्य तस्थुः । अनसूया नाम ज्येष्ठा तनया

वयसा अष्टवर्षीया तात जनक मम चित्रचित्रितं परिधानमपेक्षितं मम यथा कमला तेन वाससा कथं शोभते तादृशं मम कदा प्रयच्छसीति साभिलाषमपृच्छत् । ततोऽन्या कुसुमावती रेरे पितर्मह्यं कण्ठाभरणमानयेति । एवं कुमारौ च स्वापेक्षितानि विविधानि वस्तूनि याचमानौ विशेषतस्तं क्लेशयामासुः ।

अकाले गृहमागतं पतिमवलोक्य कुत एवमिति जिज्ञासया गृहिणी भोजनमपि विहाय कथमिदमिति अपृच्छत् । अभाषमाणं म्लानमुखं च वीक्ष्य जातशङ्का तत्समीपमुपसृत्य किं शिरोवेदना बाधते इति करतलेन ललाटं स्पृशन्ती प्राह । तदा दीर्घमुच्छ्वसन् ब्राह्मणो गृहिण्यै सर्वं वृत्तमाश्रावयत् । दुःखितमनस्कापि सा पतिदेवाय धैर्यावलम्बनमुपदिश्य केवलं निमित्तमात्रेण भोजनं कृत्वा सापि चिन्तातुरा बभूव । आपद्धनशून्यतया सत्वरमेव आहारविरहस्यैव विलोप प्रसङ्गः प्राप्तः । पत्नी स्वाङ्गगतानि सर्वाण्याभरणानि प्रसंगमनुसृत्य एकैकमिति विक्रयार्थं प्रायच्छत् । चिन्तया दुःखेन च संतप्तहृदयः तानि विक्रीय संसाररथं प्रावर्तयत् । परं तानि षण्मासावधि उदरपूर्तये अभवन् । ततः किं इति घोरा शङ्का दम्पती भीषयांचक्रे । प्राक् अनेकशो भोजनोपहारसंतृप्ता बहुशः संप्रार्थिता अपि कपर्दिकामपि न प्रायच्छन् । एवं दुःखातिरेकेण संतप्ते श्वः किं कर्तव्यमिति विचारयति तस्मिन् देवशर्मा नाम ब्राह्मणस्तस्य पुरोहितो गृहमागत्य भोः कृष्णशर्मन् अद्य मम गृहे सत्यनारायणव्रतं वर्तते । भवान् सपुत्रकलत्रो भोजनाय आगच्छतु इति निवेद्य निष्क्रान्तः । स तु कृष्णशर्मा परमानन्दयुक्तो बभूव । तस्मिन् दिवसे किमपि किंचिदपि गृहे नासीत् । सपुत्रकलत्रो देवशर्मणो गृहे सत्यनारायणस्य प्रसादं भुक्त्वा भो भगवन् कुटुंबरक्षणाय मह्यं मार्गं प्रदर्शयेति प्रार्थितवान् । उदरपूरणौपयिकं द्रव्यं संपादयितुं किं कर्तव्यमिति एतावता समयेन तत्र तत्र बहुशः सर्वत्र प्रयत्नं कृत्वापि निराशा आसीत् । देवशर्मणो गृहे भुक्त्वा रात्रौ गृहमभ्येत्य निद्रितवान् । प्रातरुत्थाय कृष्णशर्मा भोजनोपहारादौ प्रशंसतां चरितं विज्ञाय धनवत्त्वे ज्ञातयः सुहृदश्च धनाभावदशायां सर्वेपि तिरस्कुर्वन्तीति विचारयन् गृहे

पुनरद्य कथं कार्यमिति चिन्तयन्नुपविष्टः आसीत् तावदेव कश्चन पुरुषः अभ्येत्य सप्रणामं पत्रमेकमदात् । कृष्णशर्मा पत्रं वाचयन् उत्फुल्लकपोलो मन्दहासयुक्तः तत्क्षणं एव गृहिणीमाहूय सानन्दमवादीत् । अयि वामाङ्गि ह्यः देवशर्मणो गृहे यत् श्रीसत्यनारायणप्रसादः परिगृहीतः प्रार्थना च कृता तत्फल मधुनैव संप्राप्तम् । वरिष्ठाधिकारिणः सकाशात् इदानीमेव पत्रमागतं यत् भवान् पुनः पूर्वतने एव लेखनकर्मणि अद्यैव युक्तो भवतु तथा च निष्कासन-दिनात् प्रभृति अद्यतनपर्यन्तमपि यावत्संपूर्णमपि वेतनं लप्स्यते इति परमानन्द-निदानँ तत्र वर्तत इति । ततः स कृष्णशर्मा तद्दिनं एव देवशर्मणं पुरोहित-माहूय भक्तिनम्रो हि श्रीसत्यनारायणस्य भगवतः पूजामनुष्ठितवान् । कृतघ्नान् पूर्वसुहृदाभासान् कदापि नैवाहूतवान् । मितव्ययेन कुटुम्बं रक्षन् कृष्णशर्मा भगवतो नारायणस्य महिमानं सततमुपगायन् सुखमवाप ।

हीरा सुन्दरी

प्रशान्तगंभीरो निशीथसमयः । सुधांशुरतिविमलैः किरणजालैरवनि-मापूरयत् । रमण्यो रमणसहिता आरामेषु वसन्ते सरससंलापसुखमनवरत-मास्वादयन्त्यो निशीथमतिक्रान्तमपि न गणयन्ति स्म । समयेऽस्मिन् काचन ललना सुरूपतुलितरतिरपहसितामराङ्गना वल्लकीगुणसंवलनपरायणा सुमधु-रेणात्मस्वरेण समं तत्स्वरं संयोजयन्ती गायतिस्मातिरमणीयं विहारमन्दिरे । तन्मन्दिरपरिसरवर्तिनो रक्षा पुरुषा अपि संगीतश्रवणलोलाः स्वकर्तव्यमपि विस्मृत्य परवशा आसन् । विहारमंदिरोपवनगता महीरुहा वीरुधोऽपि सुमधुरसंगीतश्रवणजनितोपकारस्य प्रत्युपकारचिकीर्षयेव सुगंधभराहूतमिलिन्दानि प्रस्रवन्मरन्दानि मन्दारमालती जातिकुसुमानि तद्विहारसुखमभिवर्धयितुमिव दासीहस्तेन हंसतूलतल्पसविधे प्रत्यष्ठापयन् । प्रसरणशीलः स सुगन्धभरो

विहारमन्दिरमापूर्य वातायनमुखात् बहिरागच्छन् द्वारोपवनवर्तिनो रक्षापुरुषान् अंतरागतानन्यांश्च पुरुषान् सन्तर्पयति स्म। समीरोऽपि कुसुमसौरभभारमुद्वहन् मन्दं मन्दं संचरन् गवाक्षतोऽतः प्रविश्य वामाक्षीं प्रेक्षमाणः तदङ्गसङ्गमभिलषन् इव संस्पृशन् शुश्रूषते स्म।

प्रियपाठकमहोदयाः !! विविधमहीरुहभास्वरे अनेकलतामण्डपमंडिते मनोहरोद्यानं परमसुन्दरं रतिमन्दिरमासीत्। पश्चात्तनभित्तिमभिस्पृशन्ती कल्लोलमालाभिः गंभीरविमलसलिला कालिन्दी मन्दमन्दं बहति स्म। ईदृशे सर्वतः सुन्दरे विहारमंदिरे चन्द्रशालायां रतिविहारसाधनसामग्रीपूरितायां अतिदेदीप्यमान दीपविभ्राजितायां केवलमेकैव ललना बाला वल्लकीमालापयन्ती कंचित् कालमपनीय ततः तामधो निधाय उत्थिता गवाक्षनिहितचक्षुः सुदूरमीक्षमाणापि स्वापेक्षितस्य पुरुषस्यागमनमलब्ध्वा दीर्घमुच्छ्वसन्ती विदूयमानमानसा गजदन्तनिर्मितस्य पर्यङ्कस्य उपरि समास्तीर्ण हंसतूलतल्पमधिशिश्रिये।

तत्रापि सुखं मनश्शान्तिमप्राप्य कांश्चित् क्षणान् पतित्वा च निद्राधिगमनिराशा अवरुह्य शयनतलात् काचकवाटनिहितेषु पुस्तकेषु चक्षुर्निक्षिप्य तेषु कमप्येकं पुस्तकमाकृष्य पुनर्मञ्चमधिरुह्य शयाना वाचयितुमाचकांक्ष। कुसुमशरप्रहारपीडितं चञ्चलं चेतो वाचनेष्यनुत्साहमदर्शयत्। ततो मदिरासेवनमन्तरा न सुखं शान्तिर्वा लभ्यते मयेति कृतनिश्चया सा सुवर्णमये चषके मदिरामापूरयत् पुनश्चाचिन्तयत्। सुरतानुभोगमन्तरा मदिरासेवनं न सर्वथा स्वारस्यमादधाति इति पुनश्चषकगतं मदिरारसं पृथुभाण्डे संपूरयामास।

एवमतिलोला सा बाला सलीलं भित्तिषु निहितांश्चित्रविशेषानवलोकयन्ती ततो वातायनविनिहितवदना सजलनयना विमलसलिलां कालिन्दीमवलोकयांचक्रे। कंचित् कालमवलोक्यापि अलब्धशांतिर्मनसा वल्लभमतिगर्हयन्ती पुनर्गवाक्षेषु सर्वेष्वपि चक्षुर्निक्षिप्य वल्लभमनागतमेव निश्चित्य वल्लकीमेव वल्लभतरां मन्यमाना रंभोरौ कोमलतरांगुलिभिस्तद्गुणसंवलनपरायणा बभूव।

प्रेष्ठाः प्रियपाठकाः !! अतिलोला सा बाला (षोडशवार्षिकी) प्रिया-गमनमार्गनिरीक्षणनिराशा यावत् वल्लकीरवेण स्वमधुरस्वरसंयोजनपराऽभूत्तावदेव कश्चन रतिसुखातिसक्तस्तत्सौन्दर्यमोहितः तदायत्तजीवित इव तत्संतर्पणैकपरायणो महातेजाः शनैः शयनागारमासाद्य मन्दं मन्दं पदानि निक्षिपन् अनिरीक्षित एव तत्पृष्ठत आगत्य स्वस्य चिरायितापराधमुपगूहयितुं तस्यामनवधानरूपमपराधमारोपयितुं च समुत्कंठितः सपदि करतलांगुलिभिरशिथिलं नयननलिनयुगलपिधानमपकरोत् । तत्क्षणे एव सा समुत्फुल्लकपोलतला सहजागतमपि हासमुपगूहितुमपेक्षमाणा कोपमुद्भावयन्तो आः कोयमुपहासः । किं ते स्फुरति विवेकः ? अपि जानासि कियत्यपगता रात्रिरिति निशायामपि विविधराजकारणालोचनपरायणो जागरणतत्परो निशाचरवदाचरसि । कुसुमशरशरासारजर्जरितां मां विस्मरसि त्वदागमनमार्गप्रतीक्षणपरिक्लिष्टा यावदसह्यदुःखमनुबभूवाहमिति कथमपरो जानीयात् कथंचिदपि वल्लक्या वा सुखलेशं विन्देत इति स्वरसंयोजनोद्यताया मे नयने निष्पीड्य विघ्नमुत्पादयसि शत्रुवदसहमानः अलमलमधुना मृषा प्रेमप्रदर्शनायासेनेति गिरमब्रवीत् । ललनानुनयविशारदे दयिते समीपमुपसर्पति सुदूरमपासरच्च ।

सोपि तत्कोपाटोपमवेक्षमाणोपि चुम्बनाभिलाषि अधरमास्फालयन् अयि मनोहारिणि सुंदरीमणे हीरे हीरे क्षमस्व सकृदाचरितमपराधम् । नाहमेवं पुनराचरामि सर्वथा । शपामि ते कमलकोमलौ चरणौ । अथवा यर्हि अक्षम्यमेव ममापराधं मन्यसे तर्हि शाधि माम् अशिथिलमसकृत् बाहुपाशयुगलेन संबध्य पातय माम् इति वदन् पुनस्तत्समीपमुपससर्प । तडिदिव चपला सा तद्वचनमनाकर्ण्यैव सुदूरमपसृत्य स्वविजयाल्हादितहृदया पुनर्वल्लकीस्वरसंयोजनोद्यता तत्क्षणे एव समीकृत्य तत्स्वरेण सुमधुरमात्मस्वरं संयोज्य गातुमारेभे । सोपि कंचित् क्षणं मौनमवलम्ब्य पुनः समीपमुपागतो दूरादालापमात्रेण न वशे भवतीति विदिततदीयमानसो वल्लकीं हस्तादाकृष्य 'अयि धिक्कृतवराप्सरोरूपं किमयं गायनसमयः इति वदन्नुच्चैर्जहास ।

ततः सा रोषारुणीकृतनयना सभ्रूभङ्गं अलमलमिदानीं समयासमयप्रवचन पांडित्येन। का खलु समयः असमयो वेति युष्मान् प्रष्टुमुद्युक्ता। घोरे निशीथे बत किंक्रा बाला ललना कथं तु वसेदिति विवेकविधुरः समयासमयविवेक-मूढो भूत्वा परानुपदेष्टुमभ्येति। गच्छ गच्छ मंदिरादस्मात्। किं तव मया हीरया हारया। सुमधुरमतिमंजुलं संगीतं सुरासुरनरादीनखिलानप्यानन्दयति तादृशमयं श्रोतुमरसिको भूत्वा नायं समय' इति निषेधते। एवमभिधाय अरे विरक्ताग्रेसर यदि ते गीतश्रवणे नैवादरः तर्हि तस्मिन् कोणे पीठे निहितमस्ति पुराणपुस्तकम्। कामं अनवरतं पारायणप्रवणो भव न कोपि तेन्तरायो भवति इति सलीलँ किंचिदुपहसन्ती समलपत्।

अपि सुंदरि हीरे किं पारायणसमयो वा। रसिकधुरीणे न सर्वथा सहेऽहं सारसाक्षीसङ्गविलंबमिति वदन् रभसाश्लेषमभिलषन् तामस्पृशत्। सा च वीणामधो न्यधात्। ततः सा कटाक्षप्रक्षेपपुरस्सरं अमन्दमन्धाक्षभरमपि विस्मृत्य तस्य सम्मुखतया विशालतलमूरुततलमवललंब। सुविशालाभ्यां नयननलिनाभ्यां अतिसुन्दरमुखी तन्मुखावलोकनपरायणा मन्दं मन्दं हसन्ती स्वाङ्गसंघट्टनेन तदङ्गानि संप्रीणयती कोमलतरकरतलांगुलिभिस्तदीयविशाल-वक्षस्थलप्रसूतकूर्चजालजटिलग्रन्थिसमीकरणतत्परा सुमधुरमभाषत। अयि रे प्राणवल्लभ अपि यथार्थत एवाहमस्मि ते प्राणप्रिया तत्वतस्त्वं मे कथयेति।

अयि मुग्धे त्वं प्राणेभ्योपि मे गरीयसीत्यत्र न सर्वथा संशयलेशः। एतदर्थं प्रत्ययार्थं किमहं करवाणि कथय।

तर्हि कुत एव चिरायितम्।

अयि विवेकशालिनि बाले कोमलहृदयायाः विलासरसिकायाः ललनायास्ते किमतिगहनेन राजकारणेन स्वभावरूपेण। यत्र कपटकरणहिंसादयो धर्मस्वरूपतां भजन्ते। तत्रैकदा रात्रिररात्रिरुभे अपि समे भवतः। आहार-विहारनिद्रासुखानि विसर्तव्यानि भवन्ति। सुन्दरि अमन्दानन्दसंदोहादायिनि

केवलं सुखानुभवहेतवः क्षणा नाम त्वदीयमङ्गलांगसङ्गसम्बन्धिन एव । यदि-दानीमपि भवती शरायमाणैरतिशितैर्वचनैः क्षिणोति तर्हि कथमहं कुर्याम् । भवत्येव सुखनिधिर्ममेति भाषमाणो गाढमालिलिंग तामङ्गनाम् । अचुम्बच्च बिंबाधरम् । जंबीरघनोन्नतकुचा सा ललना परमानन्दनिमग्ना समपृच्छत् यद्यहं ते प्राणप्रिया तर्हि ममैकं वचनमनुपालयति वा भवानिति ।

प्रेयसि कुतस्ते शंका । किमाज्ञापयसि । सत्वरमाज्ञापय । तच्चावदनुष्ठाय विश्वासपात्रं भवामीति वदन् करांगुलिभिः कपोलतलमस्पृशत् ।

अपि सत्यं भाषते भवान् । पश्यतु पश्यतु । जाने न सत्यं भाषत इति सुहसितवदना नयनान्तपातमब्रवीत् ।

मुग्धे मनोनयनहारिणि परीक्षस्व तावत् । प्रत्ययार्थे करतले ते करमिदर्पयामीति वदन् साभिलाषस्तथाकरोत् ।

एवमभिहिता सा तत्क्षण एव सलीलमुत्थाय सुवर्णमये चषके मदिरारसमापूर्य चपला तर्हि पिबतु भवानिति समर्पयितुमागात् ।

अयि विलासरसिके अपेया हि मदिरा अतः कथमहं पिबेयं धूर्त किमिदमेवं ते वचनपरिपालनम् ।

मुग्धे मा भणतु तथा प्राणप्रिया भवती । त्वत्प्रीणनायाद्य अपेयामपि मदिरां पिबामीति चषकं हस्ते गृहीत्वा पुनरब्रवीत् । अयि मनोहारिणि मदिरारसेऽस्मिन् त्वदीयबिंबाधरसुधारसो यदि मिश्रितः स्यात्तर्हि मह्यमतितरां रोचते । अतस्तथा कृत्वा प्रयच्छतु इति । एवमुक्ता सा हीरा ईषदेव चषकगतं मदिरारसमापीय पुनरयच्छत् । सोपि यावत्तद्रसं पातुं वदनसमीपमनयत् तावदेव सा ललना हा हंत धिक् अपेयमदिरासेवनात् धर्मभ्रष्टो भवानिति उच्चैर्हसन्ती तत्करतलाच्चषकमाचकर्ष । हीरे किमेवमित्यालपति दयिते परीक्षार्थमहमेवमवोचम् भवतो व्रतभङ्गं विधाय किमहं विन्देय इति वदन्ती सुहसितवदना तमश्लिथिलमालिलिङ्ग ।

प्रेष्ठाः प्रियपाठकाः !! ततस्तौ मञ्चगतं हंसतूलतल्पमध्यारोहताम् ।

विशालवक्षःप्रसूतकूर्चभासुरो यवनयुवायं नायमन्यः कोपि । किन्तु दिल्लीश्वरो भारतचक्रवर्ती श्रीमानवरंगजेबमहोदयः । तस्येयं प्राणेभ्योपि गरीयसो हीरा सुदन्री । उभयोरयं प्रणयप्रसंगः प्रियपाठकप्रीणनायास्माभिरुपहारीकृतः । अनेन कथाप्रस्तावेन निर्व्यसनिता कार्यदक्षता धर्मप्रवणता च यवनेश्वरस्य हृदयङ्गमा आसीदिति ज्ञायते । एवं विलासरसिका बालापि सा हीरासुन्दरी व्रतभङ्गमाचरितुं नाचकांक्ष । सा विश्रम्भरतिसमये मदिराप्राशनपरित्यागं सशेषमङ्गींकृतवती चेति श्रूयते । एवमन्योन्यं प्रणयिनीप्रणयिनौ कर्तव्यदक्षौ धर्मरक्षणोद्यतौ च भवेतां इति निवेद्य कथामिमामुपसंहारमः ।

यश्च महत्वमाकांक्षति स निर्व्यसन एव भवेत् । मद्यपानादिव्यसनानि मनुजमधःपातयन्ति । सहस्रशो जना व्यसनेभ्यो हि उभयलोकभ्रष्टाः सुखलेशमप्यलभमाना दुःखोदधिनिमग्ना दरीदृश्यन्ते । दिल्लीश्वरोऽयं निर्व्यसनितया एव साम्राज्यमतिविस्तारयाञ्चक्रे । अस्मिन् बहवो यथा गुणास्तथा दोषा अप्यासन्निति इतिहासकारा वदन्ति । अथापि एतस्मिन्निव यदि गुणाः अन्यस्मिन् स्युः तर्हि सोपि चक्रवर्ती भवेदित्यत्र न संशयलेशः । अतः सर्वैः व्यसनरहितैर्गुणवद्भिश्च भाव्यमिति कथाया अभिप्रायः ।

———

सतां सन्तोषमुत्पाद्य वरं देहीति नो वदेत् ।
सतां सन्तापमुत्पाद्य शापं देहीति नो वदेत् ॥

भवभूतिः किमपराधी ?

महाकविः सुप्रथितयशा भवभूतिरुत्तररामचरितनिर्माणेन रसिकजनता-मानन्दसागरे न्यमज्जयत् निमज्जयति निमज्जयिष्यतीत्यपि निर्विवादमेव। 'उत्तरे रामचरिते भवभूतिर्विशिष्यते' 'कारुण्यं भवभूतिरेव तनुते' इत्यादीनि वचोजातानि पण्डितवदनानि किलालंकुर्वन्ति। सत्यप्येवं कश्चन पण्डितोपाभिधः शास्त्री प्रवचनावसरे भवभूतिं रामायणकथाविपर्यासकारिण-मतो दोषास्पदं मत्वा अक्षम्यमपराधमाचरदयमिति दूषयतीति बतास्माभिरा-कर्णितम्। उतैकदा शास्त्रिणा पण्डितेन समं विवादश्च कृतः। तस्मिन् प्रसङ्गे भवभूतिमयं केन हेतुना दोषास्पदं ब्रूते स हेतुः किं युक्तियुक्तः इत्यत्र सुनिपुणं विचार्य न सर्वथा स दोषभाग् भवतीति इंत प्रत्यपादि चास्माभिः स विषयः। तमेव विषयं मधुरवाणीप्रियपाठकेभ्यः संप्रति समुपाहरामः।

भवभूतिर्दोषास्पद इति प्रतिपादयितुर्मते कारणद्वयं पुरस्कृतम्। प्रथमं तावत् 'पश्चात् पुच्छं वहति पृथुलं तच्च धूनात्यजस्रम्' इति पद्येन ब्राह्मण-कुमाराः अश्वमेधीयं तुरगमवलोक्य लवस्य पुरतः अदृष्टपूर्वाश्वा यदवर्णयन् तदयुक्तमिति। यतो लवकुशसहाध्यायिनः धनुर्विद्यापारङ्गता ब्राह्मणकुमाराः अश्वं न कथमपश्यन् इति। तथा च वामदेवाश्रमे वाम्या अश्वाः सार्वभौम-स्यापि लोभनीया आसन्निति वर्णिताः। एतेन महर्षीणामाश्रमेषु महाराज-लोभनीयानामश्वानां अवस्थितिः संभवति। अतो ब्राह्मणकुमाराणां मुखेन 'पश्चात् पुच्छा'मित्यादिनोक्तं तुरगवर्णनं भवभूतेरनिवार्यं दोषमुद्भावयतीति।

आर्याः प्रियपाठकमहोदयाः! कथमस्य पंडितोपाभिधस्य महाकवेरुपरि दोषारोपणचातुरी निरीक्ष्यताम् सम्यक्। अनेन प्रतिपादिता हि युक्तयः कथ-मनुपयुक्ता वर्तन्ते इत्येतावदेव तावन्निरूपयामः। ब्राह्मणकुमाराः लवकुश

सहाध्यायिन इति धनुर्विद्यापारङ्गता इति क एवं पंडितं प्रत्यबोधयत् । महा-कविरात्रेयीमुखेन अतिप्रदीप्तप्रज्ञाभ्यामाभ्यां सह अस्मदादेर्नाध्ययनयोगोऽस्तीति यन्निरूपितवान् तत्पंडितोयं नाम्ना व्यस्मरदिति भाति । अत्र अश्ववर्णनोद्यता बाला अदृष्टपूर्वाश्वतया यदि वर्णयेयुस्तर्हि को दोषो बालानामथवा महाकवे-र्वेति पंडित एव जानातु ।

वामदेवाश्रमे सार्वभौमस्य लोभनीयाश्वावस्थित्या वाल्मीकेराश्रमे कथ-मश्वावस्थानं संघटते । विचित्र एवायमुपपादनक्रमः । यदि रामायणे वाम-देवाश्रमे इव वाल्मीकेराश्रमेपि अश्वावस्थितिरुपलभ्यते तर्हि विचारावसरः स्यात् । न सर्वथा तत्र वर्णितम् । अतः कर्णे स्पृष्टे कटिं चालयतीति न्यायं स्मारयति महापंडितः । जनपदविप्रकृष्टवर्तिनो ब्राह्मणकुमारा बाला अदृष्ट-पूर्वतया अश्वोऽश्व इति जानपदेषु यः श्रूयते सोयं प्रत्यक्षीकृतोऽस्माभिरिति बाल्यसुलभया चपलतया लवसन्निधानमुपेत्य सुन्दरतया अवर्णयन्निति स्वभा-वोक्तिमुपपादयन् । महाकविर्दोषभागिति प्रतिपादयिता पंडितः कीदृशः पंडितोऽयमिति प्रियपाठका एव विमृशन्तु ।

भवभूतिकृतोऽन्यो दोषोऽयम् । यत् वाल्मीकीये रामायणे तुरगग्रहणं लवकुशाभ्यां युद्धप्रसङ्गो वा न सर्वथा वर्णितः । अतो युद्धवर्णनेन भवभूति-रयं रामायणीयेतिहासविरोधी महान्तमक्षम्यमपराधमाचरादिति । मन्याः प्रिय-पाठकाः, कथमस्य विधत्ते दिव्या मतिः । भगवान् वाल्मीकिः रामायणे लवकुशाभ्यां युद्धं वा तत्र तत्रान्यैः क्षत्रियोत्तमैः समरं वा अश्वसञ्चारं वा न वर्णयामासेति तावदविवादम् । एतेन युद्धान्येव नाभवन्निति वक्तुं न शक्यते । भगवता पुंडरीकाक्षेण नारायणावतारेण बादरायणेन प्रणीते पद्म-पुराणे पातालखण्डे अष्टषष्ठितमैरध्यायैः श्रीरामाश्वमेधो वर्णितः । तत्र च यत्र यत्र रामाश्वः सञ्चचार यथा यथा वा समरः समभूत्तत्सर्वमपि सविस्तरं शेष-वात्स्यायनसंवादमुखेन किलोपवर्णितम् । बादरायणोपवर्णितमेव प्रसङ्गमिमं तत्र

भवान् जैमिनिरपि पाण्डवीयाश्वमेधप्रस्तावे बभ्रुवाहनार्जुनयुद्धप्रसङ्गे उदाहरणतया लवकुशयुद्धं सविस्तरं प्रत्यपादयत् । परमपूज्यो वाल्मीकिर्न अवर्णयदित्येतावता भवभूतिः कथमपराधी भवेत् । यदि रामायणे अश्वसञ्चरणसमये सर्वथा नैवाभवद्युद्धं इति कदापि कुत्रापि केनापीति स्पष्टमुपलभ्येत तर्हि विचारस्यावसरः पंडितमतेन स्यात् । किन्तु तत्र न किमपि तथोपलभ्यते ।

अथवा रामायणे अवर्णितवर्णनेन यदि भवभूतिरपराधी स्यात् तर्हि भगवान् बादरायणो महर्षि जैमिनिरपि रामाश्वमेधप्रसङ्गे लवकुशादियुद्धवर्णनादपराधिनौ स्याताम् । तावपि रामायणानुक्तवर्णनादपराधिनावेवेति पंडितो महापंडितवत् यर्हि प्रतिपादयेत्तर्हि नमोनमः पंडितोपाभिधाय महापंडिताय । एवं महाभारते अश्वमेधपर्वणि च पाण्डवाश्वसञ्चारयुद्धादिः च न वर्णितः । तथापि महर्षिभिरन्यत्र वर्णितोऽपीतिहासो न विरुध्यते ।

श्रीकृष्णानुगृहीतो महाराज उग्रसेनोपि अश्वमेधमाचचार । तदीयाश्वसञ्चारक्रमादिकोपि गर्गसंहितायां विषयः सविस्तरमुपपादितः । एकस्मिन् ग्रन्थे न वर्णित इति एतावन्मात्रेण न प्रमाणविरुद्धो मन्तव्य इति । रामायणानुक्तिमात्रेण विरुद्धं यन्मन्यते इत्येतदपि विमर्शकानां वदनेषु हासमुत्पादयति । पुण्यश्लोकं भगवन्तं श्रीरामचन्द्रं सीतां वायुसुतं हनूमन्तं विभीषणादिका अपि पूज्यतमा व्यक्तीः यदि दूषयेत्तर्हि महाकविर्दोषभागी स्यात् । न तथा लेशतोप्याचचारातुलवचोविभूतिर्भवभूतिः । रामायणोपवर्णितपूज्यव्यक्तिषु दोषमारोपतां केषाञ्चित् पापानां दुर्मतनिरसनायैव मत्प्रवचनोद्यम इति प्रतिजानीते पंडितोऽयं तथान्येभ्योप्युपदिशति । परं स्वयमपि श्रीरामचरित्रे रामायणमेकमेव प्रमाणं तद्विरुद्धं (तदनुक्तवर्णनेन) महापुराणेषु परिगणितं पाद्ममपि अश्रद्धेयमित्यावेदयन् परमोपकारिणो बादरायणजैमिनिप्रभृतीन् स्मृतिमात्रतोपि पापापहारिणो महर्षीन् तथा महाकवीनपि प्रदूष्य दूषकेषु स्वयमप्यग्रगण्यतामेति । आस्तां तावत् संप्रति पद्मपुराणोपवर्णितं प्रसिद्धमितिहासमुपादाय सरसनाटक-

प्रणेता महाकविर्भवभूतिः परमोपकारी मान्यमूर्धन्यो न दोषलेशस्याप्यास्पदी-भवतीति वयमत्र निरूप्य पंडितोयं महाभागः प्रवचनेषु विचित्रामेव पद्धति-मुररीकरोति। परमवसरे यथावकाशं विमृशाम तं तं विषयं इति प्रियपाठ-कानाश्वास्य च विरमामो विस्तरात्।

सम्राज्ञी देवी तिरुमलाम्बा

धन्या किल भारतभूरियं या रत्नगर्भा वसुन्धरा चेति चिरादेव जगति जेगीयमाना महेन्द्रभुवने नन्दनवनविहारसुखमनुभवताममराणामपि कर्मभूमितया जन्मग्रहणाभिलाषमुत्पादयति। यत्र च वेदकालादारभ्य ललना अपि सुल-लितगद्यपद्यरचनाचतुराः सुरसरस्वतीसेवारसिका रसिकहृदयेभ्यो ह्यमन्दानन्द-दायिन्यः स्वयमानन्दसिन्धुनिमग्ना निमज्जयन्ति विद्वज्जनानमृतमयापारकाव्य-पारावारे। तत्रापि दक्षिणभारते विशालोऽयं कर्णाटकः कर्णताटंकायमान-स्सर्वेष्वपि विषयेषु सुप्रसिद्धश्चिरायापीत्यत्र सर्वथा नास्ति विप्रतिपत्तिः। न केवलं पुरुषा एव किन्तु योषितोऽपि वैदुष्येण वैभववत्तया शौर्येण धैर्येण वीर्येण पराक्रमेण रासिक्येन औदार्येण सौहार्देनातिथ्यप्रियतया वचोमाधुर्येण सौन्दर्येण तथा अन्यान्यैरपि अनुपमैरुदारतरैर्गुणगणैरतितरां कीर्तिं समपादयन्निति मही-यानभिमान आनन्दश्चास्माकम्।

तासु सुप्रसिद्धा एका महाभागा सम्राज्ञी देवी तिरुमलाम्बा नाम्नी सुललितपदविन्यासमनोहरम् अतिसरसं काव्यरत्नं निर्माय आसुधाकरतारकं कीर्तिमरक्षत् कर्णाटकस्य। इयमतिसुन्दरकाव्यनिर्माणचतुरा इति नामाप्यस्याः कर्णाटकस्था अपि न जानन्तीत्यहो दौर्भाग्यमस्मदीयानाम्। वङ्गभूषणः श्रीमान् सुप्रसिद्धो हरदयाळनागमहाभागो बंगालदेशाद् विप्रकृष्टं प्रदेशमिमं

कर्णाटकमभ्येत्य ऐहोळी इति सुप्रसिद्धं स्थानमुपेत्य तत्रत्यान् विपुलान्देवालयान् तत्रत्यां शिल्पचातुरीं शिलालेखान् अवलोक्य च परमानन्दतृप्तः इतः प्रागनभिज्ञाताः मे हृदयमभिव्याप्य निरूढा अशान्तिहेतवो बह्वयः शङ्का अत्रत्यानां शिल्परेखाणामवलोकनात् समूलं विच्छिन्ना इति वदन् अविरलमानन्दबाष्पमभिवर्षन् समनृत्यदिति सुहृद्वरात्तत्र विद्यमानाद्वयमशृण्म तदानीम्। परमेतादृशमपि प्रदेशविशेषमनवलोकयन्तो न विरलाः कर्णाटके। अथवा 'सन्निकर्षो हि मर्त्यानामनादरणकारणम्। गाङ्गं हित्वा यथान्येभ्यः शुद्धचर्थमुपयाति हि।' इति सुष्ठूक्तं विद्वद्वरैः। आस्तां नाम एतत्।

इयं किल देवी तिरुमलाम्बा का कुत्रत्या किं वा ग्रन्थरत्नं निर्ममे कीदृशं च तन्मनोहरमिति संप्रति प्रियवाचकानामर्थे किंचिदेव निवेदयामो वयम्। कर्णाटके सुप्रसिद्धं हि विजयनगरसाम्राज्यम् इतिहासे। यत्र च धर्माभिमानोज्वला वेदशास्त्राभिमानिनो दुर्म्लेच्छानां धर्मद्रोहिणाम् असुरराक्षसादीनां शिरःकर्तनोद्यतनिशितकरवालशालिनो भारतविद्रोहिणां रुधिरासारेण भूमातरमभिस्नपयन्तः प्रजापालनैकतत्पराः कीर्तिव्यापृतामरलोकाः स्वर्विलासिनीगीतयशसः सहस्रशः शूरा भूमण्डलमिमं मण्डयामासुरनल्पाः। तेष्वेव सुप्रसिद्धः श्रीमान् अच्युतदेवरायो नाम सार्वभौमप्रवरः। तस्येयमग्रमहिषी सम्राज्ञी देवी तिरुमलाम्बा। योषामणिरियं विदुषी स्वयमनेकशास्त्राभ्यासकुशलमतिरनल्पान् विविधशास्त्रपारावारपारीणान् अनवरतं बहुविधसम्मानदानादिभिः सत्कुर्वती समरक्षदिति तच्चरित्राज्जानीमो वयम्।

अनेकानि काव्यानि कान्तकामिनीयं कृतवतीति विज्ञायते। परं तानि सर्वाणि कुत्र वा धूलिधूसरितानि पतितानि आहोस्वित् कीटमुखावलीढावयवानि भग्नान्येवेति न ज्ञायते। परमत्र कर्णाटके उत महाराष्ट्रे आन्ध्रद्राविडादिदक्षिणदेशे निवासिन उत उत्तरभारतीया वा ये इतिहाससंशोधने एव समर्पितात्मसमयाः ते तत्र तत्र प्राच्यग्रन्थालयेषु संशोध्य रत्नानीमानि

उपलभ्य प्रकाशयन्तु इति तान् साञ्जलिबन्धमभ्यर्थयामो वयम् । एवमभ्यर्थने मूलमिदं यत् देव्याः सम्राज्ञ्याः कविकुलमूर्धन्यायाः एतत्काव्यरत्नस्योपलब्धिरपि प्राच्याद् ग्रन्थालयादेवाभूदिति ।

पञ्चनदीयविश्वविद्यालये संस्कृतविभागाध्यक्षा डी. एल्. (आक्सफर्ड) एम्.ए. (पंजाब) पदवीभूषिताः श्रीलक्ष्मणस्वरूपमहाभागा १९२४ तमे क्रिस्ताब्दे दक्षिणदेशमिममभ्यागता राजकीये पुराणहस्तलिखितग्रन्थसंग्रहालये तंजावरनगरे जीर्णमेकं **वरदांबिकापरिणयं** नाम हस्तलिखितं चम्पूग्रन्थरत्नं प्रथममध्यगच्छन् । लिप्यन्तरगतं तन्महता प्रयत्नेन देवनागर्यां प्रतिलिपिमकारयंश्च । ततश्च ते महाभागाः प्राच्यविद्यापरिषद्द्वये ग्रन्थोपलब्धिं तदीयान् विषयांश्च प्रतिबोध्य एतस्यैव ग्रन्थस्य संनिकान्तरसंग्रहाय प्रयत्य निष्प्रत्याशा जयपुरीयसंस्कृतमहाविद्यालये प्रधानाध्यापकैर्महामहोपाध्यायैः सुप्रसिद्धैर्गिरिधरशर्मचतुर्वेदमहाभागैस्तथा आगरास्थसंस्कृतमहाविद्यालये प्रधानाध्यापकैः पञ्चतीर्थैर्हरिदत्तशर्मभिश्च विरचितया टीकया समलंकृत्य च प्राकाशयन् । महाभागानामतिशयं प्रशंसनीयं कर्म इदम् । संस्कृतप्रपञ्चे महोपकारिभ्यो महाभागेभ्यो लक्ष्मणस्वरूपेभ्यो वयं धन्यवादान् सहस्रशो दायंदायं समभिनन्दामस्तमाम् ।

या इयं प्राक् प्रसक्ता देवी सम्राज्ञी तिरुमलाम्बा सा विजयनगरवीरनरपतेरच्युतरायस्य सार्वभौमप्रवरस्य पट्टमहषी अच्युतरायमहाराजस्यैव वरदाम्बिकया सह परिणयं सुन्दरतया संवर्ण्य ग्रन्थमिममरचयत् । अर्थाद् ग्रंथस्यास्य '**वरदांबिकापरिणय**' इति नाम कृतम् । चम्पूग्रन्थश्चायम् । 'गद्यपद्यात्मकं काव्यं चम्पूरित्यभिधीयते' इत्युक्तिमनुसृत्य तादृशमेवेदं कृतं काव्यरत्नम् । काव्यस्यास्य संक्षिप्तः कथासारः इत्थम् ।

प्रसिद्धे चन्द्रवंशे ययातिनृपतेस्तनूजस्तुर्वसुः । तुर्वसोरन्ववाये तिम्मभूपः । तस्य चेश्वरः पुत्रः तस्माच्च नरसिंहः । स च नरसिंहो विजयाय

प्रस्थितः प्राचीं विजित्य दक्षिणे चोलमभ्युपागच्छत् तत्र सरित्प्रवरां कावेरीं तीर्त्वा तद्दक्षिणे तटे सैन्यं निवेशयामास। चतुरङ्गबलसमेतश्चोलानृपालो युद्धाय सन्नद्धोऽभूत्। तत्रोभयोर्युद्धे प्रवृत्ते नृसिंहदेवः कुन्तप्रहारेण हस्तिपृष्ठात् च्युतं चोलेन्द्रं स्वयं गजपृष्ठादवतीर्य जीवग्राहं जग्राह। ततश्च विजयमालालंकृतः प्रमोदपरवशया स्वसेनया समुपेतः शत्रुराजधानीं प्रविवेश। ततो रामेश्वराभिमुखं गत्वा समुद्रं ददर्श। तत्र समुद्रतटे रामसागरादीनां वीराणां देवदानवादीनाञ्चाद्भुतानि च कर्माणि शृण्वन् रामेश्वरं नमश्चक्रे।

तत्रतत्र चानेकान् शत्रून् पराजित्य सागरे स्थिरे सलिले सेतुं बद्ध्वा श्रीरङ्गपुरीमाययौ। तदधीश्वरो महावीरः पुत्रकलत्रादिपरिवारपरिवृतः समागत्य पदयोर्निपत्य आत्मनो गत्यन्तराभावमुद्घोषयन् राज्यं नृसिंहसादकरोत्। कृपाविष्टमनास्तु नृसिंहस्तं तत्र पुरि प्रस्थाप्य तत्र दुर्गद्वयमग्रहीत्। ततश्च गोकर्णनाथं प्रणम्य तत्र तुलापुरुषदानपूर्वं नानाविधदानानि समतनोत्।

अनेकानेकनरपतिभिरनुगम्यमानः उत्तरां दिशं प्रतस्थे। तत्र काम्बोजवाल्हीकादीन् पराजित्य विविधैश्वर्यसमृद्धो निजराजधानीं विद्यापुरीं प्रतिनिवृत्त इति। ततश्च दिवसकरकुलोत्तंसां रामाम्बासुतामोम्बमाम्बां परिणीय तस्यामच्युतप्रसादादच्युतं पुत्रमेकमलभत। यौवनमारूढे चाच्युतराये नृसिंहदेवः सुरसख्यमभजत्। स्वर्गते पितरि अच्युतरायः सिंहासनमारुरोह।

एकदा उद्यानगतो भवान्यायतने कामपि रमणीयां बालां ददर्श। सुचिरं तां निर्वर्ण्य विस्मयस्तिमितो राजा नियन्त्रित इव निरभिज्ञ इव निश्चलध्यानशील इव निरवधिकानन्दमनुसन्दधान इव निरुद्धमनोवृत्तिः निर्निमेषवीक्षणः समतिष्ठत् क्षणम्।

सापि रविकुलललामभूता नाम्ना वरदाम्बिका गौरीपूजायै तत्र समागता साङ्गमिवानङ्गं तमवलोक्य असमाप्तक्रिया एव पवनान्दोलिता लता इव कम्पमानगात्रलतिका तं पुनःपुनर्लोचनाभ्यामापिबन्तीव पश्यन्ती स्वात्मनोऽप्य-

प्रभवन्ती मणिस्तम्भमवलंबितवती ।

एवं परस्परावलोकनसमनन्तरं व्यत्यस्तचित्ताविव विस्मृतनिमेषौ वि
र्जितनिखिलव्यापारौ परिहृतचैतन्याविवाभूताम् । ततश्च प्रधानमन्त्री तत्राग
राज्यकार्याय विदूषकमुखेन राजानं विज्ञापयामास । विज्ञापनामाकर्ण्य अनि
च्छन्नपि भूपतिश्चलितुं कथमपि समनीनहत् । राजकन्यापि निजागारमगात् ।
आगत्य भवनं अनभिभाषमाणा सखीजनं अनवेक्षमाणा परिचारिकावर्गं अशु
श्रूषमाणा गुरून् अवन्दमाना कुलदैवतम् अगणयन्ती वीणां अनालापयन्ती
सारङ्गान् अनुलापयन्ती हरिणीं अनर्तयन्ती बर्हिणं अनुद्ग्राहयन्ती कृत्रिमपुत्रिक
असंयोजयन्ती हंसमिथुनम् अनध्यापयन्ती राजकीरं तमेव निध्यापयन्ती
आवेदितहृदयतापातिशया चेतसि चिन्तां महतीं समतानीत् ।

अथ सखीभिः सानुरोधमनुबध्यमाना शालीनतया गौरीवने तस
विश्वम्भरापतेर्दर्शनात् प्रभृति कर्म किञ्चित् किमपि उदञ्चति स । चाञ्चल्य
मिदं वारयितुमहं न पारयामि समुचितमितः परं भवतीभिरेव निवारणीयमिति
निश्चयमुदीरयन्ती सैरन्ध्रीभिः समं सत्वरमभिवर्तमानं सौविदल्लं कमप्यद्राक्षीत् ।
आपृष्टश्च स प्रकृष्टमना विस्पष्टमाचष्ट । 'यदत्र भवतीं प्रार्थयमानायाच्युत-
महाराजाय दत्तां भवतीं प्रसाधयितुमेताः सपुरन्ध्रयः सैरन्ध्रयः प्रेषिताः ।
तदत्र भवतीं सत्वरमुद्युक्तां प्रसादनाय ' इति ।

तमनु मेदिनीपतिः मङ्गलाचरणसमुचितविविधालङ्कारशृङ्गारितः संबन्धि-
गृहं समासाद्य राजकन्यां विधिनोपयम्य अमुष्यै पट्टाभिषेकमहिषीपदमदात् ।

अथ तयोः कालात् कुमारोऽजायत । स चिन्नवेङ्कटाद्रिरिति चिन्हि-
तोऽभूत् । ततः अच्युतमहीमहेन्द्रो बाल्ये एव समुल्लसदसाधारणानुभावमुत्युदारं
कुमारमालोक्य शुभदिने दिदेश शाश्वतं युवराजपदमिति ।

अर्थात् तिरुमलाम्बा ग्रन्थेऽस्मिन् चन्द्रमारभ्य श्रीनृसिंहपर्यन्तं राज-
वंशमुपवर्णयन्ती तत्तनयमच्युतरायमुपवर्ण्य तस्याकस्मिकं वरदाम्बिकासन्दर्शनं

ततश्च विवाहमङ्गलं तनयोत्पत्तिं तनयस्य यौवराज्ये अभिषेकं च संवर्ण्य ग्रन्थं समापयति । परमच्युतरायस्य यो भ्राता श्रीकृष्णदेवराय इति जगत्प्रसिद्ध-श्चक्रवर्ती यश्च तत्कालीनपारदेशिकप्रवासिभिरैश्वर्यसमृद्ध्या भूमण्डले अपरोऽ-यमाखण्डल इति समुपवर्णितस्तस्य नामापि न जग्राहेत्येतदाश्चर्यमुत्पादयति । कर्णाटके किल कृष्णदेवरायाच्युतराययोरुभयोरपि नामनी सुप्रसिद्धे । श्रीकृष्ण-देवरायस्वर्गमनानन्तरमेव अच्युतरायः सिंहासनमध्यारोहदिति इतिहासे सुप्र-सिद्धम् । श्रीकृष्णदेवरायस्य नामानुल्लेखने किं वा कारणं स्यादित्येतत् तदिति-हासविद्भिरेव संशोध्यमिति तेष्वेव भारमारोप्य वयं प्रकृतमनुसरामश्च ।

अत्रान्योप्यस्माकमूहः । इयं वरदाम्बिका एव तिरुमलाम्बा स्वस्या एव प्रणयपरिणयं 'वरदांबिकापरिणय' नाम्ना व्याजहारेति । श्रीमानच्युतरायो वरदांबिकां परिणीय तां पट्टमहिषीपदे न्ययोजयदिति वर्णयन्ती आत्मानमच्युत-रायस्य पट्टमहिषीं सम्राज्ञीं तत्प्रेमसर्वस्वविश्वासभुवं च वर्णयति । यद्यपि ग्रन्थे वरदांबिकां वर्णयति तत्र च स्वयमेव वरदाम्बेति न स्पष्टं यत्रकुत्राप्यावेदित-वती । परं तथापि आत्मनो विशेषणानि यानि पदानि व्याहरति तैः पदैरेव इयमेव पट्टमहिषी सम्राज्ञो स्वस्या एव परिणयकथां प्रेमप्रवाहरूपां वरदांबिका-परिणयनाम्ना प्राकाशयत् इति अयमस्माकमूहः प्रमाणविरुद्धश्चेत् यः कोऽपि वा विद्वान् तत्तत्प्रमाणोदाहरणपुरस्सरं यथार्थयुक्तिनिरूपणपूर्वकं च विरुद्ध इति समर्थयेत्तर्हि सानन्दं तन्मतं वयमूरीकुर्म इति प्रतिपादयामश्च ।

कवयित्र्या अस्याः कालस्तु निर्धारयितुं सर्वथा अनुकूल एव । एकोन-त्रिंशदधिकपञ्चदशशततमे (१५२९) क्रिस्ताब्दे श्रीमदच्युतरायराज्याभिषेकः समभूदिति वदन्ति । क्रिस्तीयद्विचत्वारिंशदुत्तरपञ्चदशशतावधि अच्युतरायस्य राज्यमभूदिति च । अर्थात् श्रीमदच्युतरायस्य तनयस्यापि यौवराज्याभिषेक-वर्णनं काव्यरत्ने ग्रथितमित्यतः चत्वारिंशदुत्तरपञ्चदशशततमद्विचत्वारिंशदुत्तर-पञ्चदशशततमवर्षयोर्मध्ये एव चम्पूनिर्माणमभूदिति स्पष्टम् ।

यथा प्राचीना इतरे कवयः स्वोदन्तावेदने मूकीभावमवालम्बन्ते तथा नेयं महाभागा इत्यतो महानानन्दो नः। ग्रन्थान्ते चेयं इत्येकवाराकर्णनमात्र दृढावधारित नव्यकाव्य-नाटकालङ्कार-पुराणागम-रहस्य-सारस्यानुबन्ध-समिन्धान-स्वाभाविक-प्रतिभानुभावया, विद्याविशेष-निरवद्य-विद्वद्धुर-सकल-कविकुल-श्रवणानन्द-चिन्तितानन्ताभीष्ट-फलाश्रयण-विश्राणन-कामगवी-भवदशेष-भाषाविषय-सविशेषोन्मेष-चतुरिमगर्भित-सरस-प्रबन्ध-संदर्भया, विविधविद्याप्रगल्भराजाधिराजअच्युतरायसार्वभौमप्रेमसर्वस्वभुवा, निरुपाधिक-महोपकारनिर्माण-धर्म-निर्मल-हृदयया, निखिल-लिपि-विलेखन-नियत-वितरण-कृतहस्तहस्तारविन्दया, विरिञ्चचंचलनयनानखाञ्चलसमुदञ्चित-विपञ्ची-प्रपञ्चित पंचममधुरिमोदंचनविकस्वर-कण्ठस्वरया, विपुल-तलातल-विहार-विनोद-साकारावतीर्ण-शतपर्णासन-वरवर्णिनीमतिनिर्णायिकया-नानादेशप्रति-ष्ठितानेकविरचित-वाजपेय-पौण्डरीक-सर्वतोमुखमहाध्वर-द्विजवर-वितीर्यमा-णाशीर्विशेषपरिपोषितभाग्य-सौभाग्यया, नियतरक्षितकविकुटुम्बया, तिरुम-लाम्बया, निर्मितं वरदांबिकापरिणयं नाम चम्पूकाव्यं आचन्द्रतारकमभि-वर्धितामिति निरदिशत्। अयं च ग्रन्थान्तसन्दर्भः तिरुमलाम्बाया वैदुष्यं काव्य-नाटकालङ्कारपुराणागमादिरहस्याभिज्ञत्वं अनेकभाषानैपुण्यं नानालिपि-विज्ञत्वं कविकुटुम्बपालकत्वं धार्मिकत्वं द्विजवररक्षाप्रेम बहुयज्ञानुष्ठापनशीलत्वं द्रव्यदानस्नेहं विद्वज्जनसमितिसंस्थाप्रियत्वं कलाचातुर्यं पण्डितगोष्ठीसौभाग्यं च प्रकटयति। सौन्दर्यावतारतया च अस्या अभिनवरूपबहुत्वं अच्युतराय-प्रेमसर्वस्वभूततया विस्रम्भपात्रत्वं च सिद्धयति।

अस्माच्चम्पूग्रन्थात् उत्सर्पिणी उत्प्रेक्षाशक्तिः स्फारीभवन्ती धिषणा वर्णनकलायां प्रौढी वर्णचित्रेषु चातुरी च स्फुटमवसीयते। प्रचलत्स्वपि समास-तरङ्गेषु विशेषणस्रोतस्स द्राक्षारसामोद इव कश्चन नारीजनसुलभो मोदोऽस्याः कृतिमभिव्याप्नोति।

अस्याः सुललितपदविन्यासकलाकौशलमुपदर्शयितुं कानिचिदेव सुन्दराणि पदान्यत्र वाचकप्रीतये समुपाहरामः ।

'तमालिके ! समाकलय तमालतरु-कोमल मालिकाभिः वन्दनमालिकाम् । माधविके ! माकन्दधूलिधूसरिताः शोधय शिरीषकेसरपिच्छिकया काञ्चनवेदिकाः । कलापिके ! निरूपय कमलिकाकलितां कल्हारपरागरङ्गवल्लीम् । मञ्जरिके ! रञ्जय मणिदर्पणान् अंजसा कञ्जवनरेणुपुंजेन । अधिवासय वासरिके ! घनसाररजसा केसरकुसुमरसान् । वल्लकीसंलापिनी ! कल्हारमुकुलनायकविन्यसनेन समुल्लासय मल्लिकाकोरकहारवल्लीम् । लीलावति ! निशमय ममालापम् । बालाशोकमुकुलमालायाः परिहर भसलजालकोलाहलम् कुत्राशयस्तव कुसुमवति ! चित्राणि वितनु शतपत्राभिनवबन्धनानि कोमलानि कुसुमदामानि इत्यादि ।

त्रिलसदलसचारैर्विस्मयस्मेरतारैः
प्रणयरसगभीरैः प्रान्तविस्तारशारैः ।
वरतनुरवदातैर्वञ्चितासीत् सुशीतैः
प्रसवविशिखदूतैः पार्थिवस्याक्षिपातैः ॥१०६॥ इति

समयेऽस्मिन्काव्ये गद्यानि पद्यानि सर्वाण्यपि रससंभृतान्येव । अतो ये रसिकास्तान्वयमावेदयामो यदवश्यं ग्रन्थरत्नमिदं संगृह्य अमन्दानन्दतुंदिला भवन्तु भवन्तः सर्वे । मूल्यं रूप्यद्वयम् । अन्तर्बहिस्सुन्दरमिदं पुस्तकं सविस्तरया आंग्ल संस्कृतभाषामय्या प्रस्तावनया समलंकृतं व्याख्यया च । 'चौखम्बासंस्कृतपुस्तकालय बनारस' इत्यत्र तथा च सुन्दरलाल जैन पंजाबसंस्कृतपुस्तकालय सैदमिट्ठाबाजार, लाहौर इत्यत्रापि लभ्यते ।

कर्णाटकसार्वभौमप्रियवल्लभाया देव्याः तिरुमलाम्बायाः विषयमिमं तथा च तस्या ग्रन्थरत्नं च सामान्यतो निरूपितमिदानीमस्माभिः । एवमेव

सत्यवकाशे अन्यासामपि कवयित्रीणां विषयमुद्दिश्य विवेचयामो वयम् इत्याश्वासयामश्च ।

संप्रति लेखेऽस्मिन् भूयान् विषयः वरदांबिकापरिणयग्रन्थात् तथा तत्र प्रकाशितायाः प्रस्तावनायाश्च गृहीत इत्यतस्तेषामुपकारभारं कृतज्ञताभावेन वहाम इत्यावेद्य विरमामो विस्तरात् इत्यलम् ।

पद्मा मोहनप्रणयः

जय जगदीश हरे भगवन् करुणाकर भजतां कल्पतरो आर्तजनतार्तिहर ज्ञानानन्द हरे इत्यादिभिर्मधुरमधुरैः सुललितललितैर्वचोजालैर्भगवन्तं भक्तवत्सलमभिष्टुवाना अधरीकृतकोकिलमधुरस्वरा कापि ललना बाला वराप्सरोरूपा लावण्यमयी जीर्णतरचीरवल्कलावृतशरीरापि परिदृश्यमानवक्षस्थलादुःखदैन्यदारिद्र्यमूर्तिरिव दृश्यमानापि नवयौवनतेजोविशेषा कामिजनमनोनयनानन्ददायिनी गानलोला करकलितभिक्षाभाजना प्रखरतरेऽपि प्रचण्डकिरणातपे संचरति स्म ।

अखिलजगत्कर्णताटङ्कायमाने कर्णाटके कर्णाटकराज्यरमारमणानां महाराजाधिराजानां वीरनृपतिप्रवराणां प्रजासुखैकतत्पराणां श्रीचामुण्डी नञ्जुण्डेश्वरवरकृपापात्राणां राजधानी विविधप्रजासुखसाधनसंपूर्तिमहिता सुप्रसिद्धा महिशूरपुरी विदिता एव विश्वेषामपि जगति । नगरेऽस्मिन् कोऽपि नवावतार इव भरताचार्यस्य सरससाहित्यसङ्गतिकलाकुशलः कर्णाटकनाट्यकलोद्धारतत्परः यशोलोलुपो विनोदरत्नाकरो नाट्याचार्यवर्यो विविधनटकर्मवीरो महोदयः श्रीमानानन्दरायो नाम गायन्तीं वराप्सरोरूपामुर्वशीमिवापरां भिक्षुकीं

संप्रेक्ष्य तत्क्षण एव सञ्जातविस्मयस्तां गृहान्तरमाहूय यावद्बुद्धिबलोदयं गीतकलाविज्ञानमुपदर्शयेत्यादिश्य प्रियमित्रेण समं शेखरेणोपविश्य गीतमाधुरीसंसेवनबद्धादरोऽभूत् ।

क्षुत्तृषार्तापि सा बाला वीणावेणुमृदङ्गादिसंगीतसाधनविरहितापि पिकस्वरेण मञ्जुलतरेण स्वभावमधुरेण गानचातुर्येण सशेखरं नटवीरमानन्दरायममज्जयदमन्दानन्दसिन्धौ । समुपजातहर्षविस्मयस्तामपृच्छत् आनन्दराय: —'का त्वं, कुत्रत्या, कस्य पुत्री, का ते माता, किं विवाहिता उत कन्या, कुत्र ते निवास:, अत्रागत्य कति वा दिनान्यभूवन्निति ।

साऽब्रवीत्—महाभागा: ! अहमस्मि काचन बाला अनाथा अगतिका च । नास्ति मे माता पिता भ्राता बन्धुरपि । कस्मिंश्चिदग्रहारे धनधान्यसमृद्धे सत्कुले जन्म लब्ध्वापि शैशवे एव कतिचिद्वत्सरेभ्य: प्राग् सञ्जाततुङ्गभद्रामहाप्रवाहजलप्रलयावसरे प्रजापशुप्रभृतिवस्तुषु सकलेषु नामशेषतामुपगतेषु कुत्रापि केनचिदजापालेन परिपालिता कालमयापयं कञ्चित् । करुणारहितो निर्घृण: कराल: कालस्तमपि सपत्नीकं ससुतं सनिलयं एकस्यां भयङ्करकारायां तमस्विन्यां युगपदशनिपातेन समदहत् वत्सरात् प्राग् । अत्यल्पजनावसथे कुमार्गे आत्मरक्षणमनुष्ठातुमशक्ता ईश्वरदत्तेन कण्ठमाधुर्येण गायनकलानैपुण्येन च भिक्षालब्धान्नवृत्ति: सञ्चरन्ती समागतास्मि राजधानीम् । ईदृशाया दुर्भाग्याया दु:खानुभवायैव गृहीतशरीराया: किं वृत्तश्रवणेनेति भाषमाणा गद्गदितकण्ठा बाष्पपूर्णलोचना रोदितुमारेभे ।

श्रुतविदितवृत्तान्त: श्रीमानानन्दराय: किं ते नामेत्यपृच्छत् । साप्याह-पद्मा इति । तत: सोब्रवीत् 'अयि पद्मे पद्माक्षि त्वयि मे गरीयाननुराग: अतो दुहितृस्थाने मे भूत्वा भवने मे सुखेन वसतु भवती । गृहिणी मे महोदारा रक्षति त्वां सुखेनैव । निश्चिन्ता भूत्वा कलाकौशल्यमाप्नोतु विशिष्टं मत्त: ' इति तामानन्दयत् । याहमटन्ती गृहाद् गृहं अन्नचिन्तातुरा दु:खा-

न्यनुभवती महोदारैर्दयालुभिराद्दता कथं नाङ्गीकुर्यात् भवद्भिरावेदितमिति वदन्ती हर्षातिरेकपुलकितगात्री समवर्षदानन्दबाष्पपूरम् । संवादमिममुपनिशम्य साध्वी श्रीमदानन्दरायगृहिणी रमादेवी तत्क्षणे एव सूक्ष्मतरेण महार्घ्येण वस्त्रेण तां पर्यवेष्टयत् । अत्याजयच्चीरवल्कलम्, अभ्यञ्जनमकारयत् सुगन्धतैलेन, अभोजयच्च मिष्टिमिष्टैर्भोज्यविशेषैः । स च पद्मा पद्मनयना ललनाकुलमूर्धन्या स्वाभाविकं गाननैपुण्यं अभिनयकलाकौशल्यमपि अप्रयत्नेनैव समुपलभ्य आनन्दरायरमादेव्यौ अतितरां प्राहर्षयत् ।

श्रीमानानन्दरायश्चतुरचतुरान् नटीनटान् गायनवादननर्तनादिकलाकुशलान् संगृह्णन् तैरभिनवप्रयोगान् तत्र तत्र नगरेषु प्रदर्शयन् अनुपमं यशः संपदमपि संपादयन् असाधारणं कर्णाटकनाट्यकलासौन्दर्यम् इति अखिलेपि किल भारते प्राख्यापयत् ।

श्रीमता आनन्दरायेण संगृहीते नटसमुदाये प्रेक्षकमनोमोहनो मोहनो नाम मूर्तिमान् मन्मथ इव मनोहराकारो नाटकाभिनयचतुरः कोऽपि युवा पद्मापद्माक्षिगोचरो युवत्या ललनाया मनो ललितमपजहार । नाटके नायकपात्रमुद्वहन्नयं नायिकापात्रमभिनयन्तीं पद्मां प्रयोगानुसारेणेव मन्दहाससुन्दरवदनः अमन्दानन्दतुन्दिलो विकसितलोचनाभ्यां तामनिमिषमालोकयन् चुम्बनाभिलापस्फुरिताधरेण तदीयं सुधामधुरतरमधररसमास्वादयन्निव मञ्जुलाक्षैरालापयन् प्रेमरसप्रवाहमेव प्रवाहयति स्म । एवं पद्मापि तदीक्षणस्पर्शहासाद्यभिनयैरभिवर्धितानङ्गविकारा नायिकाया उचितेनाभिनयेन मोहनमानन्दयन्ती प्रेक्षकाणामन्तरङ्गाण्याकर्षति स्म । एवमेतयोरुभयोरभिनयचातुर्येण प्रतिनाटकप्रयोगे सहस्राधिका लोकाः स्थलमलभमाना धनराशिमभिवर्षन्तः कथमपि रङ्गमण्टपे महता प्रयत्नेन प्रवेशमुपलभ्य तिष्ठन्तो रूपकप्रेक्षणेन हृदयमाह्लादयन्ति स्म । श्रीमानानन्दरायोपि आत्मनोऽभिमुखमागच्छन्तीं प्रवाहरूपेणेव सम्पदमगण्यां संपादयन् धर्मसंस्थाभ्यो मुक्तहस्तेन साहाय्यमनुतिष्ठन् अनपत्य-

तथा किञ्चिदिवोद्विग्नमानसोऽपि पद्मामेव पुत्रस्थाने मन्यमानः सूक्ष्मया दृशा पद्मामोहनयोरनुरागं निरीक्षमाण अन्वमोदत च ।

एकदा रहसि प्रियतमया रमादेव्या गृहिण्या सममालोचयन् सुमङ्गले मुहूर्ते उभयोर्विवाहमङ्गलविधिं सम्पाद्य सङ्गमयितुमाचकांक्षे । तथा च रहः पद्मां मोहनमपि पृथक् पृथक् स्वसन्निधावाहूय तयोरभिप्रायमजानात् । उभावप्येकत्र स्वसमक्षमानीय मन्दहासोत्फुल्लकपोलयुगलां मन्दाक्षमन्दाक्षरामहासयन्नन्दिनीं मोहनमपि । ततो वैशाखे वसन्तमनोहरे सुमङ्गले मुहूर्ते तौ पद्मामोहनौ विवाहविधिना दम्पती अभूताम् ।

निसर्ग एव सौन्दर्यशालिनी पद्मा सत्यप्यभिनयचातुर्ये नाटकेषु प्रेक्षकान्तरङ्गप्रीणने लज्जाविशेषमुद्वहन्ती नीतिस्खलनमूहमाना पातिव्रत्यविध्वंसमुत्प्रेक्षमाणा संगीताभिनयकलासु अविदित्वैव प्रमादबाहुल्यमुपदर्शितवती । एतत्कारणमनुमीय श्रीमानानन्दरायोऽपि चतुरामपरां नटीं संपाद्य पद्मामभिनयप्रसङ्गादपावर्तयत् । अचिरेणैव सा मोहनादनङ्गविहारमनुभवन्ती तेजोविशेषमादधाना समनन्दयद् आनन्दरायं सपत्नीकम् । समपूरयच्च तत्क्षणे एव तस्या दोहदानखिलान् । पूर्णेषु दिवसेषु पुत्ररत्नमजीजनत् । महोत्सवमकारयदानंदरायः । ततो मोहनोऽपि नाटकेष्वभिनयं नान्वमोदत । तदभिप्रायमन्वमन्यतानंदरायोऽपि । ततः सौभाग्यशालिनी पद्मावती भगवतो भक्तवत्सलस्य करुणानिधे रमारमणस्य ज्ञानानंदरूपस्य नन्दनन्दनस्यैव कृपा अपरानुपमा श्रीमदानंदरायं रमादेवीं च मया सङ्गमय्य मोहनमपि संयोजितवतीति मन्यमाना प्रतिदिनमप्रमत्ता त्रिकालं स्नात्वा शुचिर्भूता भक्तिपरवशा भगवद्गुणवर्णनपराणि गीतानि गायन्ती विविधैर्नृत्यविशेषैरपि भगवन्तमसेवत । तस्या अनन्यया भक्त्या मोहनोपि भगवद्भक्ततामवलम्बमानो मञ्जुलतरैर्गायनैरुपगायन् व्यस्मरद्देहभानम् । श्रीमानानंदरायो रमादेवी च भगवति निरतिशयां भक्तिमभजताम् । नाटकप्रयोगे वैलक्ष्यमावहन् आनंदरायो नटनामपि अनवधानता-

मुद्वीक्ष्य नाटकप्रयोगसंस्थां नामशेषतामगमयत् । तथा च सर्वेऽमी भगवत्सेवा-नुष्ठानपरायणा अखिलां सम्पदमपि भगवद्भक्तिपरवशो भगवद्भक्तपूजायामुप-युञ्जन्तः अमन्दानन्दतुन्दिलाः कालमयापयन् ।

एवं चैहिकामुष्मिकसुखभाजोभूवन्नित्यलम् ।

श्रीमतः सुभाषचन्द्रस्य जीवनचरितम्

एकश्चन्द्रस्तमो हन्ति न च तारागणोऽपि च

विशाले आकाशे समुदितस्य अखिलस्यापि जगत एव सुनिर्मलैः कलासहस्रैः परमाह्लादकरस्य अमृतकिरणस्य चन्द्रस्य जन्म कदा बभूवेत्यावेद-यितुमसमर्था अपि वयं सुगृहीतनाम्नः श्रीसुभाषचन्द्रबोसमहोदयस्य जन्म (२३) त्रयोविंशे दिनांके (तारके) जानेवारीमासे १८९७ तमे ऐशवीयाब्दे चतु-र्विंशतिमण्डलान्तर्वर्तिकोडालियाग्रामे समभूदिति निश्चयेन निवेदयामो वयम् ।

श्रीसुभाषचन्द्रस्य पिता श्रीमान् रायबहादुर जानकीदासमहाभागः जननी च धन्या अष्टपुत्रा श्रीमती सौभाग्यवती प्रभावतीदेवी । श्रीरायबहादुरजानकी-दासमहोदयः उदारमतवादी सुसंस्कृतो विद्याप्रेमीचासीत् । सौ० प्रभावतीदेवी चापि धर्मशीला परोपकारनिरता भगवति भक्तिभावभरिता चाभूत् । एव-मत्युत्तमयोर्भाग्यतो दम्पत्योः समुत्पन्नोऽयं वीरकुमारः खण्डत्रयगीतकीर्तिः यदि न भवेत्तर्हि एव आश्चर्यस्यास्पदम् । श्रीसुभाषचन्द्रस्य सहोदरा भ्रातरः सप्त-भगिन्यश्च षट्संख्याः सन्ति । भाग्यवतामेषामासामपि च नामान्येवम् । १ ब. सतीशचन्द्रः २. सुधीरचन्द्रः ३. डॉ० सुनीलचन्द्रः ४. नेताजी सुभाषचन्द्रः ५. श्रीशैलेशचन्द्रः ६. श्रीसंतोषचन्द्रः ७. ब. शरच्चन्द्रः ८. श्रीसुरेशचन्द्र-श्चेति भ्रातॄणाम् । प्रमिला, सरला, ताराबाला, मणिला, प्रतिभा, कनकलता

चेति भगिनीनाम् । एतेषु संतोषचन्द्रः १९३० तमे क्रिस्ताब्दे प्रमिला च १९३६ तमे क्रिस्ताब्दे च परलोकमगच्छताम् ।

गुरुशोधार्थं गमनम्

श्रीसुभाषचन्द्रस्य प्राथमिकं शिक्षणं कटकनाम्नि नगरे समभूत् १९१३ तमे क्रिस्ताब्दे वयसः षोडशे वर्षे प्रवेशपरीक्षायां (म्यट्रिक) यशस्वितया द्वितीयं क्रमाङ्कमधिगत्य समुदतरत् । ततो महाविद्यालये (कालेज) शिक्षणार्थं सुभाषोयं कलकत्तानगरीमभ्येत्य प्रेसिडेन्सी महाविद्यालयं प्राविशत् ।

बाल्ये मात्रा वात्सल्येन कथितानां धार्मिकाणां कथानां परिणामो मनस्यस्य विचित्रं कौतूहलमुदपादयत् । तेन स महाविद्यालयप्रवेशोत्तरं प्रथमे एव वर्षे सामान्येतरविद्यार्थिन इव विविधविलासविषयेषु मनो नासज्जयत् किन्तु धार्मिकग्रन्थानां चिन्तने वाचने च तत्परोऽभूत् । तेन तस्य हृदयमधिकाधिकमेव धर्मविषये स्थैर्यमवाप । मध्यम (इण्टर) वर्गे विद्यमानोऽयं 'कोऽहं कुत आयातः तत्त्वं चिन्तय तदिदं भ्रातः' इति वचनमनुसरन् ब्रह्मज्ञानं संपादयितुमभिलषन् सद्गुरुं शोधयितुं कामयमानो महाविद्यालयाभ्यासं पर्यत्यजत् । विविधानि पुण्यक्षेत्राणि पर्यटत् । शिरोबद्धजटाजूटान् भस्मरूपिताङ्गान् असंख्यान् वैरागिणः समवलोक्य तेषु स्वेष्टसिद्धिर्भवेद्वा न वेति पर्यशोधयत् । परं सर्वत्रापि उदरंभरिणो वैरागिणः साधुवेषा दाम्भिका एवेति तत्त्वतो विज्ञाय पुनः कलकत्तानगरमागत्य विद्यालयं प्रविष्टः अवशिष्टमाध्यमपरीक्षाविषयमभ्यस्य १९१६ तमे क्रिस्ताब्दे तस्यां परीक्षायां यशस्वितया प्रथमवर्गे उत्तीर्णोऽभूत् ।

यौरोप्यप्राध्यापकमुखे चपेटिकाप्रहारः

(सिनियर) बी ए वर्गे अभ्यस्यन्नयमेकदा स्वाभिमानं स्वदेशाभिमानं च तदानींतनाय कस्मिंश्चित् प्राध्यापकाय प्रादर्शयदित्थम् ।

प्रेसिडेन्सीमहाविद्यालये ओटन् नामा कोऽपि यौरोप्यः प्राध्यापकः सततं भारतीयान् विद्यार्थिनस्तुच्छान् मन्यमानः अवहेलयति स्म। स एकस्मिन् प्रसङ्गे भारतीयानतितुच्छतया अवहेलनं कुर्वन् वदनकुहरान्मुक्ताफलानीव विकिरामीति मन्यमानः कानिचित् अक्षराणि समुदगिरत् तावदसौ तत्क्षणं एव एष सुभाषचन्द्रमहोदयो रोषारुणितनयनस्तस्य ताम्रपटले कपोले चपेटिका सरभसं प्रादात्। भारतीयेषु स्वाभिमानो जाग्रतीत्येवमसूचयत् च। परमयं प्रहारस्तत्काले पुनरेवमुच्चाराकरणमुपदिदेशैव तस्मै किन्तु श्रीसुभाषचन्द्रस्य तस्माद्विद्यालयाद् निस्सारणे कारणमभूत्।

ततश्चायं श्रीमतां सर् आशुतोष मुखर्जीमहोदयानां साहाय्येन स्काटिश चर्चेसमहाविद्यालये प्रवेशमुपलभ्य १९१८ तमे क्रिस्ताब्दे बी.ए. परीक्षायां प्राथम्येन समुत्तीर्णः प्रशस्यं यशः समलभत।

देशसेवकः आय.सी.एस

तदग्रिमे वर्षे एव आय.सी.एस. परीक्षाभ्यासार्थं विलायतं गत्वा १९२० तमे क्रिस्ताब्दे आय.सी.एस. परीक्षायां प्रथमतः पञ्चपुरुषाङ्केषु ततश्च कैंब्रिजविश्वविद्यालये बी.ए. परीक्षायां प्रशस्यं यशो लब्ध्वा स्वागमनेन भारतं देशमलङ्करोत्। महत्तया सुप्रथितायां आय.सी.एस. परीक्षायामुत्तमतया उत्तीर्णोऽप्ययं महाभागया परकीयसाम्राज्ये प्राप्यमप्युच्चाधिकारमनपेक्षमाण आजन्मब्रह्मचर्येण स्थातुं कृतप्रतिज्ञो भारतमातरं पारतन्त्र्यशृङ्खलानिगडितचरणामवलोकयन् नितान्तं तंतप्यमानमानसस्तां स्वतन्त्रां कर्तुं बद्धपरिकरः सर्वविधैरपि प्रयत्नैः साधयितुं सन्नद्धोऽभूत्। भारतीयनेतृशिरोमणिं स्वार्थलेशविधुरं प्रथितयशसं अगण्यां सम्पदं सम्पाद्यापि स्वदेशबन्धुसंरक्षणप्रवणतया क्षणादेव निष्किञ्चनत्वं धारयन्तं ब. चित्तरंजनदासमहोदयं गुरुत्वेन समकल्पयत्।

सर्वकारनासा मरीचिचूर्णभरिता

श्रीमान् देशबन्धुश्चित्तरंजनदासः कलकत्तानगरे बंगालप्रान्तराष्ट्रीयमहा-विद्यालयं प्रास्थापयत् । तथा तन्महाविद्यालये प्रधानाध्यापकपदे (प्रिन्सिपाल) नवतरुणमेनं सुभाषचन्द्रं प्राथम्येन नियोजयामास । परमयं सुभाषचन्द्रो भारतीयेषु नवतरुणेषु आंग्लविद्यावैशारद्यापादनादपि युद्धकलानैपुण्यं प्रापयितु-मपेक्षमाणो महाविद्यालये प्रधानाध्यापकपदं परित्यज्य नवतरुणानां सैनिक-दलनिर्माणार्थे प्रयत्नमारभत । राष्ट्रीयसैनिकदलस्य वर्धमानं कार्यमवलोकयतः सर्वकारस्य नासा मरीचीचूर्णेन संभृता इव समभूत् । तेन सन्तप्तः सर्वकारः सुभाषचन्द्रमहोदयं प्रतिबद्धुं तस्मिन्नभियोगमारचयत् । तस्मिन्नभियोगे षण्मासं यावत् सपरिश्रमकारावासेन दण्डितोऽभूत् । श्रीसुभाषचन्द्रमहोदयस्य सर्वकार-कृतः प्रथमोऽयं दण्डः ।

सर्वकारकृतान्युग्रशासनानि

१९२२ तमे क्रिस्ताब्दे आक्टोबरमासे श्रीबाबूसुभाषचन्द्रं कारागृहाद् अमोचयत्सर्वकारः । अस्मिन्नेव वत्सरे गयाक्षेत्रे देशबन्धुचित्तरञ्जनदासमहो-दयस्याध्यक्षेण ' भारतजानपदमहासभा ' (कांग्रेस) समभूत् । तस्मिन्नधिवेशने शासननिर्माणसभाप्रवेशबहिष्कारनिर्णयस्य वैयर्थ्यं अनुपयुक्ततां चापि सभायां सुभाषोयमतिशयेन रुचिरं संयुक्तिकं च समार्थयत् । तस्य भाषणमिदं परि-णामकारी बभूव । गयायामेव शासनसभा (कौन्सिल) प्रवेशनिर्णये यशस्विनं कर्तुं कांग्रेसस्वराज्यपक्षं प्रास्तापयत् । गयातः प्रतिनिवृत्य कलिकत्तानगरमुपेत्य श्रीमान् ब. चित्तरंजनदासमहाशयः स्वीयस्वराज्यपक्षसमर्थनाय ' फारवर्ड ' नामकं किञ्चिदांग्लभाषामयं दैनिकं पत्रं प्रकाशयितुमारभत । पञ्चषण्मासपर्यन्तं तस्य प्रधानसंपादको भूत्वा श्रीसुभाषचन्द्रमहोदयः ततः परित्यज्य तत्कर्म कृषीवलानां कर्मकराणां संघटनाय प्रयतमानः वंगीययुवकपक्षमेकं (यंग बंगाल-पार्टी) प्रास्थापयत् । १९२४ तमे ऐशवीयेऽब्दे सुभाषचन्द्रः कलकत्तानगर-

पालिकायाः (म्युनिसिपल कार्पोरेशन)मुख्याधिकारी समभूत् (चीफ् आफिसर)। पुनस्तदधिकारपदमपि षण्मासाभ्यन्तर एव परित्यक्तवान् । तस्मिन् किल समये श्रीदेशबन्धुचित्तरंजनदासमहोदयस्य स्वराज्यपक्षो लोकप्रियः कार्यक्षमश्च संवृतः । तेन वंगीयः सर्वकारो रोषारुणितनयनो वंगदेशे नवनवान्युग्रशासनानि समुदघोषयत् । तस्य प्रथमतया परिणामः श्रीसुभाषचन्द्रस्य तत्सहकारिणां च बन्धने समभूत् । प्रथमतः कांश्चिद्दिवसान् अलीपूरकारागृहे न्यवासयत् सर्वकारः । ततः क्रमेण बघ्याणपूरकारागृहे मुर्शिदाबादबंधनगृहे च निहितवान् । ततश्च वंगदेशे तन्निवासेन स्वस्य अहितमेव भवतीति निश्चित्य ब्रह्मदेशे मंडालेकारागृहे प्रास्थापयत् ।

सर्वकारस्याप्यन्ते विवेकोदयः

मंडाले प्रदेशे वायुरत्युष्ण इत्यतः सुभाषबाबूमहोदयस्यारोग्यं विकृतमभवत् । प्रतिदिवसं स क्षीणशक्तिरभूत् । तत्परिणामश्च भयङ्करो बभूव । रक्तक्षयसदृशो दुर्धरो रोगस्तमाक्रमत । इममुदन्तमुपलभ्य लोकास्तं मोचयितुमान्दोलनं प्रावर्तयन् । तत्परिणामेन सर्वकारस्तं मंडालेकारागृहतः इनसानकारागृहमानयत् । तथापि स रोगो वर्धमानस्तस्य अहितायैवाभूत् इनसानेपि । ततः सर्वकारे विवेकोदयेन सुभाषचन्द्रो दिनाङ्के १६ तारके मेमासे कारागृहादुन्मोचितोऽभूत् ।

सुभाषचन्द्रस्य महाराष्ट्रे सञ्चारः

बन्धनागाराद्प्रत्यागतः श्रीसुभाषचन्द्रः कांश्चिद्दिवसान् विश्रान्तिसुखमन्वभवत् । ईषद् आरोग्यमुपलभ्य पुनर्देश-जन-हिताचरणाय बद्धपरिकरोविदेशीयवस्तुबहिष्करणाय स्वदेशीयवस्त्रप्रसारकरणाय च (खादी) प्रयत्नमकरोत् । तदादिकर्मकरणाय युवकसङ्घं तथा हिन्दीस्वातन्त्र्यसङ्घं नाम च संस्थाद्वयं प्रतिष्ठापयाञ्चक्रे । १९२७ तमे दिशम्बरावसाने मद्रासनगरे अधिनिविष्ठाया भारतजानपदमहासभाया अखिलभारतीयकांग्रेससमितेः प्रधानमन्त्रिपदे नियुक्तोऽभूत् । तथा च बंगालप्रान्तीय कांग्रेससमितेराध्यक्ष्यपदेपि सन्नियो-

जितः। संपूर्णं स्वातन्त्र्यं प्रचारयितुं इण्डिपेन्डन्स लीग नामकं संघमेकं प्रतिष्ठाप्य बंगालप्रान्तीयशाखासंस्थायाः प्रामुख्यं च स्वतो जग्राह। १९१८ तमेऽब्दे मुंबापुर्यामधिनिविष्टायां सर्वपक्षीयपरिषदि पं. मोतीलालनेहरूमहोदयस्याध्यक्ष्ये 'स्वराज्यघटनासमिति'रेका निरमीयत। एतत्समित्यास्सभासदस्योप्यासीत्। अस्मिन्नेव वर्षे पुण्यपत्तने प्रवृत्तस्य महाराष्ट्रप्रान्तपरिषद् अधिवेशनस्य सुभाषचन्द्र एवाध्यक्षपदमलंचकार। तत्परिषत्कार्यं समाप्य महाभागोऽयं महाराष्ट्रे प्रमुखस्थानेषु सञ्चारमाचर्य उज्ज्वलतरैरुपन्यासैरतितरां स्फूर्तिमुदपादयत्। एतेन सञ्चारेण महाराष्ट्रवंगयोस्संबन्धो द्रढीयान् समजनि।

कांग्रेसपरित्यागः

१९२९ तमेऽब्दे लाहोरनगरे प्रवृत्ते कांग्रेसाधिवेशने श्रीसुभाषचन्द्रोऽयं संपूर्णस्वातन्त्र्यप्रस्तावममण्डयत्। स च प्रस्तावो बहुमतैस्सम्मतोप्यभूत्। एतेन प्रस्तावेन संयोजिता भारते प्रतिसर्वकारस्य प्रतिष्ठा विधेया इत्येवं रूपा उपसूचना तदानीं कांग्रेससम्मता नाभूत्। बंगालप्रान्तीय कांग्रेस्समितेर्नियोजनविषये तीव्रश्च मतभेदः समभूत्। तेन गांधीवादिभिरनेकदा विवादावसरोप्युत्पन्नः। तस्मिन्प्रसङ्गे कांग्रेससदस्यत्वमपि परित्यक्तवानयम्।

प्रथमं स्वातन्त्र्यदिनं सुभाषचन्द्रस्य पुनः कारागृहनिवासः

लाहोर कांग्रेसतोऽनन्तरं श्रीश्रीनिवासअयङ्गारमहोदयः श्रीसुभाषचन्द्रश्च इण्डिपेण्डन्स लीग नामकं संघं प्रतिष्ठाप्य २६ जानेवारी १९३० दिनं स्वातन्त्र्यदिनमिति अखिलेपि भारते विशेषतश्च वंगदेशे प्रवर्तयेदेवेति निरधारयत्। तथा वंगदेशे स्वातन्त्र्यदिवसे कार्यक्रमोऽयं महता उत्साहभरेण प्रवृत्तश्च। कलकत्तायां महती विराट्सभा सममिलत्। तदध्यक्षस्थानं वीरवरः सुभाषचन्द्र एवालङ्करोत्। स्वातंत्र्यदिवसस्य उचितमेव भाषणमभूत्। सर्वकारश्च तेन भाषणेन राजद्रोहमारोप्य तस्मिन् अभियोग कृत्वा एकवत्सराबधिकेन कारावासेन दण्डितवान्।

धूमयानविश्राममंदिरे (स्टेशन)प्रवृत्तोऽभियोगः

एकं वत्सरं यावत्कारावासमनुभूय प्रत्यावृत्तः सुभाषो लाहौरनगरे १९३१ तमेऽब्दे दिशंबरे मासे ३१ दिनांके तारके संपूर्णस्वातन्त्र्यस्मृतिदिवसमनुपालयितुं श्रीसुभाषनेतृत्वेन नैकसहस्रजनसंभृतो विविधवाद्यवैभवपुरःस्सरो यात्रोत्सवः (मिरवणूक) प्रवृत्तः। एतदुत्सवप्रवृत्ते जनसम्मर्दे रक्षापुरुषाः (पोलिस) निरपराधिनो लोकान् दीर्घयष्टिप्रहारैरताडयन्। प्रहारोयं सुभाषचन्द्रेऽप्यपतत्। १९३२ तमेऽब्दे कलकत्तानगरे सुभाषचन्द्रस्याध्यक्ष्येण राजकीयः बद्धोन्मुक्तजनानां कापि महती सभा समभिलत्। अत्रापि सम्मिलितेषु जनसम्मर्देषु रक्षापुरुषा यष्टिप्रहारैरमर्दयन्। प्रसङ्गेऽस्मिन् सुभाषचन्द्रो बलवता प्रहारेण पीडितोऽभूत्। ततः केषुचिद्दिवसेषु प्रयातेषु स्वदेशीयविषयप्रचाराय सञ्चरितुमारभत। परं सर्वकारो मंळहद्दमण्डले प्रवेशं प्रत्यबध्नात्। प्रतिबन्धशासनमिदम् अमुनराधूमयानविश्रांतिमन्दिरे आगते च धूमयाने समयोजयत्। नाहमेतत्प्रवेशनिर्बन्धशासनमनुपालयामीति प्रत्यादिशत्। तदा तद्धूमयानविश्रान्तिगृहे सामान्यजनोपवेशनप्रदेशे (वेटिंग रूम) अभियोगः प्रवर्तितः। प्राड्विवेकोपि सप्तदिवसान्यावत् कारावासेनादण्डयत्।

नगरपालिकामहासभया सर्वकारनिषेधः

इमं कारावासमनुभूय श्रीसुभाषचन्द्रो बहिरायात्। पुनर्जानेवरीय २६ दिनांके तारके कलकत्तानगरे सुभाषनेतृत्वेन स्वातन्त्र्यदिनार्थे महती जनसम्मर्दभरिता यात्रा निर्गता महता उत्साहभरेण। परं रक्षापुरुषाः तदानीमपि यष्टिभिः प्राहरन्नेव जनान् अनेकान्। तदानीमपि श्रीसुभाषचन्द्रो यष्टिप्रसादमलभतेव। तदवसरे रक्षापुरुषाः शासनोल्लंघनं शान्तताभञ्जनं च सुभाषेण कृतमिति अभियोगद्वयं तस्मिन्नरचयन्। तदा च षण्मासं यावत्सपरिश्रमं कारावासेन शिक्षितोऽभूत्। तदवसरे कलकत्तानगरपालिका सर्वकारकृतं सुभाषशासनं प्रत्यषेधत् तथा च श्रीसुभाषचन्द्रमभ्यनन्दच्च।

आरोग्यसंपादनकृते परदेशगमनम्

१९३१ तमेऽब्दे दिशम्बरमासे पुण्यपत्तने श्रीसुभाषचन्द्रस्याध्यक्ष्येण महाराष्ट्रयुवकपरिषत् सममिलत्। तत्कार्यं समाप्य तस्मिन् कलकत्तानगरं जगमिषति कल्याणबाष्पयानविश्रान्तिसदने जानेवरीद्वितीयदिनाङ्कतारके तमबध्नात्सर्वकारः। तदा शिवणीकारागृहे तमध्यवासयन्। तत्कारागृहे निवसति सुभाषे उदरशूलरुजा आक्रान्तः सः। राजयक्ष्मा रोगराजोपि तमाक्रामतेवेति भीतिरुत्पन्ना। ततः सर्वकारस्तं जबलपुरे कारागृहे समानयत्। २० तमे दिनांके वासन्तीदेवी सुभाषचन्द्रमवालोकयत् कारायाम्। जबलपुरे समानीतस्याप्यारोग्यसंपादनकर्मणि किंचिदपि फलं सर्वथा नाभूत्। किन्तु रोगः अधिकाधिकं यथा वर्धमानोऽदृश्यत। ततः सर्वकारो दृढारोग्यं संपादयितुं युरोपदेशं प्रयातुमन्वमोदत। ततः श्रीसुभाषचन्द्रो युरोपखण्डेजिगमिषुः फेब्रुवारी २३ तारके मुम्बपुरीमभ्यागच्छत। नावमध्यागेहत। अध्यारोहन्नाम स्वयमधिरोढुमसमर्थः इतरेषां साहाय्येन नावि समुपवेशितः। युरोपमागत्य स व्हियेन्नानगरे कस्मिंश्चिदारोग्यमन्दिरे प्रविष्टश्चिकित्सामारब्धवान्। तत्रवसन्नयं 'इण्डियन स्ट्रगल' नामकमेकं पुस्तकं विलिख्य प्राकाशयत्। परं तस्य पुस्तकस्य भारते आनयनमत्रत्यसर्वकारेण प्रतिबद्धमेव। १९३३ दिशम्बरावसानभागे रोमनगरे प्रवृत्ते पौर्वात्यविद्यार्थिपरिषदि गतश्च। ३ मे १९३४ दिवसे व्हियन्नानगरे सुभाषचन्द्र इण्डोयुरोपियन् सोसाइटी नामिकां संस्थां प्रास्थापयत। व्हियन्नानगरे विद्यमाने सुभाषे पितुरन्तिमावस्थावार्तां तन्त्रीद्वारा समुपलभ्य आकाशयानेन कलकत्तानगरमागन्तुं निरगात्। परं सुदैववशात् तदागमनात्प्रागेव ३ दिशम्बरे १९३४ तमे दिवसे जनकः श्रीमान् रायबहादूर जानकीनाथमहाभागः स्वर्गमगादिति दुःखदायिनीं वार्तां कराचीनगरे अशृणोत्। ततः कराचीतः कलकत्तामुपेत्य दिशांबरमासं स्वगृहे यापयित्वा पुनर्जानेवारीमासे युरोपमगात्। व्हियन्नानगरसन्निवसति सुभाषे तस्योदरे

कापि रोगविकृतिर्जाता इति डा. डोमेलनामा शस्त्रवैद्य उदरे शस्त्रेण विकृतिं छेदयन्नारोग्यमुदपादयत। १९३६ तमेऽब्दे स आयर्लण्डमुपेतो डी. व्हलेरा-महाभागं सङ्गम्य समवदत च।

कांग्रेससमितेर्मुक्तः

लखनौकांग्रेसार्थे स युरोपान्निरगात्। ८ मार्चे १३९६ तमे दिवसे भारतभूस्पर्शनावसरे एव सर्वकारस्तमबध्नात्। ततस्तं एरवडाकारागृहे न्यधात। स पुनस्तत्र रुजाक्रान्त इति सर्वकारस्तं कलकत्तानगरे मेडिकल-कालेज रुग्णालये चिकित्सितुमवासयत। तत्रापि रोगमुक्तिमार्गमनवेक्षमाणः सर्वकारः १७ मार्चे १९३७ तमे दिवसे निर्बन्धमन्तरा तममोचयत्। सुभाष-चन्द्रो दृढमारोग्यसंपादनाभिलाषेण पुनर्युरोपमगात्। आस्ट्रियादेशे बाडगास्टेन इत्यत्र आरोग्यभवनमध्युवास। तत्र सार्धमासमुषित्वा लंडननगरमुपेत्य ततो विमानमार्गेण भारतमागच्छत्। १८३८ तमेऽब्दे हरिपुरे मिलिष्यमाणाया भारतजानपदमहासभायाः (कांग्रेस) अध्यक्ष्यपदार्थे प्रथमतश्चतुर्णां पंडितजवा-हरलालनेहरू, अब्दुल गफारखान, मौ. आझाद, बाबूसुभाषचन्द्राणां नामानि पुरस्कृतानि, पर परं त्रयो नेहरू, गफारखान, मौ. आजादमहाभागाः स्वस्व-नामानि प्रत्यगृह्णन्। तदा प्रतिपक्षमन्तरा अध्यक्ष्यपदे सुभाषचन्द्रो निर्वाचितः। ततश्चाग्रिमे वर्षे १९३९ तमे त्रिपुरीकांग्रेसार्थे महात्मनो गांधीमहाशयस्या-नुज्ञया अध्यक्षपदमलंकर्तुं पुरस्कृतः श्रीमान् पट्टाभिसीतारामय्यामहाभागः। तदवसरे श्रीमान् सुभाषचन्द्रमहोदयः प्रतिस्पर्धिनं सीतारामय्यमहाभागं प्रचण्डेन बहुमतेन पराजित्य त्रिपुरीकांग्रेसाध्यक्षपदमलमकरोद्विजयशाली। तदा म. गांधी–सुभाषपक्षयोस्तीव्रो मतभेदः अभ्यवर्धत। ततो विरोधवृद्धि-मनपेक्षमाणः सुभाषः २८ एप्रिले कलकत्तानगरे सम्मिलितायां आल् इण्डिया कांग्रेससमित्यां अध्यक्षपदपरित्यागमाघोषयत्। तथा कांग्रेसबन्धनादुन्मुक्त-श्चाभूत्।

अन्तरधात्सुभाषचन्द्रः

काँग्रेससमितेरुन्मुक्तोसौ स्वमतमखिलभारते प्रचारयितुं 'फार्वर्डब्लाक' नामकं स्वतन्त्रमेव पक्षमेकं प्रतिष्ठाप्य तच्छाखासंस्थाः प्रचारयितुं तत्र तत्र समचरत्। १९३९ तमेब्दे दक्षिणभारते महाराष्ट्रे कर्णाटके च बेळगांव, धारवाड, हुबळीप्रभृतिषु नगरेषु स्वपक्षसमर्थकैरनेकैरुपन्यासैरपूर्वां स्फूर्तिमुदपादयत्। ततः १९४० तमेब्दे बंगालविधिमण्डले अप्रतिमं बहुमतं संपाद्य नियुक्तश्चाभूत्। कलकत्तानगरे विद्यमानाया 'हालवेलप्रतिकृते'रुत्थापनार्थे महदान्दोलनं प्रावर्तयत्। तदर्थे पुनः सर्वकारः तमबध्नात्। तथा भारतरक्षणशासनमिषेण फार्वर्ड-ब्लाकृगताक्षेपार्हलेखानुद्दिश्य पुनरभियोगमुत्पाद्य कारागृहमवासयत्। स्वहिताचारविचारमधिकारणो न शृण्वन्तीति श्रीसुभाषचन्द्रः अन्नसत्याग्रहं निरशनमारब्धवान्। प्रथमत एव परिक्षीणा शरीरं प्रकृतिरतितरामक्षीयत। ततः सर्वकारः स्वगृहे एव स्थातव्यमिति निर्बन्धेन कारागारतो विमोच्य गृहनिवासार्थे आनुकूल्यमुदपादयत्। श्रीमान् सुगृहीतनामा शिवच्छत्रपतिर्महाराजो यथा औरंगजेबचक्रवर्तिनः कारावासादपरिज्ञात एव बहिरागात्तथैव श्रीसुभाषचन्द्रोपि अकस्मादेव अदृश्यतामयासीदिति वार्ता २६ जानेवारीदिनांके १९४१ तमेब्दे सर्वत्रापि सुप्रसृतोऽभूत्। बाबूसुभाषचन्द्रबोसमहोदयः सर्वकारकरे कुसुमगुच्छमर्पयित्वा इव यदगात् स अपघाणिस्थान ततश्च जर्मन्प्रदेशमगच्छत्। २६ एप्रिल १९४२ तमे दिवसे बर्लिन्नगरतो नभोवाण्या भाषणं कुर्वन् बी.बी.सी. उपरि तद्विरुद्धदिशा प्रवृत्तस्य प्रचारस्य सम्यगेवोत्तरं प्रायच्छत्।

चन्द्रग्रहणविषये अशुभा वार्ता

ततः सुभाषचन्द्रो जर्मन्देशे ड्रेसडेम इत्यत्र आझादहिन्दसेनां प्रत्यष्ठापयत्। पूर्वआशियास्थभारतीयानां नेतृत्वमुररीकर्तुं सुभाषो बर्लिन्नगरात् जलमग्नयानेन जपानदेशमागन्तुं निरगात्। १९४३ जूनमासे टोकियो

नगरमागच्छत् । ४ जुलै १९४३ तमे दिवसे सिंगपूरनगरे प्रकाशसभायां श्रीमान् सुभाषचन्द्रमहोदयः आझादहिन्दसर्वकारं प्रतिष्ठापितवान् ।

५ जुलै १९४३ तमे दिवसे सिंगापुरे समुपस्थितान् आझादसैनिकानुद्दिश्य 'चलतु देहलीं' इति ध्येयवाक्यमावेदयत् । ततः सर्वे आझादसैनिकाः 'चलो दिल्ली' इत्येवमाघोषयन् । दिनांके तारके २६ आगस्ट १९४३ तमे दिवसे श्रीसुभाषचन्द्रबोसमहोदयः आझादसैनिकानां प्रत्यक्षतो नेतृत्वमङ्गीकृत्य नेताजी पदालंकृतोऽभूत् । २१ अक्टोबर १९४३ तमे दिवसे आझादहिन्दसर्वकारः (स्वतन्त्रभारत) सुव्यवस्थापुरस्सरं प्रतिष्ठापितः २५ दिनांके ब्रिटन-अमेरिकाभ्यां सह विरुद्धं युद्धारम्भमुद्घोषितवान् । १९४३ दिशांबरे नेता सुभाषचन्द्रः पोर्टब्लेअर इत्यत्र स्वकीयं त्रिवर्णध्वजमुदभासयत् । १९४३ तमेऽब्दे श्रीमती सुभाषजननी प्रभावतीदेवी दिवंगता । मे मासे जूनमासे च १९४४ नेतृप्रवरः सुभाषः स्वतन्त्रभारत (आझादहिन्द) बालसेनामप्यस्थापयत् । एतस्मिन्नेव मासे भारतीयनिधिं (हिन्दव्यांक) स्थापितवान् । ब्रह्मदेशे युद्ध्यमानेषु स्वतन्त्रभारतयोधेषु (आझादहिन्दसैनिकेषु) केनापि वा प्रकारेण जपानीयाः साहाय्यं नैवाकुर्वन् । तेन कारणेन मणिपुरात् पृष्ठतः सरणप्रसङ्ग आपतितः । २१ आगस्ट १९४४ दिनाङ्कादारभ्य आझादहिन्दसैन्यस्य सर्वविधं चलनवलनं प्रतिबद्धमभूत् । १६ आगस्ट १९४५ तमे दुर्दिवसे नेतृवरः श्रीमान् सुभाषचन्द्रबोसमहोदयः बंकाकनगरं जिगमिषुः आकाशयानेन निरगात् । १८ दिनांके विमानं यन्त्रविकृत्यादिहेतुना विपर्यस्तमभूत् । २३ आगस्ट १९४६ तमे दिवसे स वीरस्वर्गमगादिति दुःखदायिनी अशुभवार्ता टोकियो रेडियोद्वारा अखिलजगतः श्रुतिविवरमपूरयत् । असत्यमिदं वृत्तं स जीवतीति केचन प्रत्यायकैरुपायैरावेदयन्ति केचिन्मृत इति निरूपयन्ति । परमखिले भारतेऽपि सर्वे जनास्तस्य वीरवरस्य परलोकप्रयाणवार्ता वितथा एव भवतात् इत्यभिलषन्तीत्यलम् ।

[विषयोऽयं २२ आक्टोबर १९४६ दिनांके प्रकटितात् केसरीतः संगृहीत इति तेषां कृतज्ञतां स्मरामः ।]

श्रीसुभाषचन्द्रस्य बर्लिनप्रयाण विषयिका अद्भुतकथा
(सुभाषो न जीवति)

स्वतन्त्रभारतस्य प्रथमतः सेनापतिनेतृवरः श्रीसुभाषचन्द्रबोसमहोदयो जपानदेशे विमानापघातेन सत्यमेव स्वर्गमगात् उत नेति विषयो नाद्यापि निश्चयेनाधिगन्तुं शक्यते । अद्यापि गूढोऽयं विषयः । तत्संबन्धेन विविधा वार्ताः सत्याभासाः तद्वार्तोद्भवदिनादारभ्य अद्य यावत् प्रसृता नवनवा इव जनश्रुतिगोचरा भवन्त्येव । तत्समालोचने क्रियमाणे महान् ग्रन्थ एव भवेत् । तास्ता वार्ता नेतृप्रवरसान्निध्यजुषां लोकानां सकाशात् उपलब्धाः प्रकाशिता इत्येतत्कारणेन विश्वसनीया एवेति विचारः स्वभाविकः प्रतीतिविषयो भवति । परं तासु परस्परं विरुद्धासु विमर्शविषयतामापादितासु संशय उत्पद्यते । परमेतत्सत्यं यः कोपि वा विश्वासार्हः पुमान् प्रत्यक्षतस्तमवलोक्य तेन सह संभाष्य संप्राप्त इति नावगम्यते । अस्मिन्समये बहवो जना अपघातेन तं मृतमवगच्छन्ति । तथापि महात्मा गांधीमहाभागः श्रीसुभाषो बाढं जीवतीत्येव मे द्रढीयान् विश्वास इति स्वाभिप्रायमाविष्करोति । महात्मनोस्यानेनाभिप्रायेण बहवो मानयन्ति किलैवं महात्मन आधारमन्तरा अन्तरात्मा नैवं निरूपयेत् इति । एतेन कारणेन सुभाषो जीवतीत्येवेति जनानां दृढो विश्वासो वज्रलेपायते । परं श्रीमान् कालान्तरे वा तत्स्थानार्हो जवाहरलालनेहरूमहाभागः श्रीसुभाषचन्द्रः सत्यमेवापघातेन मृतो न जीवतीत्येव प्रकटतया स्वमतं प्राकाशयत् । तथाच स अमुकदिवसे प्रकटीभविष्यतीत्यादिवृत्तान्ते न विश्वसेदिति च प्रत्यपादयत् ।

परमितरे किं वदन्ति

श्रीमान् पं. नेहरूमहोदयः कर्नलहबीबूररहमानस्य साक्ष्यं पुरस्कृत्य सुभाषस्य मृत्युविषये स्वाशयमाविष्करोति । तथापि जनानां संशया न दूरीभवन्ति । यतः कश्चिदपरो लेफ्टनंटरहिमानखानः पुरो भूत्वा यदि कश्चिदन्य-

मेवोदन्तमावेदयत् तर्हि हबीबूररहमानस्य साक्ष्यं संशयास्पदं भवत्येव । एवं सयुक्तिकं मार्मिकं विचारं श्रीमान् डा. हेमेन्द्रनाथदासगुप्तमहोदयः प्राकाशयांचक्रे अचिरादेव प्रकाशिते विस्तृते श्रीसुभाषचन्द्रचरित्रग्रन्थे । अपि च १४ आक्टोबरतारिके पाटनानगरे अ.भा. पुरोगामिपक्षाध्यक्षः श्रीशीलभद्रयाजीमहोदयः पं. नेहरूविचारान् खण्डयन् विद्यमानः श्रीसुभाषचन्द्रः सदेह एवाचिरात् प्रकटो भविष्यतीति निस्संदिग्धमावेदयत् । श्रीसुभाषचन्द्रबोसमहोदयः प्रत्यक्षमेव बहुजनसमाजस्याग्रतो यदि प्रकटो भवेत्तर्हि एव संशयो नश्यति । तावत् द्विविधवार्ताया उद्भवस्यावकाशो भाव्य एव ।

ब्रिटिशसर्वकारनिर्बन्धात् कलकत्ताराजधानीतः पलायनं यथा परमं रहस्यं तथैव च विमानापघातान्मरणमपि गूढतरमेव । वयमिदानीं कलकत्तानगरतो निस्सृत्य श्रीसुभाषचन्द्रमहोदयः अन्तर्हितः अकस्मादेव काबूलमार्गेण बर्लिनराजधानीं प्रति कथं जगाम इत्येतं रोमाञ्चकारी वृत्तं प्रियपाठकेभ्यो निरूपयामहे । परं वृत्तमिदं भूतार्थं उत कल्पितं स्यादित्येतस्य निर्णयः प्रत्यक्षसुभाषवचनश्रवणमन्तरा नैव भविष्यति । तावदिदं वृत्तं कल्पितमपि भवितुमर्हेत् । कथमपि वा अस्तु परमिदमाश्चर्यावहं सुन्दरं च सत्यमेवेति निर्धारितं भवेदिति मन्यमाहे ।

कलकत्तातः अन्तरधात्

परं वयमिदानीं तन्निर्धारणमकुर्वाणाः श्रीलालाउत्तमचन्द्रलिखितं सद्यस्तदितिहासं सत्यं मन्यमाना नेतृप्रवरसुभाषस्य अद्भुतं रमणीयं च वृत्तान्तं प्रयाणविषयकं संप्रति निरूपयामहे ।

दिशांबरे १९४० यावत् पञ्चसु मासेषु सुभाषचन्द्रः अलीपुरकारागृहे अतिष्ठत् । तत्र स्थिते तस्मिन् प्रागेव कृतस्य भाषणद्वयस्य विषये सर्वकारः अभियोगमारचयत् । २५ नवाम्बरे १९४० दिनाङ्कादारभ्य श्रीसुभाषचन्द्रः अन्नपरित्यागमारब्धवान् । तदानीं स बंगालप्रधानाधिकारिणे (गव्हर्नर)

पत्रमेकं विलिख्य प्राहिणोत् । तत्र च अन्नपरित्यागेनात्मबलिदानमहं करोमीति ।

तथानेन बलिदानेनैव भारतमुत्थापितं भवेदिति तदर्थं प्राणार्पणमिदं मम अनुपमसाधारणं मनस्समाधानकारणमिति च तत्पत्रे निरूपितवान् । उपवासारम्भे सप्तसु दिवसेष्वेव अतिशयेन शक्तिरहितोऽभूत् । तस्य सातिशयं शक्ति-ह्रासमवलोक्य आत्मनः अपकीर्तिप्रसङ्गो मा समापततु इति ५ दिशंबरे सर्वकारस्तं कारागारादमोचयत् । ततो वैद्याः पाश्चात्यपद्धत्या शिक्षिताश्चिकित्सकाः सुभाषं द्रष्टुं सर्वेषामप्यवकाशमेव न प्रायच्छन् । स्वजनानामप्यगोचरो दृष्टेः सुभाषचन्द्रः एकमासपर्यन्तं गृहैकदेशे कोष्ठे मञ्जूषायामिव प्रतिबद्ध आसीत् । तदवसरे स अंतर्गृहे किं करोतीत्येतदेवमन्तरा न कोप्यपर अजानात् ।

परमेवं तर्को यथा स तदवसरे एव स्वपलायनविषयं सम्यगालोचयदिति । यतः अद्य न चेदपि दिनचतुष्टयादन्तर्बहिर्वा सञ्जातमारोग्यमवगम्य सर्वकारो मां प्रतिबध्य प्राक्कृतान् अपरान्यपराधान् पुरस्कृत्य अभियोगमारचयत्येव । भारतजानपदमहासभातोपि (कांग्रेस) बहिष्कृतोहम् । जगति च महद् युद्धं प्रवृत्तमेव । अतः अस्मिन्नेव समये कथमपि साहसं कृत्वा इतः पलायनं कृत्वा परदेशमाश्रयेयम् । इंग्रजेषु विपदः समुत्पाद्य तद्दास्यभावात् मातृभूः उन्मोचनीया तदर्थं प्राणानपि सङ्कटे निपात्य महान् प्रयत्न आचरणीय इति मनसि स महोदयो निरधारयत् । सर्वकारस्य रक्षापुरुषेषु खल्वपि १७/१९४१ जानेवारीदिनांके श्रीसुभाषचन्द्रः अकस्मादेव सर्वाविदितः अंतरधात् । अवरंगजेबचक्रवर्तिनः कारागृहाद्दिल्लीतो यथा श्रीशिवच्छत्रभूपतिरकस्मादेव समभवददृश्यस्तथैव सुभाषोप्यदृश्यतामयासीत् ।

अपघाणसीम्नि प्रविष्टः

ततश्च विविधास्तर्का उदपद्यन्त । सत्यवृत्तान्तं न कोप्यज्ञासीत् । तत

एक उदन्तो वृत्तपत्रेषु प्रकटितो यथा स प्रथमं बरद्वानं गत्वा पंजाबमेलनाम्ना धूमशकटेन प्रयात इति । एतस्मिन्कर्मणि एकः कोपि पंजाबदेश्यः शीख उग्रवादीपक्षीयः तस्य सहायको बभूवेति । २५ जानेवारीदिनांके निशीथा-दनन्तरं एकघण्टावादनावसरे लखनौस्थमौलवीसदृक्षं वेषमास्थाय सुभाषः कलकत्तातः स्वगृहात् बहिर्निस्सृतवान् । स वेषश्चत्वारिंशद्दिवसान् यावदक्षौर-कारणेन रूढस्मश्रूप्रयोगो यावनत्वं संपादयितुमनुकूलोऽभवत् । बरद्वाननगरे (सेकण्डक्लास) उच्चवर्गीयस्थानमेतदर्थं एव यथा व्यवस्थितं स्यात् तथा प्रागेव प्रयतितमपि । १७ दिनांके स पेशावरमगच्छत् । तत्र स आत्मनो नामधेयं मौलवीझियाउद्दीन इत्याख्यातवान् । पेशावरे स अब्बासनाम्नः कस्यापि गृहस्थस्य गृहे दिनद्वयमुवास । १९ तमे तारके पठाणवेषमङ्गीकृत्य कञ्चन तद्देशपरिचितं मार्गदर्शिनं गृहीत्वा तेन सार्धं मरुत्तरयाने पदं निहितवात् । अयं सहायको नाम्ना भगतराम इत्यासीत् । सोपि यावनोचितं रहमतखान इति नाम जग्राह । जमरूदि तथा लण्डी–कोटलं दुर्गमुल्लङ्घ्य गढीनामकं स्थानविशेषमाप्नुवताम् । तत्र तौ मरुत्तरं पर्यत्यजताम् । तां रात्रिं तत्रैक-स्मिन् गृहे यापयित्वा प्रातः पद्भ्यामेव गन्तुमारभताम् । तस्मिन्नेव दिवसे संध्याकाले द्वयोः सशस्त्रयोरपघाणदेश्ययोः साहाय्येन भारतसीमानमुल्लङ्घ्य आफ्रिदीप्रान्ते पदं न्यधत्ताम् ।

बर्लिने प्रकटितोऽभूत्

श्रीसुभाषचन्द्र एकस्य महतः खानमहाभागस्य प्रशस्तिपत्रमेकं हस्ते जग्राह । तस्मिन्पत्रे द्वाविमौ माननीयौ मुस्लीमौ यात्रार्थं जिगमिषू स्तः । एतयोस्साधुत्वविषये अहं प्रतिभूरस्मि इति लिखितमासीत् । तेन तयोर्मार्गे न कोप्यन्तरायोभूत् तत्राग्रे काबूलनदींमुत्तरेतुः । ततश्च विशालं पन्थानमाश्रय-ताम् । ततो मरुत्तरयानप्रवास आरब्धः । तदानीं झियाउद्दीनोयं नाम श्रीसुभाषचन्द्रः एडमूकवेषधारी आत्मानमाचं बधिरं च ख्यापितवान् । स

इवान्वतिष्ठत् । भगतरामश्च तस्य भ्राता बभूव । तौ काबूलं प्रापतुः । तत्र न कस्यापि परिचय इति बुद्ध्या मरूत्तरस्थाने एव कस्मिन्नपि भोजनालये न्यवसताम्।

तत्र च अपघाणसर्वकाररक्षापुरुषस्यैकस्य एतस्य विषये संशय उद्भूत् । तदानीमेष चतुरस्तस्मै रक्षापुरुषाय गुप्तरीत्या धनं प्रदाय तन्मुखबन्धनमकरोत् । सोपि तावता संतुष्टतूष्णींभावमभजत् । एतस्मिन् प्रदेशे रहमतखानः काबूलर-स्थरशियनवाकीलगृहस्य समन्तात् अपघाणसर्वकारीया रक्षापुरुषा इतरेषाम-प्रवेशनिमित्तेन जागरूका रक्षति स्म । एवं सत्यपि एकदा रहमतखानः सुभाषेण समगच्छन् पथि मरूत्तरयानेन प्रयातं रशियनवाकीलं मध्येमार्गमव-रुध्य श्रीमान् वीरोयं श्रीमान् सुभाषचन्द्रमहोदयः । एनमादाय भवान् मास्को-नगरं गच्छतु इति अनुनयन्नवादीत् । परं स वाकीलो न विश्वासमदर्शयत् । तत्र तत्र स्थितयोरेतयो रक्षापुरुषाणां त्रासो विशेषो बभूव । ततस्तु एतावुभौ रेडियोव्यापारनिरतस्य श्रीमतो लालाउत्तमचन्दस्य शोधमनुविधाय सुखिनाव-भूताम् । ततः सुभाषचन्द्रस्तस्मिन्नेव सुखमुवास ।

स उत्तमचन्द्रमहोदयः सुभाषं स्वगेहे ४५ दिवसपर्यन्त यावत्सुगुप्तं समरक्षत् । अनेकैरुपायैः प्रयत्य इटालियनवाकीलस्य तत्पत्न्याश्च साहाय्येन रोमनगरं बर्लिननगरं गन्तुं अनुमतिपत्रं (पासपोर्ट) हस्तगतं कर्तुं एकमासावधिः कालोऽगच्छत् । ततश्च १८ मार्च १९४१ तमे दिवसे डा. बेलर्सनआदि-जर्मनदेशयकार्यालयाधिकृतयोः एकस्य इटालियनकार्यालयाधिकृतस्य च साहा-य्यमादाय सुभाषो रशियाप्रदेशं गन्तुमयतोऽभूत् । अपघानदेशस्य रशिया-देशस्य च मध्ये सीमानिर्णयो यया नद्या भवति तत्र तीरे भगतरामाय स्वदेशं गन्तुमन्वमोदत । एकाकी च पुरतो जगाम । स २७ मार्चमासे दिनांके मास्कोनगरमागात् । जर्मनसर्वकारस्तत्र तदर्थे स्वतन्त्रमेवैकं विमानं प्रास्थाप-यत् । तेन च ततो बर्लिननगरे वृत्तपत्राणि 'सुप्रसिद्धो भारतनेता श्रीमान् सुभाषचन्द्रबोसमहोदयो जर्मनराजधान्यां प्रकटो बभूवेति' आश्चर्यावहां वार्तां प्राकाशयन्निति ।

वीरसन्यासी श्रीकरपात्रीजीमहाराजः

उत्तरभारते सनातनधर्मसंरक्षणे बद्धपरिकरोयं महाभागः करपात्रीति रामत्रवृत्या विरक्तया सुप्रसिद्धः स्वयं चतुर्थाश्रमी देशकल्याणाय नैकलक्ष्य-व्ययपुरस्सरमनेकान् विष्णुयागादीन् दिल्ली प्रभृतीषु राजधानीषु समनुष्ठाप्य भूरिदक्षिणादिना परसहस्रान् पण्डितप्रवरान् प्रहर्षयन् संस्कृतभाषायामसाधारणं प्रणयमाविष्कुर्वन् नैककोटीश्वरश्रीलानारभ्य आपामरदारिद्रं प्रशंसनीयचरितो विभ्राजते । परमेतस्य नामापि दाक्षिणात्यजना न विशेषतो जानन्ति । महाशयोऽयं संघटनाचतुरो नैकलक्षात्मकं धनं संपत्समृद्धेभ्यो लीलयैव धर्म-कार्यार्थं दापयितुं समर्थश्च । नैकलक्षाधीश्वराः संपत्समृद्धाः श्रीलानैकेषु प्रसंगेषु अहमहमिकया विष्णुयागाद्यर्थे सत्कर्मसात्कर्तुं पुरःपुर आपतन्ति इति किल शृणुमो वयम् । श्रुतिस्मृत्युदितसनातनधर्मसंरक्षणबद्धादरः तत्प्रचार-विषया नैकाः नियतकालिकाः पत्रिका अपि हिन्दीभाषायां प्रचालयतीत्यपि शृणुमः ।

अचिरादेव केभ्यश्चिद्दिवसेभ्यः प्राक् अखिलभारतसार्वभौमप्रतिनिधिः पं. जवहरलालनेहरूमहाभागमपृच्छत् 'किमहो कोऽयं श्रीकरपात्रीजीमहाराजो महाभाग' इति । एवमनुयुक्तः श्रीमान् नेहरूमहोदयः प्राह 'यः कश्चन सन्यासी' इति । ततः पुनरब्रवीद् स मन्थवेतनमहाभागः (मौण्टब्याटन) पंडितजी । प्रकरणमिदं न सामान्यं परिदृश्यते । यतिवरोऽयं सनातनधर्माभि-मानिनां पुरस्सरो महान् नेता विराजते । अनुयात्रिका अप्येतस्य महान्तो दरीदृश्यन्ते । अतो विषयममिममवश्यं विचारयतु भवानिति' ।

संप्रति किल दिल्लीनगरे राजकारणप्रवणानां सर्वेषामपि विचित्रः सङ्घर्षः प्रवृत्त इति तत्र च अखण्डस्यापि भारतस्य पाकिस्तान-हिन्दुस्तान-नामभ्यां विच्छेदनप्रसक्तिविचारश्च अहर्निशं प्रवर्तत इति च जानन्ति च

सर्वेऽप्यक्षरमुखाः । प्रसङ्गेऽस्मिन् श्रीकरपात्रीमहाराजो दिल्लीनगरे सहस्रान् धर्मवीरान् सम्मेल्य विरोधप्रदर्शनपुरस्सरं सनातनधर्मरिरक्षिषया सामूहिकं सर्वकारविरुद्धं सत्याग्रहं प्रावर्तयच्च । एकस्मिन्वृन्दे कारागृहं प्रवेशिते अपरं वृन्दं सनातनधर्ममुद्घोषयदागच्छति (व्हायिसराय) श्रीभारतसार्वभौमप्रतिनिधिमन्दिरं तथा शासननिर्माणसभामन्दिरमपि । नैके साधवः सन्यासिनः सत्पुरुषा अत्र भागमगृह्णन् गृह्णन्ति च । त्रिंशदधिकत्रिशतोत्तरा जनाः संप्रति कारागृहमनुप्रवेशिताश्च । अपरे च बहवः २५–३० मैलावधौ दूरे नीत्वा विमोचिताः । बटवश्चापवित्रमन्नं वयं न गृह्णीम इति कारागृहेषु निरशनव्रतमखण्डं प्रारभन्त । श्रीकृष्णानन्दजीदण्डीस्वामिमहाराजो दशदिवसावधौ निराहारः पञ्चदशे तारके गते मासे प्राणान् पर्यत्यजत् । तद्दिने तन्निमित्तमसह्यं दुःखं प्रदर्शयितुं दिल्लीनगरे प्रमुखाः पण्यवीथीरापणान् प्रतिबद्ध्य सहानुभूतिं प्रादर्शयन् । केचन सन्यासिनश्च दण्डकमण्डलु अपरित्यागार्थे निरशनव्रतं समनुष्ठाय जयशालिनः समभूवन्निति विज्ञायते । इदानीमपि सामूहिकोऽयं सत्याग्रहो दिल्लीराजधान्यां प्रवृत्त एव । संयुक्तप्रान्तीया हिन्दुमहासभाजना एतेषां साहाय्यं दातुमुदघोषयन् इति च शृणुमः ।

मीरतनगरे प्रकाश्यमानस्यादेशपत्रस्य सम्पादकः श्रीमान् मदनगोपालसिंहमहोदयः स्वयं नेतृत्वमुपेत्य महता जनसमूहेन सहितो दिल्लीं प्राविशत् । जैनपुरान्नामकान्नगरात् सहस्रसंख्याका धर्मवीरा धार्मिके सत्याग्रहयुद्धे भागग्रहणाय दिल्लीं प्रति गन्तुं निरगुः । ३० मे दिने पञ्चविंशत्संख्यानि धर्मसत्याग्रहिणां यूथानि सीतापुरान्निर्गतानि चेति ज्ञायते । तथा च सिंगरामराजामहाभागः तथा शिवाजीस्मारकसंघसञ्चालकः श्रीमान् ठाकुरआदित्यनारायणसिंहमहोदयः श्रीकरपात्रीजीप्रवर्तिते धर्मयुद्धे भागं ग्रहीतुं निरगच्छत् । एवं महता समुत्साहेन प्रवृत्तमिदं धर्मयुद्धं शान्तरूपम् । अत एव एतदसाधारणमवलोक्य श्रीमान् भारतचक्रवर्तिप्रतिनिधिः पण्डितजीनेहरूमहोदयं जिज्ञासया समपृच्छदिति । गोवधप्रतिबन्धं घटनासमितौ हिन्दूनां योग्यं प्रातिनिध्यं च

धार्मिकेषु विषयेषु शासननिर्माणादिना हस्ताक्षेपं चेत्यादीन् विषयानधिकृत्य प्रवर्तितं धार्मिकं सत्याग्रहयुद्धम् ।

देशेऽस्माकं प्रवर्तितेषु नियतकालिकेषु पत्रेषु भूयांसः सर्वे कांग्रेस-पक्षीया नैतं वृत्तं प्रकाशयन्तीति विदितमेव सर्वेषाम् । अतो मधुरवाणीप्रिय-पाठकानामवगतये समुपाहृतं वृत्तमिदमित्यलम् ।

गीर्वाणवाणी व्यवहारोपयोगिनी

श्रीमन्तः अध्यक्षमहोदया गीर्वाणवाणीप्रणयिनः सभास्ताराश्च ! भगवती गीर्वाणवाणी व्यवहारोपयोगिनी कर्तव्या न वेत्येवं विषयमधिकृत्य चर्चेदानीं प्रसक्ता। वयं किल एवं ब्रूमहे यद् , अखिलेऽपि भारते सुरभारतीयं व्यवहार-विषयिणी विद्यते एव विद्वत्सु संप्रति । आसीत्पूर्वमपि । भविष्यत्यग्रतश्चे-त्यत्र न सर्वथा विप्रतिपत्तिरस्मिन् विषये । भिन्नभिन्नभाषाणां भिन्नभिन्न-विषयनिवासिनां समागमे मिथो व्यवहारप्रसङ्गे इयमेव दिव्या वाणी प्रागपि समादृता अधुनाप्याद्रियते पुरस्तादप्यादृता भविष्यत्येव । पुरा किल स्वयं-वरादिप्रसङ्गेषु भिन्नभिन्नप्रान्ताधीश्वरा महाराजादयो ह्येकत्र सभामण्डपे सम्मिलिताः परस्परमनया संस्कृतया एव भाषया व्यवहरन्तिस्मेत्यवगम्यते एव तत्तद्ग्रन्थावलोकनादिति जानीयुरेव सूक्ष्मधियश्चतुरा विद्वज्जनाः । 'अन्योन्य-भाषाऽनवबोधभीतेः संस्कृत्रिमाभिर्व्यवहारवत्सु ' इति किल महाकव्युक्तिरिमं विषयं निस्संशयं प्रतिपादयत्येव । संप्रति सिंहलद्वीपनिवासिनो ये चान्ये वा दक्षिणदेशनिवासिनो यदि उत्तरभारते वाराणस्यादिपुण्यक्षेत्रेषु वा काश्मीर-नेपालादिदेशेषु वा यदि प्रवसन्ति, ते च अनवगततत्तद्देशभाषाविशेषा विद्वद्भिः सह गीर्वाणभाषयैव व्यवहरन्तीत्यपरोक्षमेव प्रेक्षावताम् । एवमेव

उत्तरदेशीया दक्षिणदेशप्रवासे सुरसरस्वतीमेवाश्रयन्ते। यदीयं भाषा जगति बह्वीनां भाषाणां जनयित्री अनेकासां भाषाणां परमोपकारिणी उपेक्ष्यते तर्हि महती हानिः संपत्स्यते इत्यवगच्छन्तु तत्र भवन्तः। यतः एतस्या गीर्वाण-वाण्या उपेक्षाकरणेन स्वस्वमातृभाषास्वपि पाण्डित्यमनधिगच्छन्तः क्लिश्यन्त्येव जना इति नैव विस्मर्तव्यं सर्वथा। हिन्दीभाषायाः प्रसाराधिक्येन मिथो व्यव-हारे सौकर्यं भवतीति मन्यन्ते बहवः। परमयं प्रयत्न उत्तरभारते स्यात्सफलः किन्तु दक्षिणदेशे न फलाय कल्पत इति बाढं वयमाचक्ष्महे। यतः कर्णाट-कान्ध्रचोळकेरलभाषाणां हिन्दीसादृश्यलेशास्पृष्टतया तद्देशवासिनां हिन्दीभाषा प्रयत्नविशेषमन्तरा न स्वायत्ता भवति। यदि प्रयत्नविशेषाश्रयणमेव अवश्यं कर्तव्यं भवति, तर्हि किमपराद्धं भगवत्या गीर्वाणवाण्या। केचन अज्ञात-संस्कृतसाहित्यरसाः पण्डितमन्याः संस्कृतशब्दश्रवणमात्रेणैव नितरां जगुप्सा-मावहन्तः सूर्यकिरणभीता दिवान्धा इव मृतभाषेत्यपशब्दैर्दूषयन्तः दूरतः पलायमानाः मृतकल्पतामात्मनः प्रख्यापयन्ति। प्रायो जगति विद्यमानानां सर्वासामपि भाषाणाममृतत्वप्रदायिनी, स्वयममृतरसामोघागाधप्रवाहपरम्पराया जनयित्री, सरसा, सरला सुरभारती कथं स्यान्मृता? इत्यपि नावगच्छन्ति मूढधियः। यदि स्यादियं मृता तर्हि जगति विद्यमानाः प्रायः सर्वा अपि भाषा मृताः स्युरित्यवगच्छन्तु ते। जगतो महाप्रलयेऽपि चतुर्दशसु लोकेषु प्रलयोदधौ मज्जितेष्वपि संस्कृतेयं भाषा सनातनी नित्या न नाशमधिगच्छ-तीति संस्कृतभाषाया अस्या विजयविशेषमवगत्य प्रहर्षगिरिशिखरस्य परां कोटिमध्यारोहन्तु तत्प्रणयिन इति बाढमाश्वासयामो वयम्।

अपरे भाषेयं कठिना दुर्बोधा व्याकरणादिभिरिति ब्रुवन्ति। अहो अज्ञाततदीयरहस्याः किमेवं ब्रुवन्तीति भवति विस्मितं नश्चेतः। सर्वास्वपि भाषासु दुर्बोधता, सुबोधता च विद्येते एव। कर्णाटकभाषायां तथा महाराष्ट्र-भाषायामपि वा अनेकेषां ग्रन्थानां टीकाभिर्विना अर्थावबोध एव न भवतीति अस्माकमनुभवः। किमेतावन्मात्रेण देशभाषा दुर्बोधा विद्यन्ते इति बुध्वा

किं परित्यज्यन्ते भवद्भिः । देशभाषास्वपि यथा दुर्बोधा ग्रन्था वर्तन्ते, तथा सरलाः सुबोधा अपि वर्तन्त एव । एवमेव संस्कृतभाषायामपि बहवो ग्रन्थाः सुबोधा अपि दुर्बोधा अपि विद्यन्त एव । 'पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति । तदहं भक्त्युपहृतम् अश्नामि प्रयतात्मनः' इत्यादीनि गीतावचनानि अतिसुबोधानि सहृदयानां हृदयान्याल्हादयन्तीति को वा न जानाति सचेताः पुरुषः ।

अतो गीर्वाणवाणी भगवती सर्वोपकारिणी सर्वोपयोगिनी सरला सरसा चेत्यवगम्य तां विशेषतः प्रचार्य राष्ट्रभाषात्वेन तामेवोपयोक्तुं प्रयतन्तां सर्वे इति सविनयं सबहुमानं सानन्दं सम्प्रार्थ्य घण्टावादनभिया विरमामो वयमित्यलं पल्लवितेन ।

[द्वितीयसंस्कृतसाहित्यसम्मेलने कृतोयमुपन्यासः]

मीरालहरी

संस्कृतविद्याकरेऽस्मिन्भारतवर्षे भाग्यविपर्ययाद्वा कालमहिम्ना वा सांप्रतं विरलाः खलु संस्कृतप्रणयिनः । विरलतराश्च साहित्यस्वारस्यविदः । विरलतमाश्च सरसकाव्यप्रणेतारस्तत्रापि ललनामणयः । परं भरतखण्डस्य सौभाग्यवशात्संत्येवाधुनाऽपि तादृशानि रत्नानीति वाचका इव विस्मिताः प्रमोदामहे वयम् । तादृशस्य रत्नस्यैव किरणमञ्जरी 'मीरालहरी' नाम नव्यं गुणभव्यं रसिकसेव्यं श्राव्यं काव्यम् । तदेतस्य प्रणेत्री सरससाहित्यसागरावगाहनक्षमा भूषितक्षमा सुरसरस्वतीदूषणाक्षमा क्षमानाम्नी प्रथितयशाः पण्डिता रावोपपदा सौभाग्यवती महाभागा । अनया कृते प्रकृतकाव्ये अहमहमिकया परिस्फुरन्निललितानि पदानि । प्रकाशन्ते महोज्ज्वलाश्चर्याः । नाऽलम्बुद्धिं जनयन्त्यलङ्काराः । अगणिताश्च गुणा दधति गरिमाणम् । मधुरारीतिरतिरतिं विधत्ते

चेतसि कामपि। विशेषतः प्रवहत्यविच्छेदं विषयमलिनमनोऽपहरो भक्तिरसः। संस्कृतवाङ्मयमेव मधुरं कोमलम्। तच्च निसर्गतो मधुरभाषिणीभिः कोमलाङ्गीभिरङ्गीकृतं शुककवलिताम्रफलमिव रुचिरां रुचिमासेचयति।

काव्यस्यास्य पूर्वखण्डे एकोत्तरनवतिमिता, उत्तरखण्डे चतुश्चत्वारिंशत्संख्याकाश्च श्लोकाः समाश्रितमधुपाका हठादेवाकर्षन्ति पठितॄणां चेतांसि। निमज्जयन्ति च प्रमोदपारावारे। वाचककुतूहलवृद्धये द्वित्राण्येव च पद्यान्युदाह्रियन्ते नवीनकागदनियन्त्रणशासननिमन्त्रणापरतन्त्रताकृशया मधुरवाण्या।

श्रीनन्दकिशोरभक्त्या मीराया 'श्वश्रूजनपीडिताया अपि निष्ठादार्ढ्यं वर्णनपरः —

'धावल्यं सितनीरजं त्यजति किं पङ्केऽपि नित्यस्थितम्
सौभाग्यं विजहाति किं हिमगिरिश्छन्नस्तुषारैरपि।
कान्तिं मुञ्चति किन्नु हीरकमणिर्लोष्ठैश्च सन्दूषितः
किं चित्रं यदि धर्मतो न चलिता मीराऽपि तत्तर्जनैः ॥४६॥

इति प्रतिवस्तूपमालङ्कारालङ्कृतः श्लोकः कवयित्र्याः असाधारणं प्रतिभागरिमाणमावेदयति।

चिन्तामुक्तमनाः स्थिता नृपसुता, सम्मोदपीनाऽस्म्यहं
सा भक्तिं भरते भृशं भगवति, स्वान्तं प्रसन्नं मम।
निष्कामा तरुणीपदस्पृगपि सा, मुक्ताऽस्मि दुःखैरहं
सा तत्पत्नी, फलभागिनी, त्वहमिति व्यस्मेष्ट, वृद्धाङ्गना ॥५१॥

इति मीरावृद्धधात्रीवचोवैखरी जनयत्यपूर्वां चमत्कृतिं चेतसि वाचकानाम्।

आराद्भूरिमनोरमा वसुमती रेजे सपुष्पोद्गमा
वल्गन्ति स्म विकासिपद्मनयनाः श्रीपद्मिनीनां गणाः।
सौभाग्याङ्कपरागभाक्सुमनसस्तेनुः परान्दोलनां
सञ्चेरुः प्रमदा वनेषु मधुपाः पूर्वर्तुदिव्योत्सवे ॥५२॥

वसन्तर्तु-मीरानवर्तुमहोत्सवौ श्लेषेण वर्णयदिदं पद्यं स्पृशति हृद्यतायाः परमसीमानम् । एवमहं पूर्विकया निर्देष्टव्यत्वेन पुरः परिस्फुरन्ति नैकानि पद्यानि । सोत्कण्ठाऽपि लेखनी स्थलसङ्कोचभीत्या निरुणद्धि निरुत्साहेन । एवमन्तरङ्गहृदयङ्गममिदं काव्यं बाह्याङ्गसौष्ठवेन सरलटीकया च विशेषतः पुष्णात्यात्मनः सुषमाम् । तदिदं रसिकैर्भगवद्भक्तिपरवशमानवैश्च सकृदपि वाऽस्वादनीयमादरेणेति वयमाशास्महे । कालेजकुमारीभिरस्याः कवयित्र्या उदाहरणेन विदेशभाषामोहमपोह्य संस्कृतवाङ्मये कवयित्रीपदमध्यास्य भारत-गौरवं पुनस्संवर्ध्यतामिति मनोरथमात्मीयमाविष्कुर्महे वयम् ।

सुखसाधनं धर्मः

अयि मधुरवाणीप्रियपाठकमहोदयाः विदितमेव हि भवतां यत् किल सर्वेपि जनाः सुखमेव मे स्यात् सर्वदा न भवतु मनागपि दुःखं इति वाञ्छन्तीति । तथा च तदर्थं प्रयतन्ते विविधैरुपायैः । परं प्रायः सर्वेपि नास्तिकजनसंसर्गात् पाश्चिमात्यदेशीयजनानुकरणस्वभावाद्वा शास्त्रविरुद्धमेव अधर्ममार्गमवलम्बमाना दरीदृश्यन्ते । स्वयंभ्रष्टाः परान् नाशयन्तीति न्यायेन न केवलं स्वतः अवलम्बते किन्तु परानप्युपदिशन्ति तथा कर्माचरणाय । अपहसन्ति च पूर्वाचारधर्मानुष्ठातॄन् वैदिकान् अपि सज्जनान् । अहो किं वक्तव्यमेतेषाम् । 'धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः' इति भगवता मनुना समुद्घोषितं वचनं न श्रवणे कुर्वन्ति किम् ? ये न कुर्वन्ति धर्मरक्षणं न तान् धर्मोपि पालयति । ये सम्यगनुतिष्ठन्ति धर्मं तमेव स धर्मोपि सर्वाभ्यः आपद्भ्यः इह परत्र च गोपायति । 'धर्मो विश्वस्य जगतः प्रतिष्ठा' 'धर्मेण सर्वमिदं परिगृहीतम्' धर्मेण पापमपनुदति, 'सुखार्था सर्वभूतानां मताः सर्वाः प्रवृत्तयः ।

सुखं तु न विना धर्मात् तस्माद्धर्मपरो भवेत्' इति श्रुतयः स्मृतयश्च प्रतिपादयन्ति सुस्पष्टमेव। धर्माचरणमेकमेव सुखस्य साधनं सर्वेषां नान्यदिति मन्तव्यम्। तत्र च सामान्यतो धर्मः किंलक्षणकः इति विचारणीयः। यदाह मनुः—'विद्वद्भिः सेवितः सद्भिः नित्यमद्वेषरागिभिः। हृदयेनाभ्यनुज्ञातः यो धर्मस्तं निबोधत। 'धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः। ह्री विद्या सत्यमक्रोधः दशकं धर्मलक्षणम्। येनास्य पितरो याताः येन याताः पितामहाः। तेन यायात् सतां मार्गं तेन गच्छन् न रिष्यति' इति। एतदर्थस्तु धृतिः धैर्यं, अपराधेपि चित्तस्य अविकारः क्षमा। अन्तःकरणसंयमो दमः। अस्तेयं अदत्तास्वीकारः। शौचं बाह्याभ्यन्तरं च इन्द्रियनिग्रहः निषिद्धेभ्यो विषयेभ्य इन्द्रियनिवारणम्। ह्रीरकार्यकरणे लज्जा। विद्या परमात्मज्ञानम्। सत्यं यथार्थवचनम्। अक्रोधः क्रोधराहित्यमिति। एवं सामान्यतो दश धर्मा मनुना कथिताः। सर्वैरपि पूर्वाचारपरम्परया अनुष्ठिता इमे धर्मा आचरणीया एव नियमेन। न इदानीं दृश्यमाना दुराचाराः पूर्वजैर्महनीयैः कृता आसन्। अपि तु नियमेन प्रातः स्नात्वा हुताहुताशना जगदीश्वरपूजादिकर्म समाचारन्तो यदृच्छालाभसन्तुष्टाश्चाहर्निशं वेदशास्त्रप्रवचनपरायणाश्च बभूवुः किल। अतो विहाय विधर्मीयाचारं परधर्मं च सर्वैः सदाचारानुसारेणैव सम्यक् विध्युक्ताः धर्मा एव अनुष्ठेयाः। एतद्धर्मानुष्ठानेनैव सर्वेषामपि स्पृहणीयं सुखं लभ्यत नान्यथेति साञ्जलिबन्धं सादरं च विज्ञाप्य विरमामो विस्तरादिति।

कित्तूरनगरे अमरवाग्वर्धिनीसभायां श्रीमताम् उमर्जीत्युपाह्वानां रामाचार्याणाम् उपन्यासस्यायं सारः।

हा शीलदेवते अनाथाऽसि

नृत्यन्ति गायन्ति नटन्ति कामं
कन्याः कुलीना बत रङ्गभूमौ ।
प्रोत्साहकास्तत्र हि राष्ट्रधुर्याः
तस्याऽनुमन्ता जरठो महात्मा ॥ १ ॥

जगति किल शीलं नाम देशस्य समाजस्य कुलस्य च नितान्तं गौरवावहम् । शीलं हि संस्कृतिस्थैर्यमूलं, निश्श्रेयसप्रासादसोपानभूतमभ्युदयपादपाङ्कुरं, स्वाभिमानजीवझरीप्रभवं, परकीयाक्रमणप्रवाहनिरोधक्षमं, प्रतापज्योतिःप्रसवि, तीव्रतराधिज्वालाशमनं प्रतिभाप्रभाऽऽकरं नवस्फूर्तिप्रदायि, दिव्यतेजःप्रसारि, शारदसुधाकरसोदरयशोविसरविस्तारि, मनःप्रसादकमात्मप्रत्ययजनकं, परेषां विश्वासोत्पादकं, संपत्सम्पादकं, विपन्निवारकं, देवतानुग्रहनिदानं च ।

यदवलम्ब्यैव पुरा पुराणपुरुषः श्रीरामो विपदाऽभिभूतोऽपि राजपदभ्रंशितोऽपि वनवासदुःखितोऽपि रक्षसाऽपहृतदारोऽपि पुनस्ततार विपत्तिपारावारम् । अवाप समृद्धं विपुलं राज्यम् । अनुबभूव सुखपरम्पराम् । मुमुदे च गुणोदारैर्दारैः ।

यमवमत्य धनदानुजोऽपि बलात्समालिङ्गितत्रैलोक्यराज्यलक्ष्मीकोऽपि निरुपमैश्वर्यसमृद्धोऽपि प्रसन्नीकृतपरमेश्वरोऽपि समासादितदुर्लभतमविपुलवरोऽपि महाशैलकैलासोत्पाटने समुद्दण्डविंशतिभुजदण्डोऽपि विश्वविद्रावणो रावणः क्षणादेव क्षोणीतलरुचिमास्वादत्कोशनिर्यद्रुधिराक्तकरालकरवालतुलितरसनैर्दशभिर्वदनैर्मूर्तिमता शीलेनेव रामेण निशिततरशराहतः ।

यमेवाश्रित्य जगदाल्हादको बालोऽपि प्रह्लादः समुल्लासभरितो नामज्जदकूपारे, न प्रापदापदं पर्वतशिखरपातनेऽपि, नाविन्दत कांचिदपि बाधा-

माशीविषसहस्रदष्टः, नाऽप्यधिजगाम विकृतिलेशं दारुणतरगरलप्राशनोऽपि, नाभवन्निशितशस्त्रप्रहारगोचरः, नाबिभ्यत् त्रिलोकैकवीरात्क्रूराग्रेसरादपि पितुः। किन्तु सुलभतयैव निस्तीर्य सकला अपि विपत्तीः, प्रत्यक्षीचकार कमलावल्लभं कमलासनादिसुरसत्तमं कमलाक्षं नरहरिरूपेणावतीर्णम्। यदवज्ञाय वीरवरोऽपि हिरण्यकशिपुः खरतरनखरविदीर्णोदरो बभूव निरयादरः।

यदासाद्य पञ्चवर्षदेशीयः सापत्नमातृपरुषवचोविदीर्णहृदयः भगवता नारदेनोपदिष्टो गहनं वनं प्रविष्टश्चीर्णतीव्रतपा भगवन्तं वासुदेवं प्रसाद्य जननीसमेतो बुभुजे ध्रुवं नक्षत्रलोकसाम्राज्यम्। यदवधीर्य हीनो दुरभिमानो विषयवासनाधीनो वसुधाया इनोऽपि वेनो नाम तपोभासुरमहीसुरहुङ्कारमात्रेणैव स्वीचकार परेतपतिपुरातिथेयम्। यमधिष्ठाय युधिष्ठिरादयः पाण्डवाः प्रथमं विविधविपज्जालपतिता अपि भगवतो वासुदेवप्रसादेनाऽन्वभवन्मनोरथातिगः प्रमोदपरम्परां परां कोटिमधिरूढाम्। यत्परिभूय महैश्वर्यमदमेदुरा दुर्योधनादयकौरवाः सर्वे सर्वधिक्कृताः सर्वात्मना विनाशमधिजग्मुरपारम्। एवं कलियुगेऽपि ऐतिहासिकाः पुरुषा यदुपाश्रित्यैव विमलयशःशरीरेणाद्याऽपि जीवन्ति।

यदुपेक्ष्य जीवन्तोऽपि श्रीमन्तोऽपि धीमन्तोऽपि उच्चपदाधिकारवन्तोऽपि पामरजननयनेषु धूलिप्रक्षेपकौशल्यवन्तोऽपि साधुलोकतिरस्क्रियां सुरलोकबहिष्क्रियां नरकलोकसत्क्रियां चालभन्त लभन्ते लप्स्यन्ते, हन्त तस्य शीलस्य महिमानमनन्तमुपवर्णयितुं जगति को वा क्षमः। अस्यैव शीलस्य रक्षणाय प्राचीनललनाः अपि प्राणानप्यर्पयामासुः। भगवती विदेहसुता सतीशिरोमणिः देवी सीता विवेश हुताशनम्। जगति सुखानां प्रसवित्री सावित्री यमभनुससार व्यपगतत्रासा। पाण्डवनन्दिनी द्रुपदनन्दिनी अनुबभूव वनवासवेदनाम्। बभुजे याज्ञातवासदुःखम्। गुणवती दमयन्ती चानिर्वचनीयं क्लेशसन्तानमन्वभुङ्क्त। इतिहासकालेऽपि साध्वीललामभूता वङ्गदेशीया

कर्णाटकीया इतरप्रान्तीया अपि ललनामणयो बाहुल्येनात्मार्पणमकुर्वन्स्वेच्छयैव । तत्राऽपि रजपूतरमणीनां निर्मलशीलपरिरक्षणैकदक्षाणां समिद्धे पावके स्वेच्छयैव सानन्दमात्मबलिदानमवर्णनीयं दिवौकसामपि विस्मयावहं भारतवसुधापुण्यपरिपाकायमाणं स्मृतिमात्रेण रोमाञ्चकारि नवस्फुरणोद्दीपकं च ।

इयता प्रबन्धेन यस्य शीलस्य महीयो माहात्म्यमुपवर्णितं नितान्तमद्भुतमितिवृत्तं च किञ्चिदिवाख्यातं, हन्त तस्यैवेदानीं शोचनीयां दशां विलोक्य कस्य वा स्वपितुरेव लब्धजन्मनः सचेतसो वदनात्सहसा नाभिकमलादुद्गतो हृदयं विशोष्य न निर्गच्छेत् सोच्चस्वरो हाहाकारः । कस्य वा नासिकातो न निस्सरेदुष्णतरो दीर्घतमो निश्वासभरः । कस्य वा नावगलेयुर्नयनाभ्यां स्थूलस्थूला बाष्पोदबिन्दवः । कस्य वा नात्मा भजेत्क्षणमपि स्तब्धताम् । कस्य वा नाविर्भवेच्चेतसि वृश्चिकसहस्रदंशाधिकाऽविषहतमा वेदना । कस्य वा अवयवा नाऽऽसादयेयुरौदासीन्येन शिथिलीभावम् ।

महिला नाम शीलस्य जन्मभूमिः । शीलवत्य एव ललना जगत्पावनाः । ता एव यदि शीलमुल्लङ्घयेयुस्तर्हि कं वा शरणमुपगच्छेत्तत् । प्रयत्नपरिरक्षणीयं खलु शीलं निर्बन्धसापेक्षम् । शिथिलिते च निर्बन्धे सच्छिद्राच्चर्मपात्राज्जलमिव गलति शीलम् । शीलभ्रष्टो हि समाजस्तत्राऽपि स्त्रीसमाजः परेतकल्प एव परास्तपावित्र्यः । अत एव शीलरक्षणाय तन्मूलकपावित्र्याय च नैकविधान्निर्बन्धानकार्षुः सूक्ष्मदृशः समाजहितैकदृष्टयः प्राक्तनमहर्षयः । ये किलाधुनिकैर्वैदेशिकविद्यामदिरास्वादनविलुप्तविवेकैर्नवसुधारणापिशाचिकाग्रस्तैः कामचारिताप्रतिबन्धकतया व्यक्तिस्वातन्त्र्यविघटका इति प्रलपद्भिः पदे पदे परिभ्रूयन्ते । निर्बन्धदूरीकरणमेव महापौरुषं मन्यते । तथा उपदिश्यते । अपथे प्रवर्त्यते च स्वभावत एव चपलवृत्तिः स्त्रीजातिः । एवं निरस्तनिर्बन्धे वनितासमाजे कथं नाम शीलं स्थलं लभेत । शीलभ्रष्टासु कुलीनास्वपि ललनासु किं वा गौरवं देशस्य । पारलौकिकभयमास्तां नाम दूरे ।

अवयवा इव कोमलाः खलु भावना भामिनीनां पुरुषापेक्षयेति सर्व-सम्मतमिदम् । ईषदिव दोषेण स्पृष्टास्ता हि अचिरादेव महतीं विकृतिमाप-त्स्यन्ते । सहवासदोषेण वा दुर्वाङ्मयानुवासनेन वा अश्लीलमयनाटकवाचाट-चित्रपटावलोकनेन वा अवस्थान्तरमापद्यते योगिनोऽपि मनः किं पुनः कामिनीजीवनस्य, किं पुनः स्वतो विविधमनोवृत्तिविलासिपुरुषभूयिष्ठायां रङ्ग-भूमौ नेपथ्यं बिभ्रतीनां निर्लज्जं विविधमभिनयन्तीनां नृत्यन्तीनां च भाव-नोद्रिक्तचेतसां सीमन्तिनीनाम् ।

सुधारणमयेऽस्मिन्समये न कोऽपि कमपि निर्बद्धुं प्रभवति । स्वच्छन्दं यत्किमपि कर्तुं स्वतन्त्रा एव सर्वे सर्वत्र सर्वदा । न जातिनिर्बन्धः, न वा नीतिनिर्बन्धः, नाऽपि रीतिनिर्बन्धः नो वा भीतिनिर्बन्धः । अत एव कुलीनाः प्रौढाः कन्यकाः अनङ्गविवशपुरुषान्तरङ्गे रङ्गस्थले गाङ्गेयप्रभाहृदयङ्गमान्यङ्गा-न्युपदर्शयतीः, विलासमयान्नर्तितभ्रूलतान् प्रणयोत्तरङ्गांस्तरङ्गतरलतरानपाङ्गा-न्दिक्षु किरतीः विकारगुरुणां शरदिन्दुविडिम्बिना मन्दस्मितेनामन्दानन्दं सन्दि-शन्तीः, कटिन्यस्तकरं कणत्कनककङ्कणं रणन्मणिनूपुरं कोमलप्रपदाहतभूतल-मन्तराऽन्तरा सलीलं शिरश्चुबुकं च स्पर्शं स्पर्शं प्रसारितकरं वक्षस्स्थलविस्रस्तव-सनाञ्चलं विविधपदविक्षेपेण नृत्यतीः विवृतवदनं शृङ्गाररसस्राविणीं साधुजन-कर्णविवराङ्गारायमाणां कामुकजनमङ्गलमयीं सङ्गीतभङ्गीमङ्गीकुर्वतीः कोमलाङ्गीः विलोकयन्को वा न ब्रूयाद् वेश्याजनमिमा अतिशेरते विलासमयैर्दर्शितशीला-भावैर्भावैरिति । एतादृशं शीलभञ्जनं लज्जानिर्मूलनं च स्त्रीनटनं, कुलीनस्त्री-नटनं राष्ट्रधुरीणम्मन्यैः प्रोत्साह्यते, दशमीं दशामापन्नेनाऽपि महात्मनाऽनु-मोद्यते इत्यहो दौर्भाग्यस्य परमसीमा भारभुवः, अहो अविवेकसाम्राज्यस्य दुरन्ता प्रभविष्णुता ।

———

श्रीमती गङ्गादेवी

बहुरत्ना वसुन्धरा इति सुप्रसिद्धायामस्यां भारतभुवि कालिदासभवभूतिबाणदण्डिसुबन्धुप्रभृतय इव काश्चन महिला अपि आत्मनो वैदुष्येण रसिकतया च सरससुन्दरकाव्यनिर्माणनैपुण्यप्रदर्शनेन गीर्वाणवाणीप्रणयिनामन्तःकरणानि नितरां प्राहर्षयन् । तासु किलेयमेका प्रतिव्रताशिरोमणिः कर्णाटकभूषणं गीर्वाणवाणीप्रणयिनी पत्युः पराक्रमवर्णनपरं अतिसरसं सुललितपदविन्यासमनोहरं सुमधुरं '**मधुराविजयनामकम्**' काव्यरत्नमचीकरत् । तस्यैव काव्यरत्नस्य वीरकम्पणचरितमित्यपरं नाम । अपूर्णतया सम्मुद्रितस्य काव्यरत्नस्य भागमेकं वयं पञ्चविंशतिवत्सरेभ्यः प्राक् कस्यचन सुहृदो मंदिरे किल समपश्याम । परं तन्नेदानीमुपलभ्यते । यथेयं कवयित्री विदुषी तथातिशूरा साहसैकप्रणयिनी नैकससंग्रामनैपुण्यप्रदर्शनेन दिगन्तविख्यातकीर्तिशालिनी चाप्यासीदिति विज्ञायते ।

यथेयं विद्वत्ताप्रणयिनी तथा भारतीयोच्चसंस्कृतिप्रणयिनी सनातनधर्माभिमानिनी परधर्मविध्वंसनैकबद्धादराणां यवनानां विषये प्रद्वेषं दधाना तन्निर्मूलनाय निरतिशयप्रयत्नवत्यपि हन्तासीत् । ईदृशीयं ललनामणिर्न किल सामान्यतया परिगणितेषु जनेषु जन्म लेभे, किन्तु कर्णाटकसार्वभौमस्नुषा युवराजवीरकम्पणपाणिगृहित्री विविधविलासोपभोगसुलभसौभाग्यशालिनी चासीत् । विद्यमानेष्वनुपमैश्वर्यराशौ इन्द्रभुवनोपमितसौन्दर्यशालिनि विहारमन्दिरे नवयौवनोद्भासिकलेवरे जितमन्मथातिरूपे मूर्तिमत्प्रणये पतिराजे अमन्दानन्ददायिनी सन्निहिते, विलासोपभोगलालसतामपहाय सरसकाव्यनिर्माणे उत संग्रामावतरणसाहसकरणे च कियत्यः प्रभवन्ति ? ललनामणयः । आर्यभारतीयसंस्कृतिविषये स्वाभिमानप्रदर्शकमेकं पद्यं मधुराविजयनाम्नि काव्ये समुपलभ्यते । हृदयवल्लभेन समं संल्लपन्ती समुदाजहारैवम् ।

न तथा कटु घूत्कृताद् व्यथा मे
हृदि जीर्णोपवनेषु घूकलोकात् ।
परिशीलितपारसीकवाग्भिः
यवनानां भवने यथा शकुन्तैः ॥

वचनेऽस्मिन् निरतिशयः अभिमानो विद्योतते। आर्यधर्मपराङ्मुखानां यवनानां गृहेषु विद्यमानेभ्यः पक्षिभ्योऽपि अनार्यभाषाक्षराण्यपि श्रोतुं सा घूत्कारश्रवणा-दप्यतितरां तिरस्कारमाविरकरोत्। अत एवैषा प्रोज्वलदभिमानशालिनी सुंदर-काव्यरत्ननिर्माणनैपुण्यमलभत । चिरस्थायिना यशःप्रसरेण दिगन्तरं प्राकाश-यच्च । काव्यरत्नपरिशीलनेन चास्याः सरससाहित्यशास्त्रपारावारपारीणता अनुपमा रसिकता समरशूरता सनातनधर्मैकप्रणयिता विविधविलासोपभोग-विषयविरागिता साहसप्रवणता च स्फुटीभवति ।

आर्याः प्रियपाठकवरेण्याः !! येषु केषुचिदपि वा युष्मासु मुद्रितम–मुद्रितं वा काव्यरत्नं यदि संग्रहे स्यात् तर्हि सर्वथावश्यमेव निवेदयन्तु मधुरवाणीकार्यालये । मुद्रितं संग्रहे समुपलभ्येत चेत् कुत्र कदा वा कैरिदं मुद्रितं तत्त्वरया आवेदयन्तु । तदनन्तरं तत्प्रसारकरणाय वयं प्रयतिष्यामहे। यदि स्यादमुद्रितं तर्हि तत्प्रकाशनायापि यतामहे । एतादृशस्य ग्रन्थरत्नस्य मुद्रितस्याप्यलभ्यस्य अप्रकाशनं महान्तं खेदमुत्पादयति । अखिलभारतीय–संस्कृतसाहित्यसम्मेलनसंस्था वा तत्तत्प्रान्तीयसंस्कृतसाहित्यसम्मेलनसंस्था वा यदीदृशं प्रकाशनकार्यमङ्गीकुर्युस्तर्हि समलंकृतः स्याद्भारतीयसरससुरभारती–सारस्वतसमाज इति नो द्रढीयान् विश्वासः । सम्प्रति तस्या विदुष्याः कव-यित्र्याः कमलायताक्ष्याः कमनीयगात्र्याः पवित्रतामूर्त्याः गङ्गादेव्याः संग्रामा-वतरणप्रसङ्गमुपवर्ण्य प्रीणयामः प्रियपाठकान् ।

जय जय विरूपाक्ष जय जय पम्पापते हर हर महादेव जय जय पार्वती-पते परमेश्वर शम्भो त्रिपुरहर जयजयेति लोकनिद्राविद्रावणकरो महान् कल-

कलारावकोलाहलो वीरजनतारोमाञ्चकारी शूरजनोत्साहजनको भीरुजनवित्रास-करो महत्येव प्रत्यूषे विजयनगरे श्रीवीरूपाक्षमन्दिरस्य परिसरप्रदेशे वीरयात्रोद्यतैः सैनिकैः क्रियमाणो विश्वयपि सुविशालं गगनाङ्गणमखिलमावृणोत् । राजाधिराजः राजपरमेश्वरो हिन्दुरायसुरत्राणोऽरिरायाविभाडः पररायभयङ्करो वीरप्रतापाग्रेसरो बुक्करायमहाराजो जयतु जयतु परमामृद्धिमुदयं सम्पादयतु सम्पादयतूदयमिति सूतमागधवन्दिनामपि विजयाशासनरावोद्यात्मना व्यमिश्रयत्कलकलारावं किल वीरसैनिकानाम् । तदानीमेव सुमङ्गलो गीतध्वनिस्तालमद्दलमृदङ्गध्वनिमिश्रितो राजाङ्गणो राजपरिवारप्रबोधनाय प्रावर्त ।

समयेऽस्मिन्नेव विविधविलासभोगसाधनोपबृंहिते विहारमन्दिरे सैनिकाग्रणीर्वीरकम्पनरायो गृहिण्याः नयनमनोहारिण्याः प्रणयिन्याः गङ्गादेव्याः समराङ्गणप्रयाणाय अनुमतिमादातुकामः समुपागतः प्रियाकृतं प्रयाणोपयिकं वेषं तत्साधनसिद्धिमपि अवलोक्य नितरां व्यस्मयत् । संलापश्च तयोरेवमभवत्।

प्रिये मनोहारिणि सुस्मितेनानुमोदस्व मे दण्डयात्रोद्यमम् । दक्षिणे देशे नः साम्राज्यस्य कण्टकप्रायान् शत्रूनुन्मूलयितुं समभिषिक्तोऽस्मि सेनाधिपत्ये । विजयमालालंकृतवक्षस्थलो यावदहं प्रत्यागच्छामि तावदवहिता सुमङ्गलदेवता-समाराधनतत्परा प्रतीक्षस्व माम् ।

' हृदयेश्वर भवन्तमेकमेव समराङ्गणे प्रहीय कथमहमेकाकिनी विहार-मंदिरान्तर्गता कालमिह यापयेय । पतिप्राणायाः समधिगतसमरविद्यायाः कथमिदमुपपन्नं वा भवेत् ।' अतोऽहं समरभुवमभ्येत्य सितया असिलतया अरिशिरांस्यपहरन्ती यवननिर्मूलनेन वसुन्धराया भारतमातुः स्वातन्त्र्यसम्पादनेन अनुपमं यशोराशिं संपादयित्री । भारते रमण्योऽपि समराङ्गणप्रणयिन्यः साहसैकप्रवणा इति संदर्शयिष्यामि । अतोऽनुमन्यस्व मामनुगमनाय ।'

' समरशूरायाः समधीतरणविद्याया अपि भवत्या लोभनीयरूपातिशयाया लावण्यलतिकायाः समराङ्गणावतरणं नाहमनुमोदे कथमपि । त्वदा-

गमनेन मनो मे द्विधाभूतं विजयकार्ये विघ्नमुत्पादयति । तेन किल महान् प्रमादः स्यात् । सैनिकाध्यक्षस्य ममानवधानेन सैनिकाः प्रमत्ता भवेयुः । ततश्च विजये संशयः सम्भवेत् । अतो देवि निवेदयामि सर्वथा त्वया तत्रागन्तव्यमिति ।'

'यत्र भवान् तत्राहम् । न हि विरहातुरा भविष्यामि कथंचिदपि । न च सर्वथा स्थास्यामि विलासमंदिरे । समधीतविद्यया अपि वा गृहस्थितया को वा उपयोगः । अतोऽनुमन्यतां त्वरया ।

'स्वमनोगतमन्यथा न करोषि कदाचिदपीति मन्येहम् । जननीतातयोरनुमतिं वा गृह्णासि उत न' इति समन्दहासमुद्गिरन् अशिथिलमालिलिङ्ग ललनाम् । चुचुम्ब च बिम्बाधरम् ।

साऽपि चन्द्रमुखी समन्दहासमवदत् । 'अये हृदयेश्वर श्वश्रूश्वशुरयोरनुज्ञामन्तरा कथमहं प्रयाणसन्नद्धा भवेयम् । आदावेव पूज्ययोरुभयोः सविधे निवेदितवृत्तान्ता समधिगतानुज्ञा सुसज्जिताऽस्मि प्रयाणाय ।'

'किं न शृणोषि जयजयारावं सैनिकमुखनिर्गतम् । सुमङ्गलो भेरीपणवढक्कादिविविधवाद्यध्वनिरपि वीरजनप्रोत्साहकरो व्याप्नोति गगनतलम् । पुराद्बहिर्निष्क्रमणसूची काहलध्वनिरपीदानीमेव मे प्राविशत् श्रवणविवरम् । 'त्वरस्व त्वरस्व' इत्युद्गिरन् करकमलमाकृष्य सोपानपथा अवारोहद् वीरवरः कम्पणराजः । अधिद्वारमुपागतं विजयहस्तिनं सुवर्णमालालंकृतमभिरुरोहतुर्गङ्गाकम्पनौ । चतुरङ्गं सैन्यमन्वसरत्तम् ।

ततोऽपयातेषु बहुषु वासरेषु कदाचन गजेन्द्रपृष्ठमधिरूढौ गङ्गाकम्पनरायौ संवादमेवमकुरुताम् ।

'प्राणवल्लभ समीपमुपगतोऽयं मधुराप्रदेशः । परह्यः पराक्रम्य भवान् सम्यगेव समहार्षीत् सम्भवरायम् । लोककण्टकोऽयं खलाग्रणीर्यवनेषु मिलित्वा धर्मानुयायिनां भारतीयानां वित्रासकरो द्रोहमाचरति स्म ।'

'रमणि विषयेऽस्मिन् भवत्याः पराक्रम एव विशेषतो मे साहाय्य-कृज्जातः । समये भवती भगवती महिषासुरमार्दिनीव शत्रूणां शिरांस्यपहरन्ती समनृत्यत्कन्दुकलीलया । आर्यसनातनधर्मविद्रोहिणो यवना मधुराप्रदेशमव-लम्ब्य मदोद्धताः सन्ति । तेषां मदकारिणीयं मधुरा न मधुरा किन्तु मदिरे-वेति ब्रवीम्यहम् । श्रीमतो राजाधिराजस्य बुक्कनरपतेराज्ञया सम्भवरायवशेन स्वायत्तः समभूदेव तत्प्रदेशः । उर्वरितमपरं कर्म यवननिर्मूलनम् । तदापि भविष्यत्येव पम्पापतेरनुग्रहेण । खलाग्रेसराः खलु यवना इमे पवित्रं भारतमिदं प्रविश्य आर्यसंस्कृतेः विध्वंसनायैव सन्नद्धाः । अतः कदा वा कथं वा समूल-मुन्मूलिता भवेयुः इयमेकैव चिन्ता सन्ततं मे मानसं सन्तापयतीति ।'

'प्रशस्यचरिते भवतु भवति समाहितचित्ता । सर्वमस्माकमनुकूलं भविष्यत्येव भगवतः पम्पापतेर्विरूपाक्षस्य परमानुग्रहेण ।'

मान्याः प्रियपाठकमहोदयाः !! संवादेनानेन विज्ञायते तत्रभवत्या गङ्गा-देव्या आर्यसंस्कृतौ सनातनधर्मे स्वदेशस्वभाषादावप्युज्ज्वलः कथमासीदभि-मान इति । एतादृशा महिला बह्व्यो विद्यावैभवेन पराक्रमवैशद्येन लावण्याति-शयेन अधिराज्ञीसम्पदा राजकारणनैपुण्येन च सुप्रसिद्धाः भूषयामासुः कर्णा-टकमण्डलमिदम् । क्रमेण प्रत्यङ्कमेकस्याः परिचयप्रकाशनेन प्रीणयिष्यामः प्रियपाठकान् इत्याश्वास्य विरमामो विस्तरात् ।

———

अख्यातिवादिप्राभाकरमतनिरूपणम्

आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा ।
तथाऽनिर्वचनीयख्यातिरित्येतत् ख्यातिपञ्चकम् ॥

इति ख्यातिपञ्चकम् प्रथितम् ।

तत्र १) **आत्मख्यातिवादिनः**—बौद्धैकदेशिनः (योगाचारापरनामका विज्ञानवादिनः)

२) **असत्ख्यातिवादिनः**—शून्यवादिनः (माध्यमिकापरनामका बौद्धैकदेशिनः)

३) **अन्यथाख्यातिवादिनः**—नैयायिकाः

४) **अनिर्वचनीयख्यातिवादिनः**—मायावादिनः

५) **अख्यातिवादिनः**—प्राभाकराः, रामानुजीयाः, नैयायिकैकदेशिनः

साकारवादात् असतो न भानात् संविद्विरोधात् अथ हेत्वभावात् ।
धियामनाश्वासबलाच्च नेष्टा अतोऽन्यथाख्यातिरतो यथार्था ।

इति प्राभाकरीयवचनम् । प्राभाकरणामाशयः नयवीथ्यादिग्रन्थानुगुण्येना-विष्क्रियते ।

साकारवादात्

ज्ञानमात्रस्य याथार्थ्यवादी प्राभाकरः विपर्ययभावमेवं समर्थयति । केयमन्यथाख्यातिर्नामेति । अन्यथापरिणते वस्तुनि ख्यातिर्यद्यन्यथाख्यातिः तदा घटादिप्रत्ययाः सर्वेऽपि विभ्रमाः प्रसज्येरन् ।

किञ्च शुक्तिकायाः रजताकारपरिणामः किं सकारणः ? उताकारणः ? न तावदकारणः । कादाचित्कत्वानुपपत्तेः । सकारणश्चेत्कारणं वाच्यम् । करणदोष इति चेन्न । करणदोषस्य करणसंबन्धिनः शुक्तिकापरिणामहेतुत्वा-नुपपत्तेः । अन्यथा तदैव सकलपदार्थानां रजतरूपपरिणामप्रसङ्गात् ।

दुष्टकरणसंसर्गो हेतुरिति चेत्तथाऽपि किं शुक्तित्वापगमेन रजतरूपपरिणामः । किं वा तदनपगमेन । शुक्तित्वापगमेन चेत् रजतरूपपरिणामः पुरुषान्तरेणापि तदा शुक्तित्वं न प्रत्येतव्यम् । शुक्तित्वानपगमेन चेत् यथा मृत्वाऽनपगमेन जाते घटे मृत्त्वमुपलभ्यते तथा भ्रान्तेनाऽपि तत्प्रत्येतव्यम् ।

किञ्च दोषवशाद्रजताकारेण परिणता चेच्छुक्तिः तदा दोषापगमेऽपि कथं तथैव नावतिष्ठते । न हि निमित्तकारणनाशात् कार्यनाशो दृष्टः ।

किञ्चोत्पन्नं चेद्रजतं विनष्टं, तदा तथैव प्रतीतिः स्यात् । न पुनर्नेदं रजतमिति बाधबुद्धिः ।

तदेवं भ्रान्तिबाधयोरनुपपत्तेर्न परिणामपक्षो युक्तः ।

असतो न भानात्

वस्तुनो वस्त्वन्तरात्मता सती उताऽसती । वस्तुनो वस्त्वन्तरात्मतायाः सत्त्वे न भ्रान्तिर्नाऽपि बाधः । सर्वस्य सर्वात्मतायाः सत्वेन, सर्वेषां सर्वं सर्वात्मना प्रतीयेत । न तत्र दोषः करणसंस्कारः । किञ्चैवं सति रजतसंवित् समीचीना शुक्तिरेवेयमिति चासमीचीनाऽपद्येत ।

नाऽपि वस्तुनो वस्त्वन्तरात्मताऽसती । असतः प्रतीत्यनुपपत्तेः । असतः प्रतीत्यनुपपत्या हि रजतस्य वस्तुत्वं अन्यत्र सत्वरूपं अङ्गीकृतं असतोऽपि प्रतीत्युपपत्तौ किं रजतस्याऽपि वस्तुत्वग्रहणेन ।

संविद्विरोधात्

किञ्चान्याकारोल्लेखि अन्यालम्बनमिति तु संवित्स्वभावविरुद्धम् । रजताकारोल्लेखिनः रजतविषयकत्वस्यैव दृष्टेः । तस्माद्यद्विज्ञानं यत्प्रतिभासं तदेव तस्यालम्बनमिति संविद्विरोधपरिहारायावश्यमभ्युपेयम् ।

तत्र रजतज्ञाने शुक्तिरवभासते नवेति वक्तव्यम् । अवभासत इति ब्रुवाणः श्लाघनीयप्रज्ञो देवानां प्रियः । यदि संविदि बहुमानवान् नेति ब्रूयात्, तदा कथं तच्छुक्तिकालम्बनं स्यात् ।

किञ्च रजतमवभासते शुक्तिकाविषयकं चेत् पटाद्यवभासकमपि ज्ञानं घटाद्यालम्बनं स्यादित्यतिप्रसङ्गः कथं परिहरणीयः ।

नन्वेवमत्र रजतज्ञानस्य (अवभासस्य) रजतविषयत्वे तेन रजतेन भवितव्यम् । कथ न भवितव्यम् । न हि संप्रतिपन्नसमीचीनरजतस्वीकारेऽपि निमित्तमस्त्यन्यद्रजतावभासात् । न ह्यन्यतररजतप्रतिभासपक्षपाते कारणमस्ति । नास्त्यत्र रजतमित्यपि प्रतिभासोऽस्तीति चेत्, रजताभावोप्यङ्गीक्रियत एव पुरतः । रजतरजताभावप्रतीत्योर्विरोधः स्यादिति चेत्, ग्रहणस्मरणात्मकतया तदुपपत्तेः ।

तदुक्तं नयवीथ्याम्

अत्र भ्रमो य एवार्थो यस्यां संविदि भासते ।
वेद्यः स एव नान्यद्धि वेद्यं वेद्यस्य लक्षणम् ॥
इदं रजतमित्यत्र रजतं चावभासते ।
तदेव तेन वेद्यं स्यात् न च शुक्तिरवेदनात् ॥
तेनान्यस्यान्यथाभानं प्रतीत्यैव पराहतम् ।
परस्मिन् भासमानेहि न परं भासते यतः ॥ इत्यादि ।

हेत्वाभावात्

न चान्यथाख्यातिजनने कारणं पश्यामः । न च चक्षुरादिकमेवकारणम् । तेषां समीचीनज्ञानकारणताऽवधारणात् । न खलु जरामरण विध्वंसहेतुर्जातु सुधा जरामरणहेतुरपि भवति ।

न च न केवलादिन्द्रियाद्यथार्थज्ञानजन्म । किन्तु दोषसहकृतादिन्द्रियादिति चेत् न । दोषाः हि कारणानामौत्सर्गिककार्यजननसामर्थ्यं निघ्नन्ति । न तु विपरीतकार्यजननशक्तिमादधाति । न खलु दुष्टं कुटजबीजं वटं जनयति । किं नाम न जनयत्येव कुटजाङ्कुरम् । न च वक्तव्यं दावदहनदग्धानां वेत्र बीजानां कदलीकाण्डजननसामर्थ्यमुपलब्धमिति । पाकेन द्रव्यान्तरोत्पत्तेस्तेषामबीजत्वात् ।

धियामनाश्वासप्रसङ्गात्

किञ्च प्रदर्शिताकारव्यभिचारे प्रत्ययस्य सर्वत्र व्यभिचारशङ्का दुर्वारा स्यात्। तथा च कथं बाह्यार्थापलापं निराकुर्मः। तथाहि—ज्ञानमेव खलु सर्वत्र वस्तुव्यवस्थापकं नान्यत्। तच्चेत् क्वचिद्व्यभिचरति तदा, तत्सर्वत्र शङ्कितव्यभिचारमेव। न च तच्छङ्कापङ्कसंक्षालनक्षमं किञ्चिदन्यद्विज्ञानात्। तच्च सकलमपि शङ्काकलङ्कसंकोचितप्रभावं न प्रभवतीत्युक्तम्। ततश्च कुतो बाह्यार्थप्रत्याशा।

न च वाच्यं यथा पार्थिवस्य धूमादेः वह्निव्यभिचारेऽपि न धूमस्यापि तद्व्यभिचारः शंक्यते। एवमेकज्ञानस्यार्थव्यभिचारेऽपि न सर्वत्र व्यभिचार-शङ्केति। वैषम्यात्। अस्ति हि तत्र पार्थिवत्वाऽविशेषेऽपि अव्यभिचार-निश्चयोपायः धूमत्वादिरेवावान्तरो विशेषः। न हि बाधकं किञ्चित्। तेनोप-पद्यते तत्राश्वासः। प्रकृते तु न ज्ञानत्वावान्तरविशेषं अनाश्वासनिरसनक्षम-मीक्षामहे। न च बाधकभावाभावरूपाद्विशेषाद्व्यवस्थेति वाच्यम्। बाधकस्या-ऽपि ज्ञानत्वेन शङ्कास्पदत्वात्। न हि बाधकस्य किमपि शृङ्गमस्ति।

तस्मात् क्वचिद्ज्ञानस्यार्थव्यभिचारित्वे सर्वत्र तच्छङ्कायाः दुर्वारत्वेन सर्वत्र ज्ञानानां याथार्थ्यमभ्युपेयमिति।

प्रतिक्षिप्तं ज्ञानस्यायाथार्थ्यं। न तावता याथार्थ्यसिद्धिः। नह्ययाथार्थ्य-प्रतिक्षेप एव याथार्थ्यमिति चेत्। उच्यते। 'इदं रजतम्' इति हि प्रत्ययः। अत्र द्वे ज्ञाने। इदमिति पुरोवर्तिद्रव्यग्रहणम्। दोषवशात् तद्गतस्य शुक्तित्व-सामान्यविशेषस्याग्रहणात्। द्रव्यमात्रं च गृहीतं सदृशतया संस्कारोद्बोधक्रमेण रजतस्मृतिं जनयति। स्मृतिश्च अनुभूतवस्तुविषयीकरणस्वभावाऽपि (गृहीत-ग्रहणस्वभावाऽपि) दोषवशात् गृहीततत्तांशप्रमोषेण गृहीतिस्वरूपाऽवतिष्ठते (अनुभवसदृशीत्यर्थः)। यथानुभवः तत्तानुल्लेखी तथा इदं रजतस्मरणमपि। थता च रजतस्मृतेः पुरोवर्तिग्रहणस्य च मिथः स्वरूपतो (ज्ञानेन) विषयतश्च

(पदार्थात्) भेदाग्रहात् सन्निहित (समीचीन) रजतज्ञानसारूप्येण इदं रजतमिति भिन्ने अपि ग्रहणस्मरणे अभेदव्यवहारं सामानाधिकरण्यव्यपदेशञ्च प्रवर्तयतः। अत्र पुरोवर्तिद्रव्यज्ञानमनुभव इत्यविवादम्। रजतज्ञानं च न तावदिन्द्रियजम्। इन्द्रियस्य सन्निकृष्टेऽर्थे एव ज्ञानजननसामर्थ्यात्। नात्र विप्रकृष्टेन रजतेन सन्निकर्षोऽस्ति। अतः परिशेषादिदं स्मरणमेव।

अथवा नायं नियमः। ग्रहणस्मरणे एवागृहीतविवेके व्यवहारादिप्रवर्तके इति। क्वचिद् ग्रहणे एव मिथोऽगृहीत भेदे। यथा पीतः शङ्खः। अत्र हि विनिर्यन्नयनरश्मिवर्तिनः पीतद्रव्यस्य पीतत्वं दोषवशाद् द्रव्यरहितं गृह्यते। शङ्खोऽपि (शङ्खत्वेन) स्वरूपमात्रेण गृह्यते। तदनयोर्गुणगुणिनोरितरेतरसापेक्षिणोः सारूप्यात् निरबिल्वादिफलप्रत्ययाविशेषेणाऽभेदव्यवहारः सामानाधिकरण्यपदेशश्च भवतः।

एवं पुनः क्वचित् स्मरणे एवागृहीतविवेके व्यवहारादिप्रवर्तके। 'यथा स घटः तत्रासीदिति'।

किञ्च विपर्ययमङ्गीकुर्वाणेनाऽपि विवेकाग्रहो ग्राह्य एवेति विवेकाग्रहादेव सर्वोपपत्तौ किं विपर्ययकल्पनया।

नाप्यन्यथाख्यातौ प्रमाणमस्ति। नेदमिति विवेकज्ञानस्य भेदाग्रहप्रसञ्जिताभेदव्यवहारबाधनेनैव बाधकत्वमुपपद्यते। विवेकज्ञानस्य बाधकत्वोपपत्तौ अगृहीतविवेकस्य ज्ञानद्वयस्य भ्रान्तित्वमपि लोकसिद्धं सिद्धम्। तथा च प्रयोगः—विगीतप्रत्ययो यथार्थः प्रत्ययत्वात् संप्रतिपन्नवत् इत्यादि।

तस्मात्सर्वथाऽन्यथाख्यातेरुपपादयितुमशक्यत्वात् अख्यातिपक्ष एव श्रेयानिति।

वैशेषिकन्यायदर्शनोक्तमोक्षस्वरूपविमर्शः

नैयायिका 'बाधनालक्षणं दुःखम्' इति प्रक्रम्य 'तदत्यन्तविमोक्षोऽपवर्गः' इत्यादि न्यायसूत्रपर्यालोचनया दुःखात्यन्तनिवृत्तिमेव मोक्षं व्यवस्थापयन्ति। तन्मते दुःखानि च शरीरं, षडिन्द्रियाणि, षड्विषयाः, षड्बुद्धयः, सुखं दुःखञ्चेत्येकविंशतिः। तत्र शरीरेन्द्रियार्थेषु दुःखसाधनत्वात्, सुखे च स्वर्गादिरूपेऽनित्यत्वशङ्कया दुःखानुषङ्गाद्दुःखव्यवहारो गौणः। एवमेकविंशतिदुःखानामात्यन्तिकी निवृत्तिरेव मोक्षः। निवृत्तावात्यन्तिकत्वञ्च स्वसमानाधिकरणदुःखासमानकालीनदुःखध्वंसो मोक्ष इति न्यायसिद्धान्तः। 'अशेषविशेषगुणोच्छेदो मोक्षः' इति वदतां वैशेषिकाणामपि इदमेव सम्मतम्।

त्रयाणामप्येतेषामयमाशयः—मुक्तस्य सुखं न संभवति। तथा हि, न तावत्तत्सुखमनादीत्युपपद्यते, संसारेऽपि तत्प्रतिभासप्रसङ्गात्। न चेष्टापत्तिः, तदापि प्रतिभासमानस्यानादितायां साधनोपादानवैयर्थ्यापत्तेः। ननु अव्यक्तत्वात्संसारे न प्रतिभासते, व्यक्तत्वात्तु मुक्तौ प्रतिभासत इति चेन्न—अव्यक्तिर्हि प्रतिभासाभावो, व्यक्तिश्च प्रतिभासः। ततश्चाप्रतिभासान्न प्रतिभासते। प्रतिभासनाच्च प्रतिभासत इत्युक्तं स्यात्। किञ्च प्रतीतिकारणान्तःकरण—सद्भावेऽपि संसारे न प्रतीयते, मुक्तौ तु तदपगमे प्रतीयत इति सुभाषितम्। आवृतत्वान्न प्रतीयते इति चेन्न, मूर्तत्वाभावेन आवरणानुपपत्तेः तदनिरूपणाच्च। सुखमिव तत्प्रतीतिरप्यनादिश्चेत्किमावरणकृत्यम्? विषयविषयिभावः प्रतिबध्यत इति चेन्न, निर्विषयायाः प्रतीतेरनुपपत्तेः। सुखतत्प्रतीत्योरनादितायां प्रमितायामेव चैषा कल्पना युक्ता। न च तत्र प्रमाणं पश्यामः। ततः सुखस्य तत्प्रतीतेश्च मुक्तावुत्पत्तिरेव वक्तव्या। सापि न संभवति कारणाभावात्। शरीरे सति तदाश्रयतयेन्द्रियसद्भावस्तैरर्थालोचनम्। ततः पूर्वानुभूतसारूप्येणेष्टानिष्टसाधनत्वानुमानं, तस्मादिच्छाद्वेषौ, ताभ्यां प्रयत्नः, ततश्चेष्टसाधनोपा-

दानमनिष्टसाधनहानञ्च, ततस्सुखोत्पादः, तदनन्तरं तत्प्रतीतिरित्येष दृष्टकारण-क्रमः। अदृष्टश्च सर्वत्र विजयते। न चैष कारणप्रवाहो मुक्तावस्ति। तत्स-द्भावे दुःखस्यापि प्रसङ्गेन मुक्तत्वव्याघातात्। तस्मात्सुखरहित एव मोक्षः।

कथमयं पुरुषार्थ इति चेत्, एकविंशतिदुःखात्यन्तनिवृत्तित्वादिति ब्रूमः। नन्वेवमपि दुःखनिवृत्तिः पुरुषार्थ एव न भवति। तस्याः स्रक्चन्दनादि-वदन्यार्थमर्थ्यत्वेन तदीयपुरुषार्थत्वस्य सोपाधिकत्वात्। दुःखाभावे सत्येव सुखं भवतीति तदर्थं हि दुःखाभावो मृग्यते, न तु स एव पुरुषस्य समीहित इति चेन्न। विपर्ययस्यापि संभवात्। भोजनादिसुखे सत्येव बुभुक्षादिदुःखं निवर्तत इति दुःखनिवृत्त्यर्थमेव भोजनादिसुखं मृग्यते, क्वचित् (परवनितादौ) दुःख-निवृत्त्यभावेऽपि सुखस्येष्यमाणत्वादिति चेन्न। दुःखनिवृत्तेरपि क्वचित्सुखाभावे-पीष्यमाणत्वात्। दुःखनिवृत्तौ सत्यां सुखमेव भविष्यतीत्यभिसन्धिस्ताव-दस्तीति चेत् सुखावस्थायां नियतो दुःखविरहो भवतीत्यभिसन्धेस्तत्रापि सद्भावात्। तस्माद्यद्यपि दुःखाभावे सुखं, सुखे च दुःखाभावो नियतः। तथापि परस्परं निरपेक्षमेव पुरुषार्थत्वमनयोः, इच्छाया असङ्कीर्णत्वादिति। अथ भवति दुःखहानिः पुरुषार्थः। किं त्वनुभूयमानतया। न हि विषादिजन्य-मोहावस्थायां दुःखनिवृत्तिरिति तत्र प्रेक्षावन्तः प्रवर्तन्ते। तस्मान्मोक्षे दुःख-हानेरननुभूयमानत्वान्न पुरुषार्थत्वमिति चेन्मैवम्। पुत्रादिवियोगजन्यदुःख-हानिमिच्छतां केषाञ्चिद्विषशस्त्रोद्बन्धनादावपि प्रवृत्तिदर्शनात्। प्रेक्षावन्तो नैवं कुर्वन्तीति चेन्न पुरुषार्थत्वाविरोधात्। न हि परदारेषु शास्त्रनिषेधाङ्कुश-वारिताः प्रेक्षावन्तो नाभिवर्तन्त इति न तत्र कामः पुरुषार्थः। अपि त्वल्पीयः सुखं महीयाननर्थ इति निवृत्तिः। तथा विषादावपि प्रवृत्तस्य शास्त्रे गर्हितत्वादल्पीयाननर्थो निवर्तते, महीयांश्च प्रवर्तत इति न ते प्रवर्तन्ते। इयमेव हि प्रेक्षा, यत्पुरुषार्थेऽपि शास्त्रलोकविरोधपरामर्शः। स्वरूपेणेष्यमाण-तामात्रनिबन्धनत्वात्पुरुषार्थतायाः। अत एव यत्र लोकशास्त्रविरोधस्तत्र त्वव्याध्यादिपरिपीडिताः प्रयागवारिपातानशनादिनापि देहं त्यजन्तः प्रेक्षावन्तो

ऽपि दृश्यन्ते । न कश्चिद्दुःखमनुभविष्यामीति तत्साधने प्रवर्तन्ते । अपि तु दुःखनिवृत्तेरनुभूयतामात्रं विवक्षितम् । दुःखनिवृत्तिसत्तापि वा । आद्यश्चेत्तुष्यतु दुर्जनः, चरमे जन्मन्यनुभूयत एव, समाधिभावादात्यन्तिकीदुःख निवृत्तिरप्यनागता वर्तमानाप्यचिरमनुभूयत एव । द्वितीये तु प्रसक्तकण्टकादिहेतुकदुःखनिवृत्तेरपुरुषार्थत्वप्रसङ्गः सर्वदाननुभूयमानत्वात् । तथात्वे वा विषयान्तरसञ्चाराभावप्रसङ्गः, निवृत्तेस्सर्वदा तादवस्थ्यात् । तस्मात्सुखरहितो मोक्षः पुरुषार्थ इति ।

तदपि न शोभां बिभर्ति । यद्यपि सर्मात्मनानिष्टनिवृत्तिर्मोक्ष इति तावदविवादं सर्ववादिनाम् । दुःखन्तु यादृशतादृशमप्यनिष्टमेव । तथाप्येतदीयमुक्तौ सुखनाशरूपानर्थस्यापि सद्भावान्न पुरुषार्थता । अनिष्टनिवृत्त्याशया प्रवृत्ताविष्टनिवृत्तिभयान्निवृत्त्यापत्तेः । दुःखशबलसुखहानौ सुखशबलदुःखोपादानप्राप्तेश्च । यदत्रोक्तम्—यस्य दुःखमुपादेयं तस्य हेयं किमुच्यताम् । हेयहीनस्य का मुक्तिः केन चाप्युपदिश्यते । इति तदिदमसङ्गतम्, न हि वयं दुःखस्योपादेयत्वमुपपादयामः । किन्तु समव्ययफलत्वेन विनिगमने कारणाभावान्न प्रवृत्त्युपपत्तिरिति ब्रूमः । यथोक्तम् —

'असत्यानि दुरन्तानि समव्ययफलानि च । अशक्यानि च वस्तूनि नारभेत विचक्षणः'। इति अङ्गीकृत्यैव समव्ययफलत्वमुक्तम् । वस्तुतस्तु आयादपि व्ययो गरीयानेव । न हि सांसारिकसुखस्य दुःखापेक्षयाल्पत्वं प्रमितम् । कस्मिंश्चन जन्मन्ययं दरिद्रस्सन्दुःखितो भवति, कस्मिंश्चित्सार्वभौमः, कदाचिन्नरकमनुभवति, कदाचित्स्वर्गमिति ह्यनुभवः । या च मोक्षशास्त्रेषु सांसारिकसुखनिन्दा सा निरस्तसमस्तदुःखं मोक्षगतं परमानन्दमपेक्ष्याल्पत्वाभिप्रायेणैव । लोके तावदल्पस्यापि सुखस्य हानौ महतोऽपि दुःखस्य मोक्षाय न कोऽपि यतते । सति चैवं महतस्सुखस्य हानौ अल्पदुःखमोक्षाय कः पुमान्यतेत ? यदि तु जडः पाषाणनिर्विशेष एव तस्यामवस्थायामात्मा भवेत्कृतमप-

वर्गेण, संसार एव परमावस्था, यत्र तावदन्तरान्तरापि दुःखकलुषितमपि स्वल्पं वा सुखमुपभुज्यते। चिन्त्यतां तावदिदम्. किमल्पसुखानुभवो भद्रक उत सर्वसुखोच्छेद एव।

ननु 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' इति मुक्तस्य दुःखवत्सुखस्यापि हानिः श्रूयते। तथा 'न प्रेत्य संज्ञास्ति' इति ज्ञानाभावश्च। अतः कथं सुखरहितमोक्षवादस्य हेयतेति चेन्न। भावानवबोधात्। सर्वात्मनानिष्टनिवृत्तिर्मोक्ष इति सर्वसंप्रतिपन्नम्। सामस्त्येन प्रियहानिश्च अनिष्टा। अनिष्टप्राप्तौ च मोक्षस्यापुरुषार्थत्वं प्रसज्येत एव। अतः प्रिये इष्टमनिष्टञ्चेति विभागः कल्प्यते। यच्च प्राकृतं अन्तःकरणपरिणतिरूपं सुखादि प्रियं तदनिष्टमेव, तस्य दुःखानुषक्तत्वात्। तदेवोक्तश्रुत्या मोक्षे निषिध्यते, न तु 'बलमानन्द ओजश्च सहो ज्ञानमनाकुलम्। स्वरूपाण्येव जीवस्य व्यज्यन्ते परमाद्विभोः' इत्यादि श्रुतिसिद्धमप्राकृतं जीवस्वरूपभूतमानन्दादिकम्। तच्चाप्राकृतत्वेन दुःखाननुषङ्गान्निष्कण्टकं कथमप्यनिष्टं न भवत्येवेति। अनेनैव सुखस्योत्पत्तिमत्वे अभिहितो दोषोऽनङ्गीकारपरास्तो ज्ञेयः। स्वरूपत्वेनानादित्वस्योक्तत्वात्। यदत्राप्युक्तं तदसत्। संसारदशायामावृतास्सन्तो मुक्तौ व्यज्यन्त इति श्रुतत्वात्। आवरणञ्च मायाविद्यादिसमाख्याता प्रकृतिरेव। सज्जीवस्याप्राकृतदुःखाभावाद् दुःखे न विभागः कर्तुं शक्यत इति सामस्त्येन दुःखहानिः, प्राकृतसुखादिहानिश्च उक्तश्रुत्यर्थो वेदितव्यः। 'न प्रेत्य संज्ञास्ति इति श्रुतिरपि मुक्तकर्मकज्ञानमेव निराह, न तु मुक्तकर्तृकज्ञानम्। एवञ्च मुक्तानाममुक्तज्ञेयता नास्तीति तदर्थः। याज्ञवल्क्यमैत्रेयीसंवादान्तर्गतस्यास्य वाक्यस्य तत्प्रकरणपर्यालोचनायामयमेवार्थ इति स्फुटतरं गम्यते। विस्तरस्तु न्यायसुधायां द्रष्टव्यः। एतेनैव मोक्षं सुखरहितं वदन्तः प्राभाकरादयो मीमांसका अपि परास्ताः। नैयायिकैकदेशिनो भासर्वज्ञादयस्तु मोक्षेऽप्यनुवर्तमानं नित्यमानन्दमुपयन्तो आत्यन्तिकदुःखनिवृत्तिपूर्वकसुखावाप्तिर्मोक्ष इति प्राहुः।

जीवगणाः हरेरनुचराः

'तत्वतो भेद' इत्युक्तभेदपञ्चकघटकजीवेश्वरभेदः सुतरामनुपपन्नः। जीवेशयोर्लक्षणया अभेदबोधक 'तत्वमसी'ति श्रुतेरस्याश्चोपक्रमादिषड्विध। तात्पर्यलिङ्गोपेतत्वेन प्राबल्यात्। तद्विरोधेन 'द्वासुपर्णे'त्यादि भेदश्रुतिरप्रमाणम्। अन्यथा ऐक्यश्रुतेर्निर्विषयत्वं स्यादितिं पूर्वपक्षे 'ओं पृथगुपदेशात् ओं' इति सूत्रोक्तदिशा 'भिन्नोचिन्त्यः परमो जीवसंघात्पूर्णः परो जीवसंघो ह्यपूर्णः, 'आत्मा हि परमः स्वतन्त्रोऽधिकगुणो जीवोल्पशक्तिरस्वतन्त्रोऽवर' इत्यादिश्रुतेर्भेदमन्तरा अनुपपद्यमानविरुद्धधर्माधिकरणत्वरूपयुक्त्युपेतत्वेन 'शास्त्रगम्यपरेशानाद्भेदः स्वात्मन ईर्यते। अनुभूतिविरोधेन कथमेकत्वमुच्यत' इति अनुव्याख्यानोक्तदिशा उपजीव्यत्वेन च प्राबल्यात्तद्विरोधेन चानुभवविरोधेन च 'तत्वमसी'ति श्रुतिर्न जीवब्रह्मैक्यबोधिका। किन्तु पदद्वयलक्षणापेक्षया तदिति एकपदमात्रे लक्षणापेक्षया गौण्या ज्यायस्त्वेन गौण्या वृत्त्या तत्सदृशज्ञानानन्दादिगुणवत्त्वेन तत्सदृशस्त्वमसीति सावकाशा, अतो न तया विरोधो भेदागमस्य।

उपक्रमादेर्मानान्तराविरुद्ध एव तात्पर्यगमकत्वम्। ऐक्यवाक्यस्योपक्रमादिविरोधः 'तत्वमसी'ति वाक्यस्य गौणार्थं हित्वा 'सप्तसु प्रथमे'ति व्याकरणनियमानुसारेण वा अतत्वमसीति पदच्छेदाद्यनेकप्रकारेण वा भेदाविरुद्धा अनेकार्था ग्रन्थकारैरेवोक्ताः। ग्रन्थगौरवभयान्नात्र प्रपञ्चिताः। अतो विरोधाभावाज्जीवा ईश्वरभिन्ना एवेति भेदोपपादनार्थं भेदमन्तरानुपपद्यमानामुख्यकर्तृत्वमुख्यकर्तृत्वरूपविरुद्धधर्माधिकरणत्वं जीवेश्वरयोर्वक्तु 'जीवगणा हरेरनुचरा' इति वाक्यं प्रवृत्तम्।

अत्रोक्तजीवानाममुख्यकर्तृत्वेन न केवलं जीवानामीशाद्भेदः, अपि तु जडादपि। तथाहि — जडस्येच्छापूर्वककर्तृत्वाभावात्। जीवानां च

स्वेच्छापूर्वककृतिमत्त्वरूपकर्तृत्वस्य सत्त्वाजडाद्भेदः परस्परं जीवभेदोऽप्यनेन सिध्यति । तथाहि — ज्ञानेच्छापूर्वककृतिमत्त्वरूपकर्तृत्वोक्त्या कृतिप्रयोजकेच्छाज्ञानादृष्टानां भेदस्य 'ओं अदृष्टानियमा'दिति सूत्रोक्तरीत्या सिद्धत्वात् । सूत्रार्थस्तु—जीवानां भगवत्प्रतिबिम्बत्वाद्बिम्बस्य भगवतो एकत्वात्प्रतिबिम्बानां मिथो वैचित्र्यं मास्तु, इत्याशङ्कापरिहाराय प्रतिबिम्बत्वमभ्युपगम्य वैचित्र्ये कारणान्तरमाह सूत्रकारः अनाद्यविद्याकर्मादिवैचित्र्याद्वैचित्र्यम् इति । न वैचित्र्यान्यथानुपपत्या जीवानां भगवत्प्रतिबिम्बत्वाभावो वाच्यः। अशेषजीवानां भगवत्प्रतिबिम्बत्वेऽपि अविद्याद्यदृष्टवैचित्र्येण वैचित्र्यस्योपपत्तेः । एवं परस्परं सर्वजीवानामनाद्यदृष्टाविद्यादिभेदाद् भेद इति सूचितः ।

यथा जीवेश्वरयोर्जीवानां च परस्परं जडजडजीवयोश्च विरुद्धधर्माधिकरणत्वेन भेदः, तथा जलानलादिजडानामपि स्पन्दनतोषणदहनशोषणादिविरुद्धधर्मवत्त्वेन परस्परं जडजडभेदोपपादनीयः, एवं जीवगणा हरेरनुचरा इत्यंशस्य पूर्वोक्तपञ्चभेदोपपादकत्वं सिद्धम् ।

अनुचरा इति पदस्वारस्येन हरीच्छाधीनस्वेच्छापूर्वककृतिमत्त्वरूपकर्तृत्ववन्तः जीवा इत्यर्थः। अतः 'अनुर्लक्षणे'ति सूत्रोक्तकर्मप्रवचनीयसंज्ञाया अप्रसरात् हरेरिति षष्ठी साधी । हरीच्छाधीनस्वेच्छाधीनकृतिमत्त्वरूपं अमुख्यंकर्तृत्वं जीवानां दत्तस्वातन्त्र्यरूपं सकलसच्छास्त्रसिद्धं सर्वमुमुक्षुभिरपि प्रथममवश्यं ज्ञेयं प्रमेयमिति सकलसत्सिद्धान्तप्रमेयसारसंग्राहकपद्ये अस्वतन्त्रा इत्यनुक्त्वानुचरा इति पदं सत्सिद्धान्तस्थापकशिरोमणिभिः पदवाक्यप्रमाणपारावारपारङ्गतैः श्रीव्यासतीर्थश्रीमच्चरणैः प्रायोजि । अनेनेवं ज्ञायते अस्वतन्त्रा इत्युक्त्वा अस्वतन्त्रतत्त्वरूपधर्मेण जीवानामीश्वराद्भेदोपपादने जीवानां जडवैलक्षण्यं झटिति न ज्ञायेत् । जीवनामस्वतन्त्रत्वेन जडसाम्ये विधिबद्धत्वं कर्मफलभागित्वं च न स्यात्, अतो जडवैलक्षण्यस्य स्पष्टबोधकेन निरुक्तकर्तृत्वाख्यदत्तस्वातन्त्र्यबोधकानुचरशब्देन जीवाना-

मिच्छापूर्वककृतिमत्त्वेन जडापेक्षयाऽधिक्यं स्वेच्छापूर्वककृतिमत्त्वात्स्वकर्मफल-भोक्तृत्वं विधिबद्धत्वं च स्वेच्छापूर्वककृतिमत्त्वरूपकर्तृत्वस्यापि भगवदधीन-त्वेनामुख्यत्वं चेत्यादि सर्वप्रमेयं संगृह्योक्तमिति ।

अत्रायं विचारः । जीवानां कतृत्वमेव नास्ति । अतः निरुक्तकर्तृत्व-कथनमसङ्गतम् । तथाहि—'जीवा न कर्तारः 'स हि सर्वस्य कर्ता' इत्यादि-ईश्वरमात्रकर्तृत्वबोधकश्रुतिविरोधात् । 'यत्कर्म कुरुते तदभिसंबध्यत' इति जीवकर्तृत्वबोधकश्रुत्यपेक्षया महदादिकर्तुरीश्वरस्यैव कर्तृत्वाङ्गीकारे लाघव-सहकृतत्वेन ईश्वरकर्तृत्वबोधकश्रुतेः प्राबल्यात् । किञ्च क्रियास्वातन्त्र्यं हि कर्तृत्वं 'स्वतन्त्रः कर्ते'ति पाणिनिस्मरणात् । न हि स्वातन्त्र्यं जीवस्य संभवति । तच्चिकीर्षोस्तत्कार्यासिद्धेः । अनिच्छतोपि देहहानेरित्यादियुक्त्य-नुगृहीतेन 'नाहं स्वतन्त्र' इति साक्षिणा स्वातन्त्र्याभावस्यैव निश्चितत्वात् । 'ओं. इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः' । 'न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभु'रित्यादिभिः स्पष्टः जीवकर्तृतायाः निषेधात् ।

किञ्च जीवेङ्गीक्रियमाणं कर्तृत्वं स्वतन्त्रमुत परतन्त्रम् ? नाद्यः 'नान्यः कर्ता, न च स्वातन्त्र्यमन्यग'मित्यादिश्रुतिविरोधात् । हिताक्रियादिदोष-प्रसक्तेश्च । कर्तृत्वं परतन्त्रमिति द्वितीयपक्षोपि न युक्तः । कर्तृत्वशक्तेः स्वाधीनत्वेपि तक्षकस्य प्रासादकारयितृपुमधीनत्ववत् वेत्तवेतनदानादिना बहिः प्रेर्यमाणत्वमात्रं दारुयोषावदीश्वराधीनचेष्टाकत्वादि रूपम् । बहिः प्रेर्यमाणत्वरूपाद्यपक्षो न युक्तः । 'य आत्मानमन्तरो यमयती'त्यादिश्रुति-विरोधात् । दारुयोषावदीश्वराधीनचेष्टाकत्वरूपद्वितीयपक्षोपि न समञ्जसः । तथात्वे दारुयोषावज्जडतुल्यत्वेन विध्यविषयत्वापत्तेः कर्मफलसंबन्धश्च न स्यात् । अतो न कर्तार एव जीवा इति पूर्वपक्षः ।

सिद्धान्तस्तु, प्रागुदाहृतश्रुतिभिरीश्वरः कर्ता, 'कर्ता विज्ञानात्मा पुरुषः यत्कर्म कुरुते तदभिसंबध्यते । जक्षन् क्रीडन् रममाणः आत्मानमेव

लोकमुपासीत 'इत्यादिश्रुतिभिः, मोक्षाद्यर्थं साधनाद्युपादानप्रतीतिलक्षणेनाहं करोमीति साक्षिप्रत्यक्षेण जीवः कर्ता कर्मफलभोक्तृत्वादित्याद्यनुमानेन च जीवोऽपि कर्ता। न चात्र हेत्वसिद्धिः। कर्मफलभोगस्य साक्षिसिद्धत्वात्। तदभावे विधिनिषेधशास्त्रस्य वैयर्थ्यापत्तिः। न हि जडं प्रति विधिनिषेधो युज्यते, नापीश्वरं प्रति, तस्य विध्यादिविषयत्वे तस्यापि पुण्यपापादिसंबन्धेनानीश्वरत्वापत्तेः। जीव एव कर्ताङ्गीकार्यः। कर्तृत्वेऽपि योग्यतावैचित्र्याद्वैचित्र्यम्। एवं जीवेश्वरयोः कर्तृत्वबोधकप्रमाणसद्भावात् उभयविधश्रुत्योरपौरुषेयत्वेनानाशङ्कितदोषयोर्मीमांसाद्यनुगृहीतयोः प्रामाण्यमक्षतम्।

परस्परविरुद्धार्थयोः प्रामाण्यघटनं तु अर्थान्तरपरत्वेन कार्यमेव। नत्वन्यतरस्य सर्वथाऽप्रामाण्यं वक्तव्यम्। वेदानां प्रतीतार्थप्रच्युतिलक्षणमेवाप्रामाण्यं न सर्वथेति 'तत्वनिर्णया'दावुक्तम्। 'युक्तिमल्लिकाया'मपि 'गृष्ट्योर्मिथो विरोधे हि हत्वैकामपराङ्मुखीम्। विरोधशान्तिं कः कुर्याद्विना म्लेच्छकुमारकान्। तृणापिण्याकदानेन कृत्वार्थान्तरलालसाम्। ततः प्रच्यावयेदेकां क्रुद्धाप्यन्याध्वनां व्रजेत्। एवं श्रुत्योर्विरोधेऽपि या वागन्यार्थकर्तिनी तां तदर्थपरां कृत्वा मोचयेत्कलहं तयो'रित्युक्तत्वेन जीवकर्तृत्वबोधकश्रुतिरमुख्यकर्तृत्वपरा। ईश्वरकर्तृत्वबोधिका श्रुतिर्मुख्यकर्तृत्वपरा। मुख्यकर्तृत्वं नाम स्वेच्छामात्राधीनप्रवृत्तिमत्त्वरूपमुख्यं स्वतन्त्रत्वाख्यकर्तृत्वम्। स्वानधीनकारणान्तराद्यनपेक्षत्वं मात्रशब्दार्थ इति न कश्चित्क्षुद्रोपद्रवः। एवं च जीवकर्तृत्वश्रुतेरमुख्यकर्तृत्वबोधकत्वेन नेश्वरस्य स्वतन्त्रकर्तृत्वबोधकश्रुतिविरोध इति प्रामाण्यं सुस्थम्।

एवं जीवस्य अमुख्यकर्तृत्वं ईश्वरस्य मुख्यकर्तृत्वमित्यङ्गीकारे, लोके मुख्यकर्तुरेव विधिबद्धत्वं कर्मफलभोक्तृत्वं दृष्टम्, तद्वत् ईश्वरस्यैव कर्मफलभागित्वं स्यादिति चेन्न। अमुख्यकर्तृत्वस्यैव विधिबद्धत्वे कर्मफलभोगित्वे च प्रयोजकत्वमङ्गीकरणीयम्। एतच्चाग्रे उपपाद्यते। ततश्च विध्यविषयेभ्य

ईशमुक्तजडेभ्यो व्यावृत्तस्य स्वसंबन्धितया विधिज्ञानस्य तज्जन्यायाः फलसाधनेच्छायाः तदनुकूलकृतेश्च जीवेऽनुभवसिद्धतया तस्य च ज्ञानादेरीश्वराधीनत्वस्य श्रुतिस्मृतीतिहाससिद्धत्वादीश्वरो विधिनिषेधशास्त्रवैयर्थ्याय स्वस्य वैषम्यादिदोषपरिहाराय च अनादियोग्यताकर्मापेक्षयैव जीवं प्रेरयित्वा विध्यादिबोधकशास्त्रेण विहितादौ कर्तव्यताज्ञानमुत्पाद्य इच्छामपि जनयित्वा क्रियानिष्पत्त्यनुगुणं प्रयत्नं च सम्पाद्य स्वयं च तदन्तर्गतः कुर्वन् कर्तृत्वशक्तिनियमनपूर्वकं दारुयोषास्थानीयेनापि जीवेन कर्मकारयतीत्येवं ईश्वरस्य मुख्यं स्वातन्त्र्येण कर्तृत्वम् । जीवस्य क्रियास्वातन्त्र्याख्यमुख्यकर्तृत्वाभावेऽपि ज्ञानेच्छापूर्वककृतिमत्त्वरूपं दारुयोषादाववियमानममुख्यं कर्तृत्वमस्तीत्यङ्गीकर्तव्यमिति ।

एतदेव 'तत्वप्रकाशिका, तात्पर्यचन्द्रिका, गीताभाष्य, तत्तात्पर्यादौ' स्पष्टमुक्तम् । 'गीताभाष्ये च 'स्वातन्त्र्याभावापेक्षयैवाकर्तृत्वमित्यादि । क्रियास्वातन्त्र्याभावे कथं कर्तृत्वमिति चेदित्थं जीवगतप्रवृत्त्यादेरीश्वराधीनत्वेपि ईश्वरः जीवस्य प्रयत्नेच्छामुत्पाद्यैव प्रवर्तयतीति जीवेच्छाधीनत्वस्यापि अनुभवसिद्धतया स्वेच्छाधीनप्रवृत्तिमत्वस्यैव कर्तृत्वशब्दार्थत्वात्कर्तृत्वमुपपाद्यत इति ।

न च करिष्यामीति इच्छायामप्यकरणात् न करिष्यामीतीच्छायामपि करणाच्च कथं स्वेच्छाधीनप्रवृत्तिमत्वमिति वाच्यम् । नह्यस्माभिर्जीवस्य नियमेन स्वेच्छाधीनप्रवृत्तिमत्वमुक्तम् । तथा सति मुख्यकर्तृत्वापत्तेः । उक्तान्वयव्यतिरेकव्यभिचाराभ्यां कर्तृत्वे मुख्यत्वमात्रं प्रतिक्षिप्तं, न तूत्सर्गतः स्वेच्छाधीनप्रवृत्तिमत्वरूपं कर्तृत्वम् । एवमेवोक्तं सूत्रकारैः 'ओं उपलब्धिवदनियमः ओं' इति सूत्रे । तदर्थस्तु—यदि प्रत्यक्षयुक्तिश्रुतिभ्यो जीवः कर्तेत्यङ्गीक्रियते तर्हि 'नान्यः कर्तेति' श्रुतौ तथा 'इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिरिति सूत्रे च कथं प्राक् कर्तृत्वनिरासश्चेत्यतस्तदाशयमाह 'ओं उपलब्धि-

चदनियमः ओं' । इदं ज्ञास्यामीति स्पृहयतोपि जीवस्य यथा ज्ञाने न नियमः स्वेच्छानुसारेण न ज्ञानलाभः तथेदं कुर्यामीतीच्छतोऽपि न क्रियायां नियमः न क्रियालाभ इति नियतकर्तृत्वाभावपरं प्रागुक्तश्रुतिसूत्रद्वयमिति ।

अन्याधीनस्य कर्तृत्वानुपपत्तिस्तु 'यथा च तक्षोभयथेति' सूत्रेणैव परिहृता । जीवस्यास्वतन्त्रत्वे कथं कर्तृत्वं स्वतन्त्रः कर्तेत्युक्तेरित्यत आह 'ओं यथा च तक्षोभयथा ओं' । यथा तक्षो—रथकारः कारयितृनियन्तृत्वेन कर्तृत्वेन चेत्युभयप्रकारेणोच्यते तथा जीवोपि ईशनियतोपि कर्तेत्युच्यत इति ।

नन्वेकैव क्रिया कथं उभय कर्तृकेति चेन्न । अनेककर्तृकरथाकर्षणादिक्रियावदुपपत्तेः । नन्वेवमीश्वरस्य मुख्यकर्तृत्वे तस्यैव विधिविषयत्वं कर्मफलभोक्तृत्वं च स्यादिति वाच्यम् । अस्वतन्त्रकर्तृत्वस्यैव तदुभयप्रयोजकत्वमन्वयव्यतिरेकबलादङ्गीकार्यम् । तथा च तदुभयप्रयोजकास्वतन्त्रकर्तृत्वाभावान्नेश्वरस्य विधिबद्धत्वादिकमिति सिद्धम् ।

न केवलं निरुपचरितस्वातन्त्र्यरूपमुख्यकर्तृत्वमप्रयोजकं, प्रत्युत तद्बाधकमेव । न हि स्वतन्त्रः स्वात्मनं बध्नाति कर्मफलं चानुभवति । तथा सत्यनीश्वरत्वापत्तेः । एतदप्युक्तं गीताभाष्ये—'अकर्तृत्वेपि विधिद्वारा ईश्वरप्रसादादिच्छोत्पत्त्योक्तकारणैः कर्मद्वारा पुरुषार्थो भवतीति न प्रवृत्तिविधिवयर्थ्यम्' इति । अकर्तृत्वेपीत्यस्यापराधीनकर्तृत्वाभावेपीत्यर्थः 'प्रमेयदीपिकाया' मुक्तः ।

अस्तु वा क्रियास्वातन्त्र्यरूपं कर्तृत्वम् । तदपि जीवे ईश्वरायत्तं विद्यते । स्वावरजीवापेक्षया जडापेक्षया वा तदुपपत्तेः । यथोक्तं 'गीता तात्पर्ये 'तदधीनं स्वतन्त्रत्वं स्वावरापेक्षयैव तु' इति स्वातन्त्र्यं च जडान् प्रति —प्रभुर्हि जीवो जडमपेक्ष्येति । उक्तं हि 'प्रमेयदीपिकायां' — 'जडं हि परकृतनोदनात्क्रियावद्भवति । नत्वागन्तुककारणमन्तरेण स्वेच्छया, जीवस्तु अनादिसिद्धया सत्तातुल्यया परमेश्वरप्रसादायत्तया क्रियाशक्त्या कर्तेत्युच्यत

इति युक्तस्तत्र कर्मविधि'रिति । एवं च ईश्वरे स्वतन्त्रं कर्तृत्वं जीवे त्वमुख्यं कर्तृत्वमिति सिद्धम् ।

ईश्वरस्य अन्यानधीनकर्तृत्वाख्यमुख्यकर्तृत्वात् कर्मफलाभोक्तृत्वम् । जीवस्यैव तदधीनकर्तृत्वाख्यामुख्यकर्तृत्वमित्युक्ते लोके राजधनिकादिमुख्य कर्तृणाममात्यभृत्याद्यमुख्य कर्तृकृतकर्मफलभागित्वं दृष्टम् । न तु तदनधीन-कर्तृणां, तद्वत् ईश्वरस्य जीवनियामकत्वेन सर्वकर्मणि मुख्यकर्तृत्वे ईश्वरस्य कर्मफलभागित्वमवर्जनीयं स्यात् इति चेन्न । लोके राजादिप्रयोजककर्तृणां भृत्यामात्यादिकर्तव्यकर्मप्रेरणा तत्कर्मजन्यफलेच्छापूर्विका फलेच्छाधीनत्वात् अस्वतन्त्रा । अतः तत्कर्मफलभागित्वं ईश्वरकृता जीवानां कर्तव्यकर्मप्रेरणा न तत्कर्मफलेच्छापूर्विका स्वतन्त्रत्वात्, अत ईश्वरस्य न कर्मफलभोक्तृत्वमिति-सिद्धम् ।

ईश्वरस्य जीवानां कर्मणि प्रेरणायां फलानपेक्षणन्तु पूर्णानन्दत्वात् । 'पूर्णानन्दस्य तस्येह प्रयोजनमतिः कुतः ?' 'आप्तकामस्य का स्पृहा ।' 'ओं न प्रयोजनवत्वात् ओं', 'ओं लोकवत्तु लीलाकैवल्यं ओं' इत्याद्यनेक-प्रमाणसिद्धम् । एवं जीवानां स्वस्वकर्मप्रेरणायां तत्तदीयानादियोग्यतादि-सापेक्षत्वान्नेश्वरस्य वैषम्यादिदोषः । उक्तं हि वैषम्याधिकरणे—'ओं वैषम्य-नैर्घृण्ये न हि सापेक्षत्वा'दित्यादिना । कर्तृत्वाधिकरणेऽपि — 'ओं कृत-प्रयत्नापेक्षस्तु विहितप्रतिषेधावैय्यर्थ्यादिभ्य ओं' इति सूत्रेण । जीवानाम-नाद्यदृष्टयोग्यतादीनामीश्वराधीनत्वेन स्वाधीनकारणान्तरसापेक्षत्वान्नेश्वरस्य स्वातन्त्र्यहानिः । उक्तं हि— 'ओं उपपद्यते चाप्युपलभ्यते च ओं' न च कर्मापेक्षत्वेनास्वातन्त्र्यम् । 'द्रव्यं कर्म च कालश्च स्वभावो जीव एव च यदनुग्रहतः सन्ति न सन्ति यदुपेक्षये'ति । 'ओं सत्वाच्चावरस्ये'ति सूत्र-भाष्योदाहृत 'काल आसीत्पुरुष आसीत्परम आसीत्तदावृतमासीदथैक एव परम आसीद्यस्यैतदासीन्नह्येतदासीदि'ति काषायणश्रुतौ । यद्यदासीत् तदावृतं तदधीनमासीदिति सर्वस्य कालकर्मादेर्भगवदधीनत्वश्रवणाच्च ।

यद्यपि ईश्वरः कर्मापेक्षां विनैव फलदाने शक्तः तथापि तदपेक्ष्यैव फलं ददानीति स्वसङ्कल्पादेव तदपेक्षेति। उक्तं चैतत्—'एतानपेक्ष्यैव फलं ददानीत्यस्यैव सङ्कल्प इति स्वतन्त्रता। नास्यापगच्छेत्सहि सर्वशक्ति-र्नाशक्तता क्वचिदस्य प्रभुत्वात्' इति। 'साधनानां साधनत्वं यदात्माधीनमिष्यते। तदा साधनसम्पत्तिरैश्वर्यद्योतिका भवेत्' इति च। एवं च स्वयमेव गति-समर्थस्यापि ग्रामादिगमने करितुरगादि वाहनापेक्षा यथा, तथेश्वरस्य प्रकृति कालकर्मस्वभावाद्यपेक्षा परमैश्वर्यप्रकाशनार्था।

तदेतत्सर्वं प्रमेयं श्रीमदाचार्यैः महाभारततात्पर्यनिर्णये द्वाविंशाध्याये उक्तम्। 'प्रत्यक्षमेतत्पुरुषस्य कर्म तेनानुमेया प्रेरणा केशवस्य। स्वकर्म कृत्वा विहितं च विष्णुना तत्प्रेरणेत्येव बुधोनुमन्यते। तेनैति सम्यग्गतिमस्य विष्णो र्जनोऽशुभो दैवमित्येव मत्वा। हित्वा स्वयं कर्मगतिं च तामसीं प्रयाति तस्मात्कार्यमेव स्वकर्म। ज्ञातव्यं चैवास्य विष्णोर्वशत्वं कर्तव्यं चैवात्मनः कार्य-कर्म। तत्प्रेरकं विष्णुमेवाभिजानन् भवेत्प्रमाणत्रितयानुगामी' इति। एवं च क्रियास्वातन्त्र्यं हि कर्तृत्वं इदमेव स्वेच्छाधीनप्रवृत्तिमत्वं नाम। एतादृशं कर्तृत्वं जीवानामस्वतन्त्रं पराधीनमित्यर्थः। अन्याधीनस्वेच्छाधीनप्रवृत्तिमत्वरूप कर्तृत्ववन्तो जीवा इत्यर्थः। अयमेवार्थः दत्तस्वातन्त्र्यपदबोध्यः।

स्वातन्त्र्यं नाम निरुक्तकर्तृत्वम्। दत्तमित्यनेन भगवदधीनमित्यर्थः सूचितः। पराधीनस्वेच्छाधीनप्रवृत्तिमत्वरूपकर्तृत्ववन्तः जीवा इत्यर्थः। हरेरनुचरा इत्यस्य अनु अधीनाः चराः। चरन्तीति चराः क्रियाकर्तृत्ववन्त इत्यर्थः। अधीनत्वं सन्निधानात्। परमधार्मिकमनुत्तमशास्त्रमित्यादाविव कतृत्वे भासते। तथा च हर्यधीनस्वेच्छाधीनप्रवृत्तिमत्वरूपकर्तृत्ववन्तः जीवा इत्यर्थः। 'नाहं कर्ता हरिः कर्ता तत्पूजा कर्म चाखिलम्। तथापि मत्कृता पूजा त्वत्-प्रसादेन नान्यथा' इति स्मृतिरपि इममेवार्थं गमयति।

हेमलता

हेमलता बाला षोडशवर्षवयस्का सुललिताङ्गयष्टिर्ललना सुवर्णवर्णा रूपसौन्दर्यसौशील्यगुणगणशालिनी चकितहरिणीनयना समवलोकिता दक्षिण-कर्णाटकप्रवासावसरे मरुत्तरयानपथि । श्रीमदानन्दतीर्थावतारपवित्रं श्रीमन्-मध्वमुनिप्रतिष्ठितश्रीयशोदानन्दमूर्तिविभ्राजमानं रजतपीठपुरं नाम 'उडुपि' इति सुप्रसिद्धं क्षेत्रं यद्विद्यते तस्य पथि सह्याद्रेर्दुरधिगममवतरणवर्त्म आगुम्बि-घट्ट इति वर्तते । तत्र प्रवासिजनबाहुल्यात् मरुत्तरताने (मोटार) अलब्ध-स्थानाः पञ्चषः वेषवसनपरिधानतः पञ्चाम्बुदेशीया इति विज्ञायमानाः स्त्रीपुरुषा दिनत्रयं तद्ग्रामे श्रीगोपालकृष्णमन्दिरे न्युष्य पुनश्चतुर्थे दिवसे मरुत्तरे स्थान-लाभाय प्रयतमानाः प्रार्थयमाना मरुत्तरमधिरुह्य लब्धस्थाना उपाविशन् ।

तेषु उपरि वर्णिता हेमलतानाम्नी काचना ललना बाला अपरिणीता तथा जरसा विपत्परम्परया च विभ्रष्टतेजा जीर्णवयस्को द्विवेदीत्युपनामा जनकस्तादृशी एव जननी चासन् । अपरे त्रयो बाला षडष्टदशवर्षवयस्का दीनमुखा आसन् । आरोहंश्च अहमहमिकया जना लब्धोपवेशनस्थाना उपाविशंश्च । तन्मरुत्तरसारथिः स्ववेषभूषितश्चर्ममयीं पेशिकामेकामामर्दयन् मरुत्तरप्रयाणं संसूचयन् फँ-फँ-फँमिति ध्वनिमुत्पादयितुमारभत । कियन्तो जना उपविष्टाः, कुत्रकुत्र गन्तारः, केभ्यः कियद् धनं हस्तगतमभूदिति परिज्ञानाय मरुत्तरोपविष्टप्रवासिनां गणनाप्यारब्धा । मध्येमार्गं विद्यमानं तीर्थहळ्ळीति-ग्रामं जिगमिषन्तो ये पञ्चाम्बुदेशीयास्ते अपि स्वसविधे विद्यमानं यावद् धनं समर्प्य तूष्णीमासन् । तद् गृहीत्वा धनग्राहको (चक्कर) गणयन्नुवाच स 'पञ्चाणका न्यूना भवन्ति तावत्तदवश्यं प्रयच्छन्तु नो चेत् अवतरन्तु त्वरये'ति हस्तग्राहमाकर्षद् द्विवेदिनम् ।

अवलोक्य प्रसङ्गमिमं जनन्या सह उच्चैराक्रन्दितुमारभन्त सर्वे बालाः ।

हेमलता विशालनयने बाष्पाकुले अभवताम् । 'नास्ति किलास्मासु कपर्दिकापि, अतो दयया गृहीत्वाऽस्मान् गच्छतु मरुत्तरं यावत्तीर्थहळ्ळीम्' इति दैन्यस्य परां काष्ठामुपदर्शयन् प्रार्थयत्स निर्वासितो द्विवेदिनामा पञ्जाम्बुदेश्यो दीनमुखः । निष्करुणः स यमकिङ्कर इव धनग्राही बलादाकर्षदेव हस्तम् । दारपुत्रादयश्च रुदन्तः प्रत्याकर्षन्तः प्रत्यबध्नन् स्वविरुद्धं प्रयत्नम् । ततोऽस्मत् प्रियसुहृदः करुणया आणकपञ्चकमाकर्षकस्य हस्ते निक्षिप्य मरुत्तरस्य प्रयातुमानुकूल्यं समपादयन् । ततो द्विवेदिनमपृच्छन् 'कुत्रत्यो भवान्, क्व वा जिगमिषुः । इदानीमेतस्मिन् कर्णाटके देशे कस्मादागतः । का वा पञ्जाम्बुदेशः । क्वायं कर्णाटकः । का ते वृत्तिः । किमितो भवांश्चिकीर्षति' इति ।

एवमापृष्टः स द्विवेदी पञ्चाणकप्रदानेन आत्मानमुपकृतं मन्यमानः प्राह—'भगवन् पाकिस्थानप्रवेशिते पञ्जाम्बुविषये पितृपितामहादिपरम्परया एकस्मिन् ग्रामे कृतवसतिरहं समधीतवेदोपि जठरपिठरीपरिपूरणाय मार्गमन्यमपश्यन् संसारोपयुक्तविविधवस्तुजातं कथञ्चित् संगृह्य क्रयविक्रयव्यवहारेण आपद्धनमपि सम्पाद्य सुखेन कालमत्यवाहयं प्राक् । पाकिस्थानप्रवेशानन्तरं सप्ताहादर्वागेव दुर्यवना म्लेच्छाः पुरुषराक्षसा ग्राममस्मदीयमहिन्दुं कुर्वाणाः प्रत्यक्षमबला विदूषयन्तः, छन्दन्तः पुरुषान्, वर्षन्तो रुधिरासारं, घान्तयन्तो बालान्, अपहरन्तो ललना, लुण्टन्तः सर्वस्वं, प्रज्वालयन्तो गृहाणि दग्ध्वा भस्मसात्कुर्वन्तो नग्नपैशाचनृत्यं प्रदर्शयन्तो भयङ्करामतिरोमाञ्चकारिणीमविस्मरणीयां घोरां दशामुदपादयन् । ततः सर्वस्वं परित्यज्य कथञ्चिद् भगवतो दयया ततो निष्क्रम्य निर्निद्रा निराहाराः प्रवसन्तो जगद्गुरुश्रीशङ्कराचार्यप्रमुखपीठाधिष्ठितं शृङ्गेरीक्षेत्रमागत्य दुर्यवनसंसर्गादिदोषराशिप्रक्षालनाय प्रायश्चित्तं चिकीर्षवः प्रतिदिवसं शुल्कमदत्त्वैव धूमयानेन प्रवसन्तो मासात् प्राक् जगद्गुरुसन्निधानं प्राप्नुवाम महता प्रयासेन ।

तत्र च श्रीमच्छङ्कराचार्यपूज्यचरणा अस्मानन्वगृह्णन् परमया करुणया । देशविप्लवप्रसङ्गे बलात्कृते विदूषणादौ च न विशेषतः प्रायश्चित्तमिति शास्त्र-

वचनान्युदाहरन्तः समाश्वासयन्नस्मान् । अकारयंश्च प्रायश्चित्तमस्माभिः । समदर्शयन् शारदाम्बाम् । तदनुगृहीता अमन्दानन्दतुन्दिला दिव्यनिर्मल-जलशायिन्यास्तरङ्गिण्या तुङ्गाया दर्शन-स्पर्शन-स्नान-प्राशनादिभिः प्रक्षा-लितपापमला पवित्रान्तःकरणा अध्यवसाम पुण्यक्षेत्रे जगद्गुरूणां सन्निधौ च । ततोऽहमभ्यार्थयं पूज्यचरणान् ' श्रीमन् महाप्रभो तत्र भवतां पूज्यपादानामनु-ग्रहेण प्रतिदिनं सरित्स्नान-शारदाम्बासन्दर्शन-पवित्रान्नभक्षणादिना पूता वयम् । अत्र समीपे यन्महन्नगरं शिवमुखं नाम (शिवमोग्गा) तत्र सपरिवारो गत्वा नैसर्गिक्या सुशिक्षितया अखिलजनमनः श्रोत्रहारिण्या अतिसुन्दरया सङ्गीतकलया कुटुम्बं पोषयन् सुखमधिवसामि । अनुजानन्तु पूज्यपादा' इति । ततस्ते तथास्तु इत्यनुज्ञाय पुनस्ते वृत्तिवैकल्ये अवश्यमसत्तो भवानपेक्षतां साहाय्यमिति सानुग्रहमाश्वास्य फलमन्त्राक्षतादिकं वितीर्य शिवमुखप्रयाणानु-कूलं धनमर्पयित्वा व्यसर्जयन्नस्मान् । परमत्र दिनत्रये अप्राप्तमरुत्तरस्थला महर्घतया दिनत्रयभोजनार्थं धनव्यये जाते तत उर्बरितेन धनेन तीर्थहळ्ळी-प्राप्तये अपि असमर्था अभूमेति वदन्नयनाभ्यामश्रूण्यवर्षयत् ।

ततस्ते द्विवेदिप्रभृतयस्तीर्थहळ्ळीमुपेता मरुत्तरयानतोऽवतीर्य दीनया वाण्या प्रवासिनो धनमयाचन्त । तद्दीनतरोदन्तवचनश्रवणेन सञ्जातकृपाः मरुत्तरयानोपविष्टा अपि दयार्द्रचित्ताः स्वस्वानुकूलं धनमर्पयन् महाभागाः । ततस्ते परदिने तस्मिन्नपि ग्रामे संपादितधनाः सरित्प्रवरायां तुङ्गायां कृतस्नाना विहितभोजनाः सायं शिवमुखमभ्यागच्छन् । तन्नगरे धर्मशालायां न्यवसन् । ततश्च करकलिततंतुवाद्या हेमलता तथा द्विवेदी च सङ्गीतकलया नागरिकाङ्ग-नाननुरञ्जयन्तौ विशालासु वीथीषु समचरताम् । तत्र कश्चिद् धनाढ्यो वाणिज्यव्यवहारी उत्तरदेशीयो जात्या गौडब्राह्मणो युवा दृढाङ्गो दर्शनीय-शरीराकृतिरेतौ स्वगृहमुपानीय सङ्गीतजनितपरमानन्दस्तदावेदितमुदन्तमखिल-मश्रुणोत् ।

ततः पितृपितामहेभ्यः प्रागेव केनापि निमित्तेन पञ्चाम्बुदेशपरित्याग-मात्मकुलस्य जरत्तमैरावेदितं निवेद्य अचिरप्रवृत्तप्रथमपत्नीविरहोदन्तमाश्राव्य हेमलतापाणिग्रहणाभिलाषमाविष्करोत्। अन्वमोदत च परमानन्दतृप्तो द्विवेदी। प्रत्येत्य धर्मशालायामावेदयदेतद् वृत्तान्तं सहधर्मचारिण्यै। सा अपि अमन्द-मानन्दमविन्दतेत्यावेदनमनावश्यकम्। महद्दर्शनं सद्यःफलदायीति वचन-मवितथम्। शारदाम्बासन्दर्शनं पुण्यक्षेत्रदर्शनं जगद्गुरूणां परमानुग्रहः फल-मन्त्राक्षतप्राप्तिश्च कथं विफला भवेयुरिति पुनःपुनरेष द्विवेदी भार्यादिषु निवेदयत् दृढं विश्वासमदर्शयत्। ततः अल्पेष्वेव दिवसेषु हेमलता लक्षा-धीशस्य महतो दर्शनीयस्य वामाङ्गी समभवत्। आयव्ययादिलेखने न्ययोज-यत् जामाता द्विवेदिनम्। बालांश्च शालासु प्रावेशयत् अध्ययनाय। सर्वमपि द्विवेदिकुटुम्बं स्वगृहे एव समपुष्यत्। कदाकदाचिन्नगरे उत्सवादिप्रसङ्गेषु सङ्गीतकलया जनानानंदयति स्म द्विवेदी। ततः कालेनाल्पेनैव द्विवेदी जामात्रा हेमलतया गृहिण्या तनयैश्चोपेतः स्वीयेनैव मरुत्तरेण शृङ्गेरीमुपेत्य जगद्गुरु-सेवया कृतकृत्यः श्रीमत्पूज्यपादानुग्रहफलमिदमिति समभिनन्द्य कांश्चिद्दिवसानु-षित्वा प्रत्यायात् शिवमुखम्। एवं हेमलता स्वभर्त्रा समं परमानन्दममन्द-मनुभवन्ती जननीजनकाननुजानप्यानन्दयन्ती भक्तवत्सले भगवति भवद्भक्तेषु दृढां भक्तिमालम्बती भगवत्कथाश्रवणमननादिकमनुदिनमाचरन्ती स्वानुरूपं तनयं प्रसूय तमुपलालयन्ती तदीयसुन्दरवदनारविन्दसन्दर्शनेन धन्यमात्मान-मभिमन्यमाना पूर्वानुभूतविपत्परम्परामविस्मरन्ती सर्वं भगवदधीनमिति मन्यमाना सुखेन कालमतिवाहितवतीत्यलम्।

प्रियपाठकश्रेष्ठाः कथायामस्यां कश्चिदंशोऽस्मन्नयनगोचरीभूतः। तथापि तमानन्दपर्यवसायिनं कर्तुं कश्चिदंशो रूपान्तरितश्च। भारते किल निर्वासितानां विविधाविषया वृत्तपत्रेषु निरीक्ष्यन्ते श्रूयन्ते च भूयस्यः कथास्तत्र तत्र। प्रत्यक्षी भवंति च विपुला गोष्ठ्यः कुरुक्षेत्रादिषु नित्यमद्यापि। परमेतैर्वर्णनोद्युक्तै-र्नवीनमेव महाभारतसदृक्षं पुस्तकमेव निर्मातव्यं भवेत्।

दारुणो वज्राघातः

लेखकः—गलगली रामाचार्यः

केन नामेदं विदितं यदकाले वज्राघातो भवेद् इति। धाराधरगन्ध-विधुरेऽपि वसन्तसमयेऽशनिपातः समजनि मधुरवाण्यां तद्ग्राहकेषु च अतीत-वैशाखबहुलद्वादश्यामस्माकं चिरसहचरसहवासाः शरीरमात्रभिन्ना हृदयेन तादात्म्यमापन्नाः प्रियसुहृद्वराः दक्षिणभारतीयसंस्कृतसाहित्यपरिषत्प्रवर्तकाः साहित्य–व्याकरणादिशास्त्रावदातमतयः सरसगद्य-पद्यरचनासिद्धहस्ता आदितः प्रभृति मधुरवाण्याः संपादकाः समुत्कर्षैकनिरता देशविदेशेषु तस्या यशस्सौ–गन्ध्यप्रसारणपटीयांसः सुरसरस्वत्या अनलसानहङ्कारास्वार्थसेवकाः सुगृहीत–नामधेयाः श्रीबुर्लीश्रीनिवासाचार्याः वैकुण्ठलोकमुपस्थिता इति निवेदयितुं बलवद्विषीदत्यन्तरात्मा। लिखितुमसमर्था पतति लेखनी कराग्रात्। कम्पते करः। 'घडघडा'यते हृदयम्। प्रवर्तते बाष्पधारा निरन्तरा नयनयोः। किंकर्तव्यतामूढोऽस्मि सञ्जातः। अनाथा मधुरवाणी। असदृशसाहाय्य–सौभाग्यविरहदूनौ निरुत्साहतां नितरामुपगताविदानीं नवगुरुभारभुग्नौ संपादकौ। संपादकमण्डलस्य महती प्रत्याशाऽसीद् यत् त्रयोदशे वर्षे मधुरवाणीं साप्ताहिकीं विधाय सर्वत्र संस्कृतभाषाप्रसारेण सुरवाण्या गरीयसी परमश्रेय-स्करी च सेवा विधेया। अद्य सा प्रत्याशा सपद्येव विलीना हृदये प्रिय-सुहृदां परलोकगमनेन विद्युदिवाकाशे। विरलाः किल तादृशो महात्मानो ये किल स्वार्थलेशमप्यगणयित्वा मानावमानशङ्कामप्यनाकलय्य केवलंसुरवाणी-प्रणयेन तत्प्रचारे बद्धपरिकरा विपश्चितः।

श्रीबुर्लीश्रीनिवासाचार्या विपुलविद्याधनसंपन्ना अपि न लौककवित्ताढ्या आसन्। परम् असत्यपि धनानुकूल्ये अविद्यमानेऽपि जनसाहाय्ये जाग्रत्यपि अभावप्रतियोगितया कुटुंबपोषणाय पर्याप्तवित्ते नरीनृत्यन्त्यपि वैदुष्यसहोदर-

दारिद्र्यदेवतायां, निरुत्साहतामापादयन्त्यामपि परिस्थित्यां संस्कृतविद्वेषौदास्य-विषदूषितेऽपि समये केवलं संस्कृतप्रेम्णा प्रसारबद्धादरा पत्रिकामन्तरा नान्य-द्भाषाप्रचारसाधनं प्रधानमिति मत्वा द्वादशवर्षेभ्यः प्राग् मधुरवाणीमिमां पत्रिकां प्रारभन्त प्रकाशयितुं महता समुत्साहेन जनेनानेन साकम् । मधुर-वाणीप्रकाशनकृते कति वा नानुभूतानि सह्येतराणि दुःखानि । कति वा नाटितानि नगराणि । कतिशः कतिधा नाटिता वचोदेवता सभारङ्गस्थले । कति वा नाभ्यर्थिताः कदर्यासोदर्याधिकतया साहाय्यदानाय । कतिशो नासादिताऽवमानवेदना । सर्वमिदं गीर्वाणवाणीप्रणयेनाविगणय्य पुनस्सो-त्साहभराः प्राचालयन्मधुरवाणीम् । तत्कृते क्षुधां पिपासामपि व्यस्मरंस्ते । नाजीगणन्निद्रादेवीम् । न व्यसारयन्देहायासम् । नावहन्कुटुम्बपोषणचिन्ताम् । केवलं मधुरवाणीकृते सर्वं समयं सर्वं सामर्थ्यं व्ययीकृत्यामरणं चिरं बहु चाश्रम्यस्ते सुकृतिशेखराः सफलजन्मानो महाभागाः । तेषां श्रमपरिपाक एव मधुरवाण्या अद्यतना दिक्षु विदिक्षु यशोभासुरा समुज्ज्वला स्थितिः । प्रथमं कतिपयनगरेषु प्रचरन्ती मधुरवाणी अद्य काश्मीरं विस्मेरमुखं करोति । समुदञ्चयति मोदप्रपञ्चं पञ्चाम्बुदेशे । अङ्गवङ्गकलिङ्गानङ्गीकरोति स्वप्रणय-पात्रतया । सञ्चरति पाञ्चालदेशे रोमाञ्चपुलकिता । विहरति बिहारदेशे। विराजति राजस्थानेषु । महार्हणामभिपद्यते सौराष्ट्रे महाराष्ट्रे च देशे । कर्णमनोहरवचनामृतैरानन्दयति कर्णाटकान् सान्द्रानन्दान्विदधात्यान्ध्रान् । द्रढीयांसं स्नेहमुत्पादयति द्रविडेषु । सिंहलेष्वपि संस्कृतविद्वेषिमातुङ्गेषु सिंह-पराक्रमं विधत्ते । तदेच्छ्रेयः सर्वं श्रीश्रीनिवासाचार्याणां परिश्रमफलम् । अद्य सर्वेषु देशेषु मधुरवाणी स्तूयते, सर्वैरपि विद्वद्भिर्यत्सम्मान्यते सरसया सरलया च भूषणायमानया भाषासरण्या अनुकरणीयया लेखनशैल्या श्लाघनीयया विषय-विमर्शनपद्धत्या परमोच्चया विद्वद्धर्मेसराणां वैदुष्योज्जृम्भितलेखप्रकाशनसहानु-भूत्या विद्वेषासूयाऽपलापादिदोषविपाकलुषितया च वृत्त्या सर्वास्वपि संस्कृत-पत्रिकासु यदग्रपूजामानमर्हति तदेतत्सौभाग्यं श्रीश्रीनिवासाचार्याणामाश्चर्यकारि-

चातुर्यप्रभावविलासितमेवेत्युक्तिर्नातिशयोक्तिसीमां स्पृशतीत्यपि। हन्त तदिदं स्मरतो मे हृदयं तेषां विरहाग्निना दन्दह्यते। नम्रीभवति शिरः। स्वयमेवाञ्जलिरूपतां दधतः करौ भक्त्यात्मना परिणतप्रणयेन।

श्रीश्रीनिवासाचार्यैरारब्धं यशस्वितया प्रचालितं च मधुरवाणीप्रकाशन-कर्म गुरुतरमपि बहुलायाससाध्यमपि विपुलवित्तव्ययाधीनमपि प्रणयिनामुदाराणां परिस्थितिपरिचयानां वाचकमहाशयानां वरदहस्तावलम्बप्रत्ययेनैव पुनरुदूढवन्तो वयम्। कर्मण्यस्मिन् प्रतिक्षणं स्मृतिपथमुपयन्ति सुहृत्तमाः श्रीनिवासाचार्याः। मुद्रणकार्ये धनव्ययप्रसङ्गे कागदसम्पादने पत्रप्रापकालय (पोस्ट) व्यवहारे ग्राहकपत्रप्रेषणे सर्वत्रापि सर्वदापि तेषां स्मरणं महतीं वेदनां जनयति। इयत्समयं केवलं लेखलेखने मुद्रितलेखशोधने एव व्यापारयमात्मानम्। इतरत्सर्वं पत्रिकाप्रकाशनावश्यकं कर्म त एव निर्वहन्ति स्म। अद्य सर्वोऽपि भागो मय्येवापतितः सहसा। नाहमिदमज्ञासिषं यत् सुहृदः अकाले कार्यक्षमं कलेवरं सहसा परित्यज्य परलोके प्रवसेयुरिति। अत एवोच्यते'ऽसहायोऽस्मि' इति। गतं न शोच्यम्। पुरतः पन्था अनुसर्तव्यः। मधुरवाणीप्रकाशनकर्मणैव परलोकगतानां सुहृदामन्तरात्मा सन्तुष्येदिति अभीष्टकार्यकरणेनैव सुहृदृणान्मुच्येयेति कथमपि महत्तरं भारमुदूढवानहम्। कर्मण्यस्मिन् अस्मदीयभ्रातृसुत आयुष्मान् प्रतिभावान् धृतिमान् वाग्मी युवा कार्यदक्षोऽनलसोऽस्मासु निरतिशयमनुरक्तः पन्ढरीनाथाचार्यः साहाय्यविशेषं विधत्ते अथवा भारसर्वस्वं स एव वहतीति प्रवृत्तोऽहं नाममात्रेण।

श्रीश्रीनिवासाचार्या दिवङ्गता अपि कीर्तिरूपेण लेखरूपेण च चिरं स्थास्यन्त्येव संस्कृतप्रपञ्चे। यावद्भारतवर्षे सुरभारती विद्योतते प्रकाशते तावच्छ्रीनिवासाचार्याणां कीर्तिकामिनी विहरेदेव सर्वत्रेति नास्ति संशीतिलेशोऽपि। संस्कृतपत्रिकासंपादकेषु महोच्चपदमधिष्ठिताः अनुकरणीयलेखनशैलीकाः कथं नाम विस्मृतिपथमुपगच्छेयुः।

लेखनपाटवमधिजिगमिषुभिस्तान्नमस्कृत्यैव स्मृत्यैव तेषां लेखाननुवा-च्यैव परिशील्यैव पुरः प्रवर्तनीयं यशोवितत्यै । इयती खलु तेषां महती । कियान्वा वर्णनीयस्तेषां गुणगरिमा । लेखन्यैव विश्राम्यति । वागेव विरमति श्रमेण । अतः —

सुहृदेभ्यस्तेभ्यः सौहार्दमकरन्दस्यन्दिनं प्रणामकुसुमाञ्जलिं समर्प्य श्रान्तां लेखनीं विश्रामयितुमिच्छामो वयमिदानीम् । अथवा कुतो वा विश्रान्तिः पत्रिकासंपादनकर्मणि व्यापृतस्य लेखन्यासः ।

— — —

विशीर्णः सहसा हन्त ! सुरवाणीगलान्मणिः

ले० गलगली पण्ढरीनाथाचार्यः

सौहार्दे सरलाः कृतौ च कुशला मेधाविषूर्जस्वला
मेदिन्यां विरला मनस्यतरलाः कीर्तिप्रकाशोज्ज्वलाः ।
लेखिन्यामतुला वाचस्पतिकला विद्वत्स्वलं वत्सला
स्वर्याताः सुहृदो बताद्य सहसा श्रीश्रीनिवासाभिधाः ॥

चिरान्मधुरवाणीसंपादकानां पण्डितप्रकाण्डानां श्रीश्रीनिवासाचार्याणामकालिकेन आकस्मिकेन अतर्कितोपनतेन च मरणेन हा हन्त हता निहता घातिता चेयं बाला मधुरवाणी अद्य अगतिका अनाथा अशरणा निराधारा निराहारा निरालम्बा निरुत्साहा किंबहुना निर्जीवैव भूत्वा प्रलपति विलपति सकरुणमाक्रन्दति सोद्वेगं भुवि विलुठति अन्तस्सन्तप्यते सदुःखोद्रेकमाक्रुश्यति च । यः खलु महानुभावः बाल्यादारभ्यैव 'वाण्याः' पालनेन लालनेन सञ्चालनेन पोषणेन भूषणेन भाषणेन वेषणेन तोषणेन च 'पिता माता सुहृद्-बन्धुर्भ्राता पुत्रो गुरुश्च सः' आसीत्, तस्यैव अद्य निधनेन वज्राघातपातितेव

अवदलिता अधोगलिता उन्नतिप्रासादस्खलिता क्षीणा दीना दूना च पितृ-वियोगकातरा परिस्पन्दितुमपि नोत्सहते । निश्वसितुमपि जिह्रेति जीवित एव जुगुप्सामावहति । उपरते पितरि स्वसत्तयापि स्वान्तरपत्रपते । वागाविष्करण-मपि नैष्ठुर्यस्य परां काष्ठामेव चाकलयति । स्वप्रकाशनमपि स्वार्थान्धतामेवा-मनुते । शोकप्रदर्शनार्थं वाचारम्भणमपि हार्दिककाठिण्यनिदर्शकं शुष्कोप-चारमेवाबैति । इयमियत्कालं तदुत्सङ्गरङ्गस्थले रिङ्गन्ती स्वच्छन्दविहारलोला कृतानेकलीला बाला मधुरवाणी ।

हा हन्तायं ह्रदशोषविक्लवा मीनाबलेव दीनदीना दूनदूना गतिहीना च कतमां गतिमभ्युपैमीति चिन्तालीना वर्तते । तमसा हृतचन्द्रा कौमुदीव सहसा निमीलितेव सञ्जायते । क्षतसेतुबन्धने जलसंघाते विद्रुते सति मिलि-नीभूता नलिनीव शोचनीयामेव दशामवगाहते । भग्नोपघ्नयष्टिरिव चण्डमारु-तान्दोलिता बाललता डोलायमानजीविता भवति स्म ।

यस्य हि संततोद्योगशालिनः अशक्यशब्दानभिज्ञस्य भगीरथसाहस–विश्वप्रयत्नपरिणामेन मुष्टिमेयसंस्कृतज्ञाधिष्ठिते अङ्गुलीपरिगणनीयशिथिलमुष्टि-वदान्यजनेऽपि भारतखण्डे कन्याकुमारीत आरभ्य काश्मीरपर्यन्तं ग्रामे ग्रामे पत्तने पत्तने गृहे गृहे च मधुरवाणी मासि मासि आगत्य अवतीर्य स्वकीय मधुरापदविन्यासमुभगेन सलीलचङ्क्रमणेन रमणीयवचःप्रवृत्त्या च रसिकान्त रङ्गाणि रञ्जयन्ती सुधीशेखरशिरांस्यान्दोलयन्ती सर्वत्रापि स्वच्छन्दं सानन्दं च व्यराजत् व्यजम्भत च; तस्मिन् श्रीनिवासं स्वनिवासे अद्यैषा वाणी केन वा मुखेन वाचकानुपसर्पतु, को वाद्य तत्प्रसारयिता प्रचारयिता प्रचालयिता प्रथयिता वा। अहो साहसमस्य असमसाहसशीलस्य तस्य यदीयं क्षोणी कोणे कर्णाटकगते वेणुग्रामे लब्धजन्मापि सर्वत्रापि देशेषु रसिकैः कविभिर्विद्वद्भि-र्विमर्शकैश्चाद्रियते गृह्यते अनुगृह्यते वाच्यते आलोच्यते प्रीयते स्तूयते च । कोट्यधिकवाचकजनवाच्यमानासु देशभाषास्वपि ग्रीष्मसरिद्विलायं विलीय-मानासु मधुरवाण्या द्वादशवर्षप्रकाशनं पकाशयितुः प्रकाशयति पुनर्भगीरथा-

वतारत्वम् । एवं राजभाषा–राष्ट्रभाषा–मातृभाषा–देशभाषा–गृहभाषामय-पत्रिकास्वेव उत्पन्नविनष्टघटसमवस्थामनुविन्दतीषु का कथा संस्कृतपत्राणां, यासां ग्राहकगणना प्रसङ्गे कदाचित् अङ्गुष्ठतर्जनीनामपि अनामिकात्वमायाति। काश्चन पत्रिकाः शारदम्बुधराडम्बरम् एव विडम्बयन्ति, अन्याश्च काश्चन चञ्चचञ्चला इव यदा कदाचिदेव चारु चमत्कुर्वन्ति ।

अपराश्च काश्चित् दरिद्रमनोरथा इव विनाशसामग्रीसमवहिता एव उपत्द्यन्ते विलीयन्ते च । विद्यमाना अपि काश्चन आद्यक्षणावच्छिन्नघटा इव निर्गुणा निष्क्रियाश्च तिष्ठन्ति । एवं संस्कृतसाहित्यगगनाङ्गणे सर्वतो नैराश्यनिबिडान्धकारभरिते स्थिरकान्त्या चिरशान्त्या च अचलध्रुवनक्षत्रवद्-दीप्यमाना, नैराश्यौदास्यतमस्तोमं तिरयन्ती, अवज्ञामूर्छाभरमपहरन्ती ', सुरगीर्मृतेति व्याचक्षणानामभद्राणि सूक्तिदरिद्राणि वदनच्छिद्राणि सुदृढं मुद्र-यन्ती, मधुरवाणी सप्तसागरानिवोत्तीर्य द्वादशोत्तराशैलेन्द्रशृङ्गानुलङ्घ्य त्रयोदशे वर्षे यत्पदमादधाति तत्तस्यैव हि महात्मनः साहसप्रभावः प्रयत्नपरिणामः । किं बहुना अद्य अथवा इतःपुरश्च मधुरवाणी यानङ्कानाविष्करोति यदेकैक-मप्यक्षरमुच्चरति यच्चसा प्राणिति निश्वसिति जीवति वा तदेतत्सर्वमपि तदुपज्ञमेवेति निरभिमानमाचक्ष्महे । साक्षाद्भगीरथ एव यदि पुनरवतारिष्यत् सुरसरस्वतीसमुद्धारार्थं च प्रायतिष्यत् तस्यापि इदानीं सर्वतः प्रतिकूलवाता! वरणे एकसंस्कृतपत्रिकासंचालनमशक्यमेवाभविष्यत् । त्रुटितैकवराटिकालाभ-लेशप्रत्याशां विना अहर्निशप्रयत्नमदसीयं व्यर्थश्रमं विफलायासं च निरीक्ष्य बहव एव बन्धवः तमेनमेतत्पत्रिकाव्यवसायात्परावर्तयितुमुपदेशेनादेशेन निर्भत्सनेनामन्दया निन्दया च प्रायतन्त । परं सः ' कर्मण्येवाधिकारो मे ' इति शान्तरीत्यैव मन्दमधरदले हासं लासयन् उत्तरति स । पुनः स्वकीये निरर्थककर्मणि यथापूर्वमथवा पूर्वतोऽप्यधिकोत्साहेन द्विगुणितासक्त्या च अभि-प्रवर्तते स्म ।

मरणकालेऽपि यदा भिषग्वराः अधिकभाषणविचारादिकं न्यरुन्धन् तदा तैः गार्हस्थ्यविषयको वाग्व्यवहारः सर्वोपि परित्यक्त एव । परं रामाचार्या वा अहं वा तदन्तिकमुपासर्पाम तदा द्वित्रिघण्टापर्यन्तं मधुरवाणीविषयकाम् वार्तालापाम् सोल्लासं सोत्प्रासं सोच्चस्वरं च करोति स्म । निरुपाया गृहगता बान्धवा एवास्मान् ततो निर्गन्तुं सूचयन्ति स्म । वैद्यवरा युष्माभिः तत्समीपं नैवोपगन्तव्यमित्यस्मान्साग्रहं प्रत्यबध्नन् । तेषां यावत्प्राणोत्क्रमणक्षणं मधुर-वाणीचिन्तैव चेतःकुहरे परिवर्तते स्म । मरणसमये मामुद्दिश्य लिखिते पत्रे तेषामन्तिमवासना कीदृशी का चासीदिति स्पष्टमवगम्यते । अतोऽस्माभिः तदीयशःशरीरभूता मधुरवाणी सर्वथा रक्षणीया पोषणीया अभिवर्धनीया च । अतो यदा कदाचित् वाण्यङ्कनिष्कासने विलम्बो भवेत् तदा खिद्येतोद्विजेत च तदीयात्मा । अतोऽस्माभिः नियतावेलायां मधुरवाणी प्रकाशनीया । तत्-प्रकाशनं च सर्वथा उदारचेतस्कान् वाचकानेवान्वायतते । यदि वाचकाः कृपादृष्टिं विकीर्य मुष्टिं विस्तीर्य साहाय्यं प्रदास्यन्ति तदा सप्रतिज्ञमाश्वास-यामो वयं यद् इतःपरं मधुरवाणीं सकाले आविष्कुर्मः । आकाराभिवर्धनेन सरसलेखप्रदानेन च यथेयमाकर्षकस्वरूपा भवेत् यथा चास्याः पितुरात्मा एतां दृष्ट्वा आनन्दतुन्दिलतामियात् तथाकर्तुमुत्सहामहे । तेन मृतात्मा महात्मा तुष्टिं शान्तिं चाधिगच्छेत् । तदेतत्सर्वमपि कृपालुवाचकसुधीशेखरोदारधोरणीप्रसा-दान्वायत्तमिति पुनरेकवारं निवेद्य विरमामो विस्तरतः ।

भूषा भग्ना सुरुचिरुचिरा हन्त ! साहित्यदेव्या
विद्वत्कण्ठाभरणमणिरप्युज्ज्वलो हा विशीर्णः ।
मैत्रीवापी तदमृतमयी प्राप निश्शेषशोषं
सर्वस्वं वा सपदि मधुरोपाधिवाण्या विलुप्तम् ॥

— — —

शोकसभा

ज्येष्ठे वदि षष्ठ्यां भानौ (२७-६-४८) गीर्वाणवाग्वर्धिन्याः सभाया द्वारा आनन्दाश्रमे पं० रानडेशास्त्रिणामध्यक्षभावे वैशाखकृष्णद्वादश्यां मधुरवाण्याः संपादकाः पं० बुर्लो श्रीनिवासाचार्याः दिवंगताः तत्कृते शोकसभा अभवत् । तस्यामेकः प्रस्तावोऽध्यक्षैः प्रस्थापितः । स च यथा — म. वा. संपादकाः श्री बुर्लो श्रीनिवासाचार्याः दिवंगताः । इति गी.वा.व. सभायाः सर्वे अपि संचालकाः दुःखभाजोऽभूवन् । तेषां परलोकगमनेन इयं सभा नितान्तं शोकनिर्भरमावहति । हन्त हन्त तेषां गमनेन न केवलं मधुरवाणी न चापि सुरसरस्वती, अपि तु सकलोऽपि संस्कृतप्रपञ्चो निराश्रितोऽभूत् इति । प्रस्तावमिमं प्रस्तुत्य श्री परांजपे दिनकररायाः, श्री के. ना. वाटवे. श्री शेण्डयेशास्त्रिणः, श्री त्र्यम्बकराया आप्टे महाभागाः श्री डा० गोकर्णमहाशयाः, श्री वेङ्कटेश मुरगुडकरशास्त्रिणः इत्यादीनां भाषणान्यजायन्त । प्रतिभाषणं तेषां गुणगौरवं कृतम् । ततोऽध्यक्षैः तेषां विषये उक्त्वा किमपि किमपि समारोपः कृतः — रानडे पुरुषोत्तमः, पुणे

* * * *

अस्माकं सुहृदः बुर्लो श्रीनिवासाचार्याः उदररोगेण पीड्यमाना इहलोकं विहाय त्रिदिवं गता इति संयुक्तकर्णाटकपत्रद्वारा निशम्य नितान्तं विषीदति चेतः । ते रुग्णा आसन्निति न श्रुतमपि मया । तेषां वियोगेन न केवलं तेषां कुटुम्बीयानां महती हानिः, किंतु मधुरवाण्या अपि अपूरणीया हानिः संजाता । बलवती खलु ईश्वरीया योजना । तेषामात्मा शाश्वतीं शान्तिं विन्दत्विति नः प्रार्थना । तेषां कुटुम्बीयानां भवतां सर्वेषां च शोकविप्लवे वयमपि समभागिनः । भवादृशानां वेदान्तपटूनां सकाशे किमधिकं वक्तव्यं मया । तथापि 'स्निग्धजनसंविभक्तं हि दुःखं सह्यवेदनं भवति' ।

— भवदीयः डा० गोकर्णः, पुणे

सविनयं निरूप्यते–यत् श्रीमान् बुर्ली श्रीनिवासाचार्यमहाभागः निज-स्थानं श्रीनिवासं वैकुण्ठं जगामेति वार्तां श्रुत्वा दुःखानुतापः परिबाधते मानसम्। मधुरवाणी जनकविरहेण, सन्तापं सहबान्धवैरनुभवतीति विषाद-प्रायमेतत्।

श्रीमतां भवतां ज्ञानसहचाराणां श्रीनिवासाचार्याणां कृतिसहकृतिर-स्तङ्गताऽपि, श्रीमत्पण्ढरीनाथाचार्यादिपण्डितसाहाय्येन देववाणीसेवा निरबाधेन भगवत्कृपानुरोधेन यथाप्रकारं प्रचलतीति द्रढीयान् विश्वासः।

श्रीनिवासो हरिः श्रीनिवासाचार्याणां नित्यात्मने शांतिप्रदानेन तद्-बांधवानां च दुःखशमनं करोतु इत्याशासे। मधुरवाणीसंपादकत्रयसंख्या-पूरणेन, विघ्ननिवारणेन सुरभारतीसेवा सार्थका भवेदिति मदीया मानसोत्कण्ठा, इति शिवम्।

भवदीयः
हूलि तर्कतीर्थ नीलकण्ठशिवाचार्यः, सौन्दत्ती

* * * *

मधुरवाणीसम्पादकानां पं० बुर्ली श्रीनिवासाचार्यमहोदयानां वैकुण्ठ-वासवृत्तं निशम्यातीव दुःखितोऽहम्। मधुरवाण्या महती हानिः सञ्जाता। तथाचाधुनिकसंस्कृतसाहित्यस्यापि अपरिमेया हानिः संवृत्ता। मधुरवाण्याः सकलोऽपि भारो भवत्स्वेव पतितः। शोकभारं न्यूनीकृत्य श्रीपरमेश्वरमनीषायां विश्वस्य च मधुरवाण्याः प्रकाशनकर्म यथापूर्वमेव प्रचालनीयम्। पं० बुर्ली महाशयानां कुटुम्बीयानां भवतां च दुःखेऽहं संविभोगीति विज्ञेयम्। किमधिकेन विज्ञेषु तत्र भवत्सु।

भवद्दुःखभाक्
हुपरीकरोपाभिधो गणेशशर्मा
प्रा.बी.टी.कालेज, कोल्हापुर

॥ श्रीः ॥

स्वस्ति सादरं निवेद्यते —

अद्यैव भवदीयकुशलं प्रष्टुं पत्रं लिखिष्यन्त्या मयातिशोचनीयात्मकं पत्रं संप्राप्तम् । अहह कीदृशोऽयं दैवस्य संनिपातः । पण्डितप्रकाण्डानां बुर्लीशास्त्रिणां निधनेनाखिलभारतस्य संस्कृतप्रणयिनां महती हानिः सञ्जाता खलु । अहं तु शोकाकुलास्मीति वक्तुं पुनरुक्तिरेव स्यात् । अष्टवर्षेभ्यः प्राक् तेषां प्रथमतो मे परिचयोऽभूत् । तत्प्रभृति तेषां नितरां सौजन्यस्य विद्वत्तायाश्च लाभो मया पुनः पुनः पत्रव्यवहारेण तेषां लेखनैश्च प्राप्तः । बाला मधुरवाणी सञ्जातानाथेति दोदूयते चेतः । किं करणीयम् । वयं तु दैवायत्ताः । दिवंगतानां तैः प्राप्स्यतेऽमुत्र सुखमिति परमात्मानं प्रार्थये ।

अत्यन्तदुःखिता सौ० क्षमादेवी, मुम्बई

* * * *

श्रीमत्सु तत्र भवत्सु श्रीयुत गलगली रामाचार्यमहोदयेषु प्रणतिपुरःसरं निवेदनम् । आर्याः ! श्रीमतां बुर्लीश्रीनिवासाचार्याणां निधनवार्तां वृत्तपत्रेषु पठित्वा नितरां दुःखव्याप्तोऽभूवम् । श्रीमतो श्रीनिवासाचार्यस्य साक्षाद्दर्शनाभावेऽपि मम परमसुहृद् आसीत् । तत्प्रेरणयैवाहं बहूनि वर्षाणि मधुरवाण्या ग्राहको लेखकश्चाभवम् । तस्य वैकुण्ठवासेन मधुरवाण्या महती हानिर्जाता । तत्पूर्तिः कथंचित्पण्ढरीनाथाचार्यादिसाह्येन संपाद्येत । किन्तु महाराष्ट्रदेशस्ताद‍ृशं धर्मनिष्ठं वैष्णवाग्र्यं संस्कृतप्रचारदक्षं परमतसहिष्णुस्वकार्यदक्षं निरलसं च विद्वांसं विना महतीं क्षतिमाप्नोत् सा दुर्भरेति मन्ये । सोद्योगाः संस्कृतप्रियास्ताद‍ृशा विबुधा हीदानीं दुरापा अभवन् । सत्कर्मव्ययितायुषां ताद‍ृशमहात्मना वैकुण्ठे, चिरशान्तिलाभः स्यान्नात्र संशीतिलेशोऽपि । संस्कृतप्रचार कर्मणा सुहृद्भूतोऽहमपि तत्र भवतां दुःखानुभूतांवंशभागिति मत्वा यथापूर्वं स्नेहरक्षणं क्रियतामिति विज्ञापयते । भवदीयः

— शिवरामशास्त्री शिन्त्रे, लोनावळ

श्री बुर्लीश्रीनिवासाचार्यमधिकृत्य चरमश्लोकाः

अस्माकं सुहृदः प्रियङ्करगुणान् श्रीसाहितीवल्लभान्
शास्त्राम्बोनिधिकुम्भसम्भवनिभान्मेधाविलासोज्ज्वलान् ।
आचार्यान्बत ! बुर्ल्युपाधिमहितान् श्रीश्रीनिवासाभिधान्
कालोऽयं कबलीचकार कुटिलो दौर्भाग्यतोऽस्मादृशाम् ॥ १ ॥

लेखा यस्य हि लेखवाक्कुमुदिनीराकाशशाङ्कस्य च
श्लाघ्यास्स्युर्हृदयङ्गमा रसपरा लालित्यभूम्नोज्ज्वलाः ।
विद्वन्मानससारसोष्णकिरणा गम्भीरिमण्यास्थिताः
सोऽयं हन्त ! विलासतो हतविधेर्नामावशेषं गतः ॥ २ ॥

रुद्धःकण्ठस्थगयति दृशावश्रुपूरोद्गमोऽयं
वाङ्मे स्तब्धा, व्रजति न मतेर्लेखिनी मित्रभावम् ।
चेतस्स्वास्थ्यं न भजति वपुर्वेपथुं नो जहाति
श्राम्यन्भूयो चडिमनि मुहुःर्मज्जतीवान्तरात्मा ॥ ३ ॥

किन्नैकोक्त्या ? पितृसमधिकं मन्यमानस्तमासं
यस्माद्दूरे स्थितमपि स मां योजयामासं कीर्त्या ।
जन्मन्यस्मिन्कथमिव लभेयाहमीदृग्गुणाढ्यं
'दौर्भाग्यं हा ! किय 'दिति मुहुर्भावयन्भूरि खिद्ये ॥ ४ ॥

कथंकारं सेहे बत ! मधुरवाणी सरलहृत्
भृशं शोकोद्वेगं निजजनकविश्लेषजनितम् ।
किमाश्वासं चक्रे ? स, गलगलिरामोऽपरपिता
मनश्शान्तिर्भूयात्तव दुहितुरीशस्य कृपया ॥ ५ ॥

गलगली रामाचार्याः बुर्लीश्रीश्रीनिवाससुतरले ।
चिरंजीविनि सकुटुम्बे निवेदयन्तां मदीयमनुतापम् ॥ ६ ॥

* * * *

श्रीनिवासाचार्यवर्यस्यात्मा गुरुकृपाबलात् ।
लब्ध्वा विष्णुपदाम्भोजसायुज्यं शान्तिमाप्नुयात् ॥ ७ ॥

महामहोपाध्यायोऽहं शोकसन्तप्तमानसः ।
बुर्लीश्रीश्रीनिवासाय निरमां चरमां कृतिम् ॥ ८ ॥

इत्यलम्

अनुतापी—कृष्णमूर्तिशास्त्री, मथुरा

* * * *

प्राणाधिक ! प्रथित बुर्लि कुलावतंस !
हा ! श्रीनिवास ! सुकृतिन् ! सुधियां वरेण्य ।
अस्मच्छरीरगतकेवलजीवशक्ते !
संत्यज्य नस्तव जनान्, क्व गतोऽस्यकाले ॥ १ ॥

चैतन्यशक्तिरहिता भवता विहीनाः
सर्वे वयं हि तृणकाष्ठसमा भवामः ।
मुख्यार्चकस्य विरहात्सुरवागपीयम्
निर्माल्यभारमधुना वहति स्वमूर्ध्नि ॥ २ ॥

गीर्वाणवाक्प्रचरणोद्यमिनोऽन्वहं ते
क्षेत्रं प्रधानमयमेव हि मर्त्यलोकः ।
संत्यज्य नोऽकरुण ! संप्रति कस्य हेतोः
स्वीयं च कार्यमसमाप्य दिवं गतोऽसि ॥ ३ ॥

संचितये मधुरवाणि ! यदा यदा त्वाम्
दूये मनस्यतितरां, तव का गतिः स्यात् ।
कः पूरयिष्यति मनोज्ञमनोरथांस्ते
रामं भज त्वमनिशं, स तवार्तिहन्ता ॥ ४ ॥

हे श्रीनिवास ! भवता परिवंचितोऽपि
वाञ्छाम्यनन्तमतुलं सुखमाप्नुहीति ।
संवर्धतां मधुरवाण्यपि बालचन्द्र —
ज्योत्स्नेव सा प्रतिदिनं भवदाशिषैव ॥ ५ ॥

—गुण्डेराहरकारे गद्वाल

* * * *

स्वर्गतः श्रीनिवासः

सिद्धो योगीश्वर इव सदाध्यात्मविद्याप्रवीणो
वाग्मी शास्त्रेष्वविहतगतिः क्रान्तदर्शी गुणाढ्यः ।
यो मर्मज्ञः कलितकविताकामिनीवल्लभोऽभूत्
सोऽयं विद्वानहह ! सहसा स्वर्गतः श्रीनिवासः !!! ॥

पं० गणेशरामशर्मा, ज्योतिषोपाध्यायः विशारदः
राजज्योतिषी, संस्कृताध्यापकः

* * * *

शोकश्लोकाः

अष्टालयं भारतदिव्यदेशं ह्युद्धर्तुकामो ननु संस्कृतं च ।
विधातुकामो भुवि राष्ट्रभाषां दिवंगतो देववरोपलब्ध्यै ॥
बभूव बहुवल्लभा वसुमतीह सर्वं सहा
यथैकपतिनाशतोऽप्यहह सूरिबुर्लीमणे ।
क्षमादिगुणसन्निधेः परमलोकगत्याऽधुना
तथा मधुरवाण्यभूदियमपीह दुःखसहा ॥

पं० सरसकविराजः श्रीरामानुजाचार्यः
(पैत्तांबाडि)

* * * *

शोकाश्रुप्रमार्जनम्

वैकुण्ठगतीनां श्रीनारायणपदाम्भोरुहयोस्सेवनाय तत्संनिकर्षङ्गतानां श्रीमतां बुर्लीश्रीनिवासाचार्याणां विषये समुद्भूतशोकपूरस्य सरसः कुल्यानिर्माणेनेवावेगसंवरणार्थमत्र सञ्चालकश्रीशुक्लशास्त्रिणामाध्यक्ष्ये सदसोऽधिवेशनमभूत् । तत्र च (M.A.) इत्युपाधिधारिणो दामोदरोपाव्हाः शङ्कररावमहोदया उपन्यास्थन् ।

अन्ये चापि टिल्लूपाख्यो नारायणशास्त्री, मंत्री शुक्लोपाख्यो नामदेवशास्त्री, विद्यार्थी च भगवद्दत्ततनुजः पुरुषोत्तमशास्त्री च व्याचक्षत प्रसङ्गसदृशम् ।

उपस्थिताश्चासन्नत्र जोशीत्युपाह्व विष्णुतनूजगंगाधरशास्त्री, भावात्मजो धर्माधिकारी श्यामशर्मा, शुक्लोपाव्हो विष्णुतनूजः खण्डशर्मा, राजवैद्य ईशवदात्मजनुः कृष्णशर्मा, वैद्यो बलदेवतनुजः टिल्लूपनामा दत्तात्रेयशर्मा, वकीलः 'जोशी' इत्युपाव्हो विष्णुतनुजो देवीदासशर्मा (B.A., L.L.B.) वैद्यवरः सदाशिवात्मजस्सखारामशर्मा (L.M.P.), अन्ये चापि शिष्टा अत्रोपस्थिता आसन् ।

आध्यक्ष्ये वर्तमानैश्चातुर्मास्ययाजिशुक्लैरभाणि इदानीं करालतरे कालेये काले श्रीनिवासाचार्यसदृशानामास्तिकप्रवराणां विदुषां वियोगोऽसह्यस्तत्रापि महाराष्ट्राणां नो दुःसह एव सम्पन्नः । पञ्चपञ्चाशद्वत्सरं वयस्तेषां नासीत्किल जरसो निदर्शनम् । एतद्वयोदेशीयाः खलु युवान एवास्मादृशां सप्ततिद्वासप्ततिवर्षवयस्कानामपेक्षया इति ।

शोकसभा

बुर्लीमहोदयानां निधनेन संस्कृतजगति महती हानिः सञ्जाता । अस्माकं आयुर्वेदविद्यालये संस्कृतवाङ्मयसङ्घः वर्तते । तत्रापि एतेषां निधनस्य दुःखमाविष्कर्तुमेका सभा असीत् । वाटवे महाभागा अध्यक्षाः आसन् । तत्र अयं प्रस्तावः अङ्गीकृतः ।

'गते मासे वेणुग्रामस्था मधुरवाणीसंपादकाः बुर्लीश्रीनिवासाचार्याः स्वलोकं गताः। एतेषां महाभागानां निधनेन न केवलं मधुरवाण्याः किन्तु गीर्वाणभाषायाः अपि महती हानिः सञ्जाता। अस्माकमियं संसदपि एतेषां निधनशोके सहभागिनी वर्तते।'

भवदीयः
म. रा. गोकर्णीः
अध्यक्षः, संस्कृत वाङ्मयसंघः
आयुर्वेद महाविद्यालयः, पुण्यपत्तनम्

* * * *

श्रीबुर्लीश्रीनिवासाचार्याणां वैकुण्ठगमनवार्तामाकर्ण्यात्यन्तं दुःखमनुभवामि। साहित्य-वेदान्त-व्याकरणादिविषयेषु तेषामपारं ज्ञानं संस्कृतभाषायां प्रभुत्वं च पण्डितानां मान्यमासीत्। मधुरवाणीविषये प्रारम्भे विदुषामौदासीन्ये विद्यमानेऽपि श्रीबुर्लीश्रीनिवासाचार्याः परिश्रमेण यत्प्रचारं व्यदधुस्तेनैव मधुरवाणीयमद्यतनमोजस्विरूपमवाप। प्राप्तस्वातन्त्र्यसमये यदि ते कानिचन वर्षाण्यजीविष्यंस्तर्हि संस्कृतस्य राष्ट्रभाषापदप्राप्तये मधुरवाण्या उत्कर्षाधिगमाय चामूल्यं साहाय्यमभविष्यत् इत्येष विचारो मनस्यानाविर्भूय न तिष्ठति। अस्तु 'बलीयसी केवलमीश्वरेच्छा'। —सदाशिव चिन्तामण बापट

श्रीश्रीनिवासाचार्याणां चरमं पत्रम्

सहसंपादकानां सविधे प्रणयपूर्वकाः प्रणिपाताः। अत्र यदा यूयमागताः सदैव ममाल्पीयानपि वेगाद्वर्धिष्णुरासीद् यकृद्रोगः। स इदानीमतिभूमिंगतो यकृद्विकारः उदररोगात्मना परिणमन् चिकित्सकानामप्यसाध्य एव संवृत्तः। यद्यपि वैद्यवर्याः तथा स्पष्टं नैराश्योद्गारं नैवाविष्कुर्वन्ति, परमनेकशो बहुल-

मन्यत्र एतद्रोगस्य दुरन्तदुष्परिणामं दृष्टवतः तानि सर्वाण्यपि दुर्लक्षणानि मयि पश्यतोऽथवानुभवतः मम निश्चय एव जातो वर्तते यदस्माद्रोगान्नाह-मुन्मुक्तो भवेयमिति । जगति दुश्चिकित्स्यं हि जलोदरं नाम। राजयक्ष्मकव-लिता अपि क्वचित् केचिदुल्लेखा दृश्यन्ते । परम् उदररोगपीडितः न कोऽपि चिरं जीवन् नरो दृष्टः । अत इदं कटुतममपि सत्यं यदचिरात् मासाभ्यन्तरे एव मया मदीया भूलोकयात्रा समापनीया ।

इदानीं मम जीवननाटकस्य चरमोऽङ्कोयम् । दिने दिने शक्तिः क्षीणा भवति । प्राय एतदेव अंतिमपत्रं भवेत् । इतःपरं लेखनीमुद्धर्तुं नाहं शक्नोमि। अधुनापि एतत्पत्रं मया कियता प्रयासेन लिखितम् इत्येतद् अक्षरैरेवानुमातुं शक्यते । कीदृग्विधमपि प्रयासमङ्गीकृत्यापि मम अंतिमेच्छा युष्माकं सविधे आविष्करणीयेति निर्धार्य उद्यतोऽस्मि पत्रलेखनाय । वस्तुतो मम मरणे न किमपि शोचनीयं वर्तते । अहमिदानीं कृतकृत्य एव । मम उभावपि पुत्रौ संसारनिर्वहणपर्याप्तं वेतनं संपादयतः । विवेकेन च सम्यक् यथोचितं यथायोग्यं च व्यवहरतः । अतो न ममापत्यविषयिणी चिन्ता । कान्ता तु बहोः कालात् प्रागेव कुंकुमाङ्कितालिकान्ता भूत्वा भर्तुर्मम पुरत एव परेतपतिपालितपुरी-पान्थाभूत् । ममापि आयुषो बहुभागः पुराणपाठप्रवचनपारायणपूजाजपतपो-नुष्ठानादिभिरेव व्यतीत इति परलोकेऽपि न ममात्यन्तिकदुःखमिति । एव महमिदानीं निश्चिन्तोस्मि । मम आयुष्ये विहितं महाकार्यं नाम मधुरवाणी-प्रकाशनमेव । विद्यन्ते विद्योतन्ते च वसुन्धरावलये भूयांसो विद्वांसः, परं न केनापि संस्कृतपत्रिकां चिरं प्रकाशयितुमपारि । अस्माभिस्तु द्वादशवर्षाणि यावन्निरन्तरं निरन्तरायं च मधुरवाणी प्रचालितेति अभिमानेन स्फार्यते हृदयं, स्वयमेव स्वपृष्ठतटमेवाऽऽस्फालयितुं सोत्साहमुद्युंक्ते हस्तः । आत्मानमेवात्मना पुनः पुनः प्रशंसितुं नैव लज्जते चात्मा । एतादृशमुमूर्षावस्थायामपि मधुर-वाण्या अङ्का यदि दृश्यन्ते तदा आनन्देन स्थिमितमेव भवति हृदयम् ।

उल्लासेन नृत्यत्यन्तरङ्गम् । सर्वापि च रोगवेदना संपूर्णमेव विस्मृता भवति । मरणसमये मम हृदयस्य एकमेव समाधानं नाम मधुरवाणी । इतरासाधारणं महत् कर्म मयानुष्ठितं जीविते इति कल्पनापि परलोकनवप्रयाणोन्मुखस्य मम वपुषि आनन्दोद्रेकवशाद् रोमाञ्चसञ्चयमेव उदन्वयति । मम आशा आसीत् यदीयं वाणी साप्ताहिकी क्रमशो दैनिकी अपि कर्तव्या इति । परं विधाता मम आयुर्मानमियत्परिमितमेव निरदिशत् । मम तु चिरादेका आकांक्षा आसीत् अस्ति चाद्यापि जागरूकैव यद् समग्रेऽपि भरतखण्डे एतादृशं गृहमेकमपि अन्विष्यापि नैवोपलभ्येत यत्र मधुरवाणीप्रवेशो नास्ति । परमेते मनोरथा मयास्मिन् जन्मनि सिद्धिपथमारोपयितुं नैव शक्यन्ते । अतो मदीयै-तत्सर्वाकांक्षापरिपूरणक्षमं कमपि योग्यतासंपन्नं पुमांसं चिरादन्वेषयतो मम मनुश्चक्षुषःपुरः न कोपि एतन्महाकर्मनिर्वाहालङ्कर्मीणः कविग्रामणीः साहसि-शिखामणिः विद्वदग्रणीरद्याप्यतिथीभवति प्रभवन्तमत्र भवन्तं भवन्तमेकमन्तरा ।

मम तु मते अद्य द्वादशवर्षदेशीयायाः अत एव उपवराया वाण्याः कविप्रवरः वरो वरो नाम भवानेव तद्रूपानुरूपः गुणानुगुणः योग्यतमः । जमाता च त्वं वरः श्रेष्ठः यद्येनां परिगृह्णासि अनुगृह्णासि चेत्, तदाऽहमद्य 'रत्नं समागच्छति काञ्चनेन' इति मनस्येव समादधत् शकुन्तलां पतिगृहं प्रेष्य कण्व इव 'तामद्य सम्प्रेष्य परिग्रहीतुः' तवान्तिकं प्रत्यर्पितन्यास इव प्रकामविश-दान्तरामा भवितुमिच्छामि । मधुरवाण्यामेव तदा तदा प्रकाशितानेव नैकान् लेखान् युष्माकं लोकम्यणाननेकान् श्लोकांश्चापि दर्शं दर्शं हैदराबाद-दावणगे-री-बीजापुर-सोलापुर-बेळगांवप्रभृतिपट्टणेषु नैकसंस्कृतसमारम्भप्रसङ्गेषु च विहि-तानि तानि तानि निरर्गलास्खलितसंस्कृतभाषणानि श्रावं श्रावं सुरसरस्वती-समुद्धरणव्यसनं च तावकीनमवगत्य मया निरधारि मधुरवाण्याः पुरस्तात् मम पश्चात् 'स एव हि वरः' इति । तवापि चिरात्सुरगवीसमुद्धारोत्थानाभ्युदयार्थं प्रयतनीयमित्यासीद्बलीयसी उत्कण्ठा । मधुरवाणीसदृशी विश्वव्यापिनी पत्रिका

यद्यनायासेन हस्तसाद्भवेत् तदाचिरादेव फलग्राहिः सञ्जायते तव मनोरथद्रुमः। किं बहुना 'सकलपत्रभारस्थापितो वत्स मूर्ध्नि'। एतद्भारं त्वयि संस्थाप्य 'तस्यामहं त्वयि च संप्रति वीतचिन्तः' अहमाशासे यदचिरादेवेयं कोट्य-धिकभारतीयकुटीरेषु पर्यटन्ती कटुविमर्शपट्टनामपि वदनपुटीनटीभावमापन्ना अत्युत्तमदेवभाषापत्रिकाणामुच्चतमां कोटिं साटोपमाटीकमाना सर्वशालाकालेज-गतचटुलबटुपटलीपठनपाठनपरिपाटीप्रविष्टा विधिवधूटीसाहित्यवाटीचाटूपटुचेटी भूत्वा 'सर्वेषामपि रसिकानां' 'गृहिणी सचिवो मिथः सखी गुरुरेवं ललिते कलाविधौ' भवेदाचन्द्रतारकं संस्कृतसाहित्यगगनाङ्गणे ध्रुवतारका भूत्वा प्रकाशेत् प्रचलेत् प्रसरेत् प्रचरेत् प्रसिध्येत् प्रीणयेत् प्रगच्छेत् चेति। तदेतन्मदीयसर्वाशापूर्तिः त्वयैव साध्या कर्तुम्। जानेऽहं तवाल्प-वयस्कतां कार्यानुभवाभावं च। तथापि श्रीमन्तः सरसकविताकामिनीस्वयं-ग्रहपरिष्वङ्गसौभाग्यभाजनीभूताः प्रधानसंपादकाः रामाचार्याः वर्तन्ते तव सर्व-विधसाहाय्यार्थे। तेषामेकेनापि लेखेन सुवृक्षेण वनं यथा वासिता भवति तथा 'वाणीयम्'। ममापि त एव प्रचोदकाः प्रोत्साहकाः प्रेरकाश्चासन्। अद्यापि इतःपुरतोपि ते तव सहायकाः मार्गदर्शिनश्च भविष्यन्ति। केवलं मुद्राराक्षस कार्यभारः परं त्वया वोढव्यः, अन्यत्सर्वमपि रामनामप्रभावान्निरातङ्कं प्रच-लति। 'पाषाणादपि पीयूषं स्पन्दते यत्प्रभावतः। शब्दाब्धिलब्ध-वैदग्ध्ये रामे रक्षति का क्षतिः' इति धैर्यं धियमाधाय कार्ये प्रवर्तस्व। तेषां सर्वाधिकारित्वे न किमपि परिहीयते।

अतःपुरस्तनाङ्कानां बागलकोटित एव प्रकाशनार्थे मुद्रणव्यवस्था कार्या। सकाशे अङ्का नियतं प्रकाशनीयाः तदाकारोऽभिवर्धनीयः। प्रतिवर्षं न्यूनान्-न्यूनतरं नाम शतसंख्याका वा ग्राहका अधिकाः संपादनीयाः। सरल-लेखकानां प्रोत्साहं प्रदाय विचारप्रचुर-विनोदप्रधान-रसपरिप्लुतलेखानां संग्रहः कर्तव्यः। किं बहुना अयमत्रास्माकं जीवनसन्देशः 'अस्मान् साधु विचिन्त्य

साहसधनान् उच्चैश्च कृत्यं महत् अस्यां बाल्यत एव वर्धितवर्ती स्नेह-प्रवृत्तिं च ते । सामान्यप्रतिपत्तियोग्यसुरसा पत्रेषु कार्या त्वया भाग्यायत्तमतः परं न खलु तद्वाच्यं ' पुरा चालकैः ॥

देवदेवमहमेतदेव प्रार्थये 'यत् स्वामिन् मां पुनर्जन्मनि एकं मधुर-वाणीवाचकं कारय । यदि न मम तादृशं भाग्यं तर्हि कमपि पत्रप्रापकं (पोस्टमन्) कारय, येन शतशो मधुरवाणीसञ्चिकासंस्पर्शलाभसौभाग्यं प्राप्येत । यदि मां जडं कर्तुं तावाकांक्षा तदा मधुरवाणीनिक्षेपणमञ्जूषामेव कुरु । एवं च यत्किमपि वा भवतु मधुरवाणीवियोगस्तु जन्मजन्मान्तरेऽपि माऽभू-दिति । जन्मान्तरे यद्यहं पशुर्वा पक्षी वा भूत्वा कस्यचिद् गृहे बद्धो भवि-ष्यामि तदापि तत्र मधुरवाण्यङ्कमवलोकयिष्यामि वा तदापि मम अमन्दानन्द-सिन्धुरुत्तरङ्ग एव भवेत् । अतो मम मुमूर्षावस्थामापन्नस्य इयमेकाकांक्षा युष्माभिः परिपूरणीया यन्मधुरवाणी मदनन्तरं प्रतिबद्धा माभूदिति । मम मरणानन्तरमपि मदर्थे शोकः नैव कर्तव्यः । यतो हि

एकान्तविध्वंसिषु मद्विधानां
पिण्डेष्वनास्था खलु भौतिकेषु ।

यदि ममोपरि सत्यमेव युष्माकं प्रेम स्नेहो वर्तेत तर्हि इयमेव मदीया प्रार्थना यत् —

' यशश्शरीरे भव मे दयालुः '

इति चरमः प्रणामाञ्जलिः

युष्मत्प्रेमकामी

बुर्रा श्रीनिवासाचार्यः